जइया तुहु णिग्गंथ जिय, तो लब्भइ सिवपंथु ॥ ७३

जं वडमज्झइ बीज फुडु, बीयह वडु वि हु जाणि ।
तं देहह देउ मुणहिं, जो तइलोयपहाणु ॥ ७४

जो जिण सो हउं सो जि हउं, एहउ भाउ णिभंतु ।
मोक्खह कारण जोइया, अण्णु ण तंतु ण मंतु ॥ ७५

बे-ते-चउ-पंच वि णवहं, सत्तहं छह पंचाहं ।
चउगुण सहियो सो मुणह, एहो लक्खण जाह ॥ ७६

बे च्छंडवि बे गुण सहियउ, जो अप्पाणि वसेइ ।
जिणसामी एवं भणई, लहु णिव्वाण लहेइ ॥ ७७

तिहि रहियो तिहि गुण सहियओ, जो अप्पाणि वसेइ ।
सो सासयसुह भायणु वि, जिणवरु एम भणेइ ॥ ७८

चउ कसाय सण्णा रहिओ, चउगुण सहियो वुत्तु ।
सो अप्पा मुणि जीव तुहु, जिम पर होहि पवित्तु ॥ ७९

बे-पंच[ह]रहियो मुणहि, बे-पंचह संजुत्तु ।
बे-पंचह जो गुणसहियो, सो अप्पा णिरवुत्तु ॥ ८०

अप्पा दंसण णाण मुणि, अप्पा चरण वियाणि ।
अप्पा संजमसील तऊ, अप्पा पच्चक्खाणि ॥ ८१

जो परिआणइ अप्पपरु, सो परु चयहि णिभंतु ।
सा सण्णास मुणेहिं, तुहं केवलणाणि य वूत्तु ॥ ८२

दंसण जं पिच्छियइ बुह, अप्पा विमल महंतु ।
पुणु पुणु अप्पा भावियइ, एसो चारित्त पवित्तु ॥ ८३

रयणत्तय संजुत्त जिउ, उत्तिमु तित्थु पवित्तु ।
मोक्खहकारण जोइया, अण्ण ण तंतु म मंतु ॥ ८४

जहि अप्पा तहिं सयलगुण, केवलि एम भणंति ।
तिहि कारणए जोइ (जी)व फुडु, अप्पा विमलु मुणंति ॥८५

इक्कलउ इंदिय रहियउ, मण-वय-काय ति सुद्धि ।
अप्पा अप्प मुणेइ तुहि, लहु पावहु सिवसिद्धि ॥ ८६

जइ बद्धो मुक्कउ मुणहिं, तो बंधियहि णिभंतु ।
सहज सरुवइ जइ रमइ, तो पावहि सिवसंतु ॥ ८७

सम्मादिट्ठी जीवडह, दुग्गइ गमणू ण होइ ।
जइ जाइ वि तो दोस णवि, पूव्वकिउ खवणेइ ॥ ८८

अप्प सरुवह जइ रमइ, च्छंडवि सहु ववहारु ।
सो सम्मादिट्ठी हवइ, लहु पावइ भवपारु ॥ ८९

अजर अमरु गुण-गण निलउ, जहि अप्पा थिरट्ठाइ ।
सो कम्मेहि ण वि बंधियउ, संचिय पूव्वविलाइ ॥ ९०

जो सम्मत्त पहाण बुह, सो तइलोय-पहाणु ।
केवलणाण लहु लहइ, सासय-सुक्ख णिहाणु ॥ ९१

जह सलिलेण ण लिप्पयइ, कमलणिपत्त कया वि ।
तह कम्मेण ण लिप्पयइ, जइ रइ अप्प सहावि ॥ ९२

जो समसुक्खणिलीण बुहु, पुण पुण अप्प मुणेइ ।
कम्म खउ करि सो वि फुडु, लहु णिव्वाणु लहेवि ॥ ९३

पुरिसायार पमाणु जिय, अप्पा एहु पवित्तुं ।
जोइज्जइ गुण गण णिलउ, णिम्मल ते य फुरंति ॥ ९४

जो अप्पा सुद्धु वि मुणेई, असुइ सरीर वि भिण्णु ।
सो जाणइ सत्थयसयलु, सासयसुक्खह लीणु ॥ ९५

जो ण वि जाणइ अप्पपरु, णवि परभाउ चएइ ।
सो जाणउ सत्थइं सयलु, णहु सिवसुक्ख लहेवि ॥ ९६

वज्जियसयल वियप्पइं, परमसमाहि लहंति ।
जं विंदहिं साणंदु कु वि, सो सिवसुक्ख भणंति ॥ ९७

जो पिंडत्थु पयत्थ बुह, रूवत्थु वि जिण-उत्तु ।
रूवातीतु मुणेहु लहु, जिम परु होहि पवित्तु ॥ ९८

सव्वे जीवा णाणमया, जो समभाउ मुणेइ ।
सो सामाइउ जाणि फुड, जिणवर एम भणेइ ॥ ९९

राय-रोस बि परिहरवि, जो समभाउ मुणेइ ।
सो सामाइउ जाणि फुडु, केवलि एम भणे ॥ १००

हिंसादिक परिहरु करि, जो अप्पा हु ठुवेइ ।
सो बियउ चारित्त मुणिं, जो पंचमगइ णेइ ॥ १०१

मिच्छादिक जो परिहरण, सम्मं दंसणशुद्धि ।
सो परिहारु विसुद्धमुणि, लहु पावहि सिवसुद्धि ॥ १०२

सुहुमह लोहह जो विलउ, जो सुहमु वि परिणामु ।
सो सुहुम वि चारित्त मुणि, सो सासय सुहधाम ॥ १०३

अरहंतु वि सो सिद्धु फुडु, सो आयरिउ वियाणि ।
सो उवज्झाउ सो जि मुणि, णिच्छइ अप्पा जाणि ॥ १०४

सो सिउ संकरु विण्हु सो, सो रुद्द वि सो बुद्धु ।
सो जिण ईसर बंभू सो, सो अणंतु सो सिद्धु ॥ १०५

एव हि लक्खण लक्खियउ, जो परु णिक्कलु देउ ।
देहह मज्झहि सो वसइ, तासु ण विज्जइ भेउ ॥ १०६

जो सिद्धा जो सिज्झहहि, जो सिज्झहि जिण-उत्तु ।
अप्पा दंसण ते वि फुड एहो जाणि णिभंतु ॥ १०७

संसारहँ भय-भीयएँ, जोगिचंद-मुणिएण ।
अप्पा-संबोहण काया, दोहा इक्क-मणेण ॥ १०८

## ॥ वैराग्यप्रेरणम् ॥

पणमवि गुणसायर भुवणदिवायर
जिण चउव(वी)स वि इक्कमणि ।
अप्पुं पडिबोहइ मोह निरोहइ काइ भवभेदणवसण ॥ १

रे जीव ! निसुणि चंचलसहाव, मिल्हेविणु सयल वि बज्झभाव।
नवभेदिय परिग्गहु विविहजालु, संसारि अत्थि इंदिआलु ॥२

पयि पुत्त मित्त घरघरणि जाय, इहलोइय सव्वि वि सुहसहाय।
न बिइ अत्थि कोइ तुह सरणु मुक्ख !,
इक्कुन्ह सहिसि तिरिनरयदुक्ख ॥ ३

अच्छउ ता दूरिण पवरगेहु, नियदेहु वि न हु अप्पणउं एहु ।
इणि कारणि मन करि मूढ ! पाव (वु),
ससि निवडिम होसिइ पच्छ्यावु(?) ॥ ४

मन रच्चि रमणि रमणीय-देहि, वस मंस-रुहिर-मल-मुत्तगेहि।
दढदेविरत्त मालवनरिंदु, गयरज्जपाणु हुअ पुहविचंदु ॥ ५

इक्केण वि आसवि पुरिस मत्तु, अह पडइ झत्ति सिढिलेवि गत्तु।
पंचासवि सत्तउ जुज्झि होइ, तसु का गइ त्ति न मुणउं लोइ ॥६

पंचिंदिय विसय पसंगरेसि, मणु वयणु कायु नवि संवरेसि ।
तं वाहसि कत्तिय गलपएसि,
जं अट्ठ कम्म नवि निज्जरेसु(सि) ॥ ७

अह सत्त नरय तिरि मेरु पंच, अस्संखदीवसायरपवंच ।
बारह नव सग्ग पणुत्तराणि, इहलोयह वित्थरु निउणु जाणि ॥८

चउविह कसायविसहरण मंतु, जिणवयणु सुणइ जे पुन्नवंतु ।
घण पुलइअंगि मणि सद्दहंति, सिवलच्छिवच्छि ते हारु हुंति ॥९

वर हरि करि रह भड सज्जरज्जु,
पाविज्जइ भवि भवि भूरिभज्जु ।
नवि लब्भइ दुल्लह पुण पवित्तु, अरिहंत देव गुरु साहु तत्तु ॥१०

इय बारसभावण सवण सुहावण
भणवि एव जीवहं सरिसु (?) ।
दुलहुउ मणुयत्तणु धम्मपवत्तणु, दस दिट्ठंतिहिं बज्जरिसु ॥११

इह अणाय(इ)म्मि संसारि तमणाइओ,
आसि गोलेसु कम्मेहिं मुच्छाइओ ।
तो अणंताउ कालाउ पावड्ढिओ,
तं निगोयाउ भवियव्वयाकड्ढिओ ॥ १२

पुढविकायाइछक्कायकायट्ठिओ,
णंतकालं च पुण मरवि तत्थ ट्ठिओ ।
तो अकामेण निज्जरियकम्मंसओ,
तंसि कहकहवि उ[प्प]न्नु माणुस्सओ ॥ १३

चुल्लगाईहिं दिट्ठंतदसदुल्लहे, जीव ! संपत्ति मणुयत्तणे वल्लहे ।
जं जि जिणधम्म सामग्गि मुक्खंकरी,
सज्जि तुह जाइ सग्गोवरे मंजरी ॥ १४

पुणवि रे जीव ! सामग्गि एवंविहा,
अन्नजम्मम्मि मन्नामि तुह दुल्लहा ।
ता पमाएण सा कीस विहलिज्जए,
मणुयभवतरुह धम्मप्फलं लिज्जए ॥ १५

दहइ गोसीसुसिरिखंड छारंकए,
छगलगहणट्ठमेरावणं विक्कए ।
कप्पतरु तोडि एरंड सो वावए,
जुज्जि विसएहिं मणुयत्तणं हारए ॥ १६

सुमिणपत्तम्मि रज्जम्मि सो मुच्छए,
सलिलसंकंतु ससि गिन्हिउं वंछए ।
अधिय(?) खित्तेसु धन्नाइं सो कंखए,
जुज्जि धम्मेण विणु सुक्खमाविक्खए ॥ १७

किं तुमंधो सि ? किंवा वि धत्तूरिओ ?,
अहव किं सन्निवाएण आऊरिओ ? ।
अमयसम धम्मु जं विस व अवमन्नसे,
विसयविस[मेव] अमयं व बहु मन्नसे ॥ १८

तिज्जि तुह नाणविन्नाणगुणडंबरा,
जलणजालासु निवडंतु जिय ! निब्भरा ।
पयइवामेसु कामेसु जं रज्झसे,
जेहिं पुण पुणवि नंधानले(?) पच्चिव(च्च)से ॥ १९

असुरसुररमणिभोगेहिं जु न तुट्ठओ,
मणुयविसएहिं किं होसि जिय ! पुट्ठओ ? ।

इत्थ इत्थंमि जिणभणियसिद्धंतओ,
सुणसु इंगालदाहस्स दिट्ठंतओ ॥ २०

जिम तुहं मणुरिद्धिहिं विसयसम(मि)द्धिहिं
तिम जइ धम्मम्मि होइ जीय ।
ता सिवु उक्कंठिओ करयलि सिं(सं)ठिओ
सुरनरसुह अणुसंगि दुअ ॥ २१

सो धन्नओ धन्नओ सालिभद्दु कयवन्नउ अन्नवि थूलभद्दु ।
ते सरह सरह सगराइराय, खयरिंदनरिंदिहिं नमियपाय ॥२२

अप्पेणवि कारणि झत्ति जेहिं, वेरग्गाऊरियमाणसेहिं ।
छंडेविणु घरपुररमणिसत्थु, वउ गिन्हवि साहियपरमअत्थु ॥२३

तं पुण पियपरिभवताडिओ वि, दालिद्दरोगसयपीडिओ वि ।
नो वग्गिसि घट्टिलकुकु(क्कु)रुव्व,
अच्छसि गजसूयरव्व ? ॥ २४

किं लोहइ घडिउं हिउं तुज्झ जं
मुणियइं न तुह वि तणउं (? चित्त तणउं?) गुज्ज ।
जं पत्तइंपि इय मरणाइं दुक्खि,
नो फुट्टइ नवि लक्खेइ मुक्खि ॥ २५

पंचासवि अजिय पइं जि दुक्ख, अणुहवसि ताइं तं चेव तिक्ख।
जिणि जीवकरंबउ खद्ध एव,
स हिंसइ सविलंबउ सययमेव ॥ २६

जं अन्नजम्मि कलुणं रुयंत, पइं मारिउ निग्घिण जंतु हंत ।
ततं रागरोस जर वि हर देहि ...................... ।
(एतावन्मात्रमेव प्राप्तमिदम् ।)

पू.आ.श्री पद्मनन्दिसूरिकृतः

# ॥ आत्मघोषः ॥

(अपरनाम–आत्मबोधः)

यद्यानन्दनिधिं भवन्तममलं तत्त्वं मनो गाहते
त्वन्नामस्मृतिलक्षणो यदि महामन्त्रोऽस्त्यनन्तप्रभः ।
यानं च त्रितयात्मके यदि भवेत् मार्गे भवद्दर्शिते
को लोकेऽत्र सतामभीष्टविषये विघ्नो जिनेश प्रभो ॥ १

निःसङ्गत्वमरागिताथ समता कर्मक्षयो बोधनं
विश्वव्यापि समं दृशा तदतुलानन्देन वीर्येण च
ईदृग्देव तवैव संवृतिपरित्यागाय जात क्रमः
शुद्धस्तेन सदा भवच्चरणयोः सेवा सतां सम्मता ॥ २

यद्येतस्य दृढा मम स्थितिरभूत् त्वत्सेवया निश्चितं
त्रैलोक्येश बलीयसोऽपि हि कुतः संभा(सा)रशत्रोर्भयम् ।
प्राप्तस्यामृतवर्षहर्षजनकं सच्छत्रधारागृहम् ।
पुंसः किं कुरुते शुचौ खरतरो मध्याह्नकालातपः ॥ ३

यः कश्चिन्निपुणो जगत्त्रयगतानर्थानशेषांश्चिरं
सारासारविवेचनैकमनसा मीमांसते निस्तुषम् ।
तस्य त्वं परमेक एव भगवन् सारो ह्यसारं पदं
सर्वं (तत् ?) भवदाश्रितस्य महती तेनाभवन्निर्वृतिः ॥ ४

ज्ञानं दर्शनमप्यशेषविषयं सौख्यं तदात्यन्तिकं
वीर्यं च प्रभुता च निर्मलतरां(रं) रूपं स्वकीयं तव ।
सम्यग्योगदृशा जिनेश्वर चिरात्तेनोपलब्धे त्वयि
ज्ञानं किं न विलोकितं न किमथ प्राप्तं न किं योगिभिः ॥ ५

त्वामेकं त्रिजगत्पतिं परमहं मन्ये जिनस्वामिनं
त्वामेकं प्रणमामि चेतसि दधे सेवे स्तुवे सर्वदा ।
त्वामेकं शरणं गतोऽस्मि बहुना प्रोक्तेन किंचिद् भवेत्
इत्थं तद्भवतु प्रयोजनमतो नान्येन मे केनचित् ॥ ६

पापं कारितवान् यदत्र कृतवानन्यैः कृतैः साध्विति
भ्रान्त्याहं प्रतिपन्नवांश्च मनसा वाचा च कायेन च ।
काले सम्प्रति यच्च भाविनि नवस्थानोद्गतं यत्पुनः
तन्मिथ्याखिलमस्तु मे जिनपते स्वं निन्दतस्ते पुरः ॥ ७

लोकालोकमनन्तपर्ययुतं कालत्रयीगोचरं
त्वं जानासि जिनेन्द्र पश्यतितरां शश्वत्समं सर्वतः ।
स्वामिन् वेत्सि ममैकजन्मजनितं दोषं न किंचित्कुतो
हेतोस्ते पुरतः स वाच्य इति मे शुद्ध्यर्थमालोचितुम् ॥ ८

आश्रित्य व्यवहारमार्गमथवा मूलोत्तराख्यान् गुणान्
साधोर्धारयतो मम स्मृतिपथा प्रस्थापि यद्दूषणम् ।
शुद्ध्यर्थं तदपि प्रभो तव पुरः सज्जोऽहमालोचितुम्
निःशल्यं हृदयं विधेयमजडैः भव्यैर्यतः सर्वथा ॥ ९

सर्वोऽप्यत्र मुहुर्मुहुर्जिनपते लोकैरसंख्यैर्मितः
व्यक्ताव्यक्तविकल्पजालकलितः प्राणी भवेत् संसृतौ ।
तत्तावद्भिरयं मदै(मै)व निचितो दोषैर्विकल्पानुगैः
प्रायश्चित्तमियत् कुतः श्रुतगतं शुद्धिर्भवत्सन्निधेः(धौ) ॥ १०

भावान्तःकरणेन्द्रियाणि विधिवत्संहृत्य बाह्याश्रयान्
एकीकृत्य पुनस्त्वया सह शुचिज्ञानैकसन्मूर्तिना ।

निःसङ्गश्रुतसारसङ्गतमतिः शान्तो रहः प्राप्तवान्
यस्त्वां देव समीकृते स लभते धन्यो भवत्सन्निधिम् ॥ ११

त्वामासाद्य पुराकृतेन महता पुण्येन पूज्यं प्रभुं
ब्रह्माद्यैरपि यत्पदं न सुलभं तल्लभ्यते निश्चितम् ।
अर्हन्नाथ परं करोमि किमहं चेतो भवत्सन्निधौ
अद्यापि ध्रियमाणमप्यतितरामेतद्बहिर्धावति ॥ १२

संसारो बहुदुःखदः सुखपदं निर्वाणमेतत्कृते
त्यक्त्वार्थादितपोवनं वयमितास्तत्रोज्झितः संशयः ।
एतस्मादपि दुष्करव्रतविधेर्वा(र्ना)द्यापि सिद्धिर्यतो
वातालीतरलीकृतं दलमिव भ्राम्यत्यदो मानसम् ॥ १३

झम्पाः कुर्वदितस्ततः परिलसद्बाह्यार्थलाभाद्दह-
न्नित्यं व्याकुलतां परं गतवतः कार्यं विनाप्यात्मनः ।
ग्रामं वासयदैन्द्रियं भवकृतो दूरं सुहृत्कर्मणः
क्षेमं तावदिहास्ति कुत्र यमिनो यावन्मनो जीवति ॥ १४

नूनं मृत्युमुपैति यातममलं त्वां शुद्धबोधात्मकं
स्वतस्तेन बहिर्भवत्यविरतं चेतो विकल्पाकुलम् ।
स्वामिन् किं क्रियतेऽत्र मोहवशतो मृत्योर्न भीः कस्य तत्
सर्वानर्थपरंपराकृदहितो मोहः स मे वार्यताम् ॥ १५

सर्वेषामपि कर्मणामतितरां मोहो बलीयानसौ
धत्ते चञ्चलतां बिभेति च मृतेस्तस्य प्रभावान्मनः ।
नो चेज्जीवति को म्रियेत क इह द्रव्यत्वतः सर्वदा ।
नानात्वं च गतो जिनेन्द्र भवता दृष्टं परं पर्ययैः ॥ १६

वातव्यासमुद्रवारिलहरीसंघातवत्सर्वदा
सर्वत्र क्षणभङ्गुरं जगदिदं सञ्चिन्त्य चेतो मम ।
सम्प्रत्येतदशेषजन्मजनकव्यापारपारस्थितं
स्थातुं वाञ्छति निर्विकारपरमानन्दे त्वयि ब्रह्मणि ॥ १७

एनः स्यादशुभोपयोगत इतः प्राप्नोति दुःखं जनो
धर्मः स्याच्च शुभोपयोगत इतः सौख्यं किमप्याश्रयेत् ।
द्वन्द्वं द्वन्द्वमिदं भवाश्रयतया शुद्धोपयोगात्पुनः
नित्यानन्दपदं तदत्र च भवानर्हन्नहं तत्र च ॥ १८

यन्नान्तर्न बहिः स्थितं न च दिशि स्थूलं न सूक्ष्मं पुमान्
नैव स्त्री न नपुंसकं न गुरुतां प्राप्तं न यल्लाघवम् ।
कर्मस्पर्शशरीरगन्धगणनाव्याहारवर्णोज्झितः
स्वच्छं ज्ञानदृगेकमूर्तिः तदहं ज्योतिः परं नापरम् ॥ १९

एतेनैव चिदुन्नतिं क्षयकृता कार्यं विना वैरिणा
शश्वत्कर्म खलेन तिष्ठति कृतं नाथावयोरन्तरम् ।
एषोऽहं स च ते पुरः परिगतो दुष्टोऽत्र निःसार्यताम्
सद्रक्षेतरनिग्रहो नयवतो धर्मः प्रभोरीदृशः ॥ २०
आधिव्याधिजरामृतिप्रभृतयः सम्बन्धिनो वर्ष्मणः
तद्भिन्नस्य ममात्मनो भगवतः किं कर्तुमीशा जडाः ।
नानाकारविकारकारिण इमे साक्षान्नभोमण्डले
तिष्ठन्तोऽपि न कुर्वते जलमुचस्तत्र स्वरूपान्तरम् ॥ २१

संसारातपदह्यमानवपुषा दुःखं मया स्थीयते
नित्यं नाथ यथा स्थलस्थितिमता मत्से(त्स्ये) न ताम्यन् मनः ।

कारुण्यामृतसङ्गशीतलतरे त्वत्पादपङ्केरुहे
यावद्देव समर्पयामि हृदयं तावत्परं सौख्यवान् ॥ २२

साक्षग्राममिदं मनो भवति यद्बाह्यार्थसम्बन्धभाक्
तत्कर्म प्रतिजृम्भते पृथगहं तस्मात्सदा सर्वथा ।
चैतन्यात्तव तत्तथेति यदि वा तत्रापि तत्कारणं
शुद्धात्मन् मम निश्चयात्पुनरिह त्वय्येव देव ! स्थितिः ॥ २३

किं लोकेन किमाश्रयेण किमुत द्रव्येण कायेन किं
किं वाग्भिः किमुतेन्द्रियैः किमसुभिः किं तैर्विकल्पैरपि ।
सर्वे पुद्गलपर्यया बत परे त्वत्तः प्रमत्तो भवन्
नात्मन्नेभिरभिश्रयस्यतितरामालेन किं बन्धनम् ॥ २४

धर्माधर्मनभांसि काल इति मे नैवाहितं कुर्वते
चत्वारोऽपि सहायतामुपगतास्तिष्ठन्ति गत्यादिषु ।
एकः पुद्गल एव सन्निधिगतो नो कर्म कर्माकृतिः
वैरीबन्धकृदेष सम्प्रति मया भेदासिना खण्डितः ॥ २५

रागद्वेषकृतैर्यथा परिणमेद्रूपान्तरैः पुद्गलो
नाकाशादिचतुष्टयं विरहितं मूर्त्या तथा प्राणिनाम् ।
ताभ्यां कर्म नवं भवेदविरतं तस्मादियं संसृतिः
तस्यां दुःखपरम्परेति विदुषा त्याज्यौ प्रयत्नेन तौ ॥ २६

किं बाह्येषु परेषु वस्तुषु मनः कृत्वा विकल्पान्बहून्
रागद्वेषमयान्मुधैव कुरुषे दुःखाय कर्माशुभम् ।
आनन्दामृतसागरे यदि वसस्यासाद्य शुद्धात्मनि
स्फीतं तत्सुखमेकतामुपगतं त्वं यासि रे निश्चितम् ॥ २७

इत्याधाय हृदि स्थिरं जिन भवत्पादप्रसादात्सति
अध्यात्मैकतुलामयं जन इतः शुद्ध्यर्थमारोहति ।
एनं कर्तुममी च दोषिणमिताः कर्मारयो दुर्धराः
तिष्ठन्ति प्रसभं तदत्र भगवन् मध्यस्थ साक्षी भवान् ॥ २८

द्वैतं संसृतिरेव निश्चयवशादद्वैतमेवामृतं
संक्षेपादुभयत्र कल्पितमिदं पर्यन्तकाष्ठागतम् ।
निर्गत्याद्य पदाच्छनैः शबलितादन्यत्समालम्बते
यत्सो संज्ञ इति स्फुटं व्यवहृतेर्ब्रह्मादिनामेति च ॥ २९

चारित्रं यदभाणि केवलदृशा देव ! त्वया मुक्तये
पुंसा तत्खलु मादृशेन विषमे काले कलौ दुर्धरम् ।
भक्तिर्या समभूदिह त्वयि दृढा पुण्यैः पुरोपार्जितैः
संसारार्णवतारणे जिन ! ततः सैवास्तु पोतो मम ॥ ३०

इन्द्रत्वं च निगोदतां च बहुधा मध्ये तथा योनयः
संसारे भ्रमता चिरं यदखिलाः प्राप्ता मयानन्तशः ।
तन्नापूर्णमिहास्ति किञ्चिदपि मे हित्वा विमुक्तिप्रदां
सम्यग्दर्शनबोधवृत्तपदवीं तां देव पूर्णां कुरु ॥ ३१

श्रीवीरेण मम प्रसन्नमनसा किञ्चित्तदुच्चैः पद-
प्राप्त्यर्थं परमोपदेशवचनं चित्ते समारोपितम् ।
येनास्तामिदमेकभूतलकृतं राज्यं क्षणं ध्वंसि यत्
त्रैलोक्यस्य च तन्न मे प्रियमिह श्रीमज्जिनेन्द्रप्रभो ॥ ३२

सूरेः पङ्कजनन्दिनः कृतिमिमामालोचनामर्हता-
मग्रे यः पठति त्रिसन्ध्यममलश्रद्धानताङ्गो नरः ।
योगीन्द्रैश्चिरकालरूढतपसा यत्नेन यन्मृग्यते
तत्प्राप्नोति परं पदं स मतिमानानन्दसद्म ध्रुवम् ॥ ३३

पू.आ. श्री जिनप्रभसूरिविरचिता

# ॥ परमसुख-द्वात्रिंशिका ॥

धर्माधर्मान्तरं मत्वा जीवाजीवादितत्त्ववित् ।
ज्ञास्यसि त्वं यदाऽऽत्मानं तदा ते परमं सुखम् ॥ १

यदा हिंसां परित्यज्य कृपालुस्त्वं भविष्यसि ।
मैत्र्यादिभावनाभाव्यस्तदा ते परमं सुखम् ॥ २

न भाषसे मृषा भाषां विश्वविश्वासघातिनीम् ।
सत्यं वक्ष्यसि सौहित्यं तदा ते परमं सुखम् ॥ ३

परपीडां परिज्ञाय यदाऽदत्तं न लास्यसि ।
परार्थं हि परार्थाय तदा ते परमं सुखम् ॥ ४

यदा सद्धर्ममथनान्मैथुनात् त्वं विरज्यसि ।
ब्रह्मव्रतरतो नित्यं तदा ते परमं सुखम् ॥ ५

यदाऽमूर्च्छां विधायोच्चैर्धन-धान्यादिवस्तुषु ।
परिग्रहग्रहान्मुक्तस्तदा ते परमं सुखम् ॥ ६

स्वरे श्रव्ये च वीणादौ खरोष्ट्रीणां च दुःश्रवे ।
यदा सममनोवृत्तिस्तदा ते परमं सुखम् ॥ ७

इष्टेऽनिष्टे यदा दृष्टे वस्तुनि न्यस्तशस्तधीः ।
प्रीत्यप्रीतिविमुक्तोऽसि तदा ते परमं सुखम् ॥ ८

घ्राणदेशमनुप्राप्ते यदा गन्धे शुभाशुभे ।
राग-द्वेषौ न चेत् तत्र तदा ते परमं सुखम् ॥ ९

यदा मनोज्ञमाहारं यदा तस्य विलक्षणम् ।
समासाद्य तयोः साम्यं तदा ते परमं सुखम् ॥ १०

सुख–दुःखात्मके स्पर्शे समायाते समो यदा ।
भविष्यसि भवाभावी तदा ते परमं सुखम् ॥ ११

मुक्त्वा क्रोधं विरोधं च सर्वसन्तापकारकम् ।
यदा शमसुधासिक्तस्तदा ते परमं सुखम् ॥ १२

मृदुत्वेनैव मानाद्रिं यदा चूर्णीकरिष्यसि ।
मत्वा तृणमिवात्मानं तदा ते परमं सुखम् ॥ १३

यदा मायामिमां मुक्त्वा परवञ्चकतां पराम् ।
विधास्यस्यार्जवं वर्यं तदा ते परमं सुखम् ॥ १४

यदा निरीहतानावा लोभाम्भोधिं तरिष्यसि ।
सन्तोषपोषपुष्टः सन् तदा ते परमं सुखम् ॥ १५

कषायविषयाक्रान्तं भ्रमत् स्वान्तमनारतम् ।
यदाऽऽत्मारामविश्रान्तं तदा ते परमं सुखम् ॥ १६

यदा गर्वान्वितां व्यर्थां विमुच्य विकथां कथाम् ।
वचोगुप्त्याऽथ गुप्तोऽसि तदा ते परमं सुखम् ॥ १७

अङ्गोपाङ्गानि डिम्भानां कूर्मवत् संवृतेन्द्रियः ।
यदा त्वं कायगुप्तोऽसि तदा ते परमं सुखम् ॥ १८

निर्वास्यसि घनं घोरं रागोरगमहाविषम् ।
यदा सदागमाभ्यासात् तदा ते परमं सुखम् ॥ १९

यदा कृपाकृपाणेन द्वेषं द्वेषं विनाऽपि हि ।
हनिष्यसि सुखान्वेषी तदा ते परमं सुखम् ॥ २०

यदा मोहमयीं निद्रां ध्रुवं विद्रावयिष्यसि ।
अस्ततन्द्रः सदा भद्रस्तदा ते परमं सुखम् ॥ २१

प्रमादं परिहृत्याऽऽशु यदा सद्धर्मकर्मणि ।
समुद्यतोऽसि निश्शङ्कस्तदा ते परमं सुखम् ॥ २२

यदा कामं प्रकामं तु निराकृत्य विवेकतः ।
शुद्धध्यानधनोऽसि त्वं तदा ते परमं सुखम् ॥ २३

यदा मित्रेऽथवाऽमित्रे स्तुति-निन्दां विधातरि ।
समानं मानसं तत्र तदा ते परमं सुखम् ॥ २४

यदा हर्षं विषादं च करिष्यसि कदाऽपि न ।
सुखे दुःखे समायाते तदा ते परमं सुखम् ॥ २५

लाभालाभे सुखे दुःखे जीविते मरणे तथा ।
औदासीन्यं यदा ते स्यात् तदा ते परमं सुखम् ॥ २६

यदा यास्यसि निष्कर्मा साधुधर्मधुरीणताम् ।
निर्वाणपदसंलीनस्तदा ते परमं सुखम् ॥ २७

निर्ममो निरहङ्कारो निराकारं यदा स्वयम् ।
आत्मानं ध्यास्यसि ध्येयं तदा ते परमं सुखम् ॥ २८

निश्शेषदोषमोक्षाय यतिष्यसि यदा सदा ।
परात्मगुणतां यातस्तदा ते परमं सुखम् ॥ २९

पोष्यसे सुगुणग्रामैरात्मानं परमात्मना ।
यदा त्वं तत्स्वरूपः सन् तदा ते परमं सुखम् ॥ ३०

यदाऽऽत्मज्ञानसम्पन्नः परमानन्दनन्दितः ।
पुण्य-पापविनिर्मुक्तस्तदा ते परमं सुखम् ॥ ३१

आत्मपद्मवनं ज्ञानभानुना बोधिं लप्स्यसे ।
यदा जिनप्रभावर्यां तदा ते परमं सुखम् ॥ ३२

पू.मु. श्री सिद्धर्षिगणिविरचितम्

# ॥ उपमितिगतक्षमामाहात्म्यम् ॥

(अनुष्टुप्)

दानशीलतपोज्ञानकुलरूपपराक्रमाः ।
सत्यशौचार्जवा लोभ-वीर्यैश्वर्यादयो गुणाः ॥ १

ये केचित्सुन्दरा लोके, वर्त्तन्ते रत्नरुपिणः ।
क्षान्तिरेव हि सर्वेषां, तेषामाधारतां गता ॥ २

तेनासौ रत्नमञ्जूषा, विद्वद्भिः परिकीर्त्तिता ।
क्षान्तिहीना गुणाः सर्वे, न शोभन्ते निराश्रयाः ॥ ३

क्षान्तिरेव महादानं, क्षान्तिरेव महातपः ।
क्षान्तिरेव महाज्ञानं, क्षान्तिरेव महादमः ॥ ४

क्षान्तिरेव महाशीलं, क्षान्तिरेव महाकुलम् ।
क्षान्तिरेव महावीर्यं, क्षान्तिरेव पराक्रमः ॥ ५

क्षान्तिरेव च सन्तोषः, क्षान्तिरिन्द्रियनिग्रहः ।
क्षान्तिरेव महाशौचं, क्षान्तिरेव महादया ॥ ६

क्षान्तिरेव महारूपं, क्षान्तिरेव महाबलम् ।
क्षान्तिरेव महैश्वर्यं, क्षान्तिर्धैर्यमुदाहृता ॥ ७

क्षान्तिरेव परं ब्रह्म, सत्यं क्षान्तिः प्रकीर्त्तिता ।
क्षान्तिरेव परा मुक्तिः, क्षान्तिः सर्वार्थसाधिका ॥ ८

क्षान्तिरेव जगद्वन्द्या, क्षान्तिरेव जगद्धिता ।
क्षान्तिरेव जगज्ज्येष्ठा, क्षान्तिः कल्याणदायिका ॥ ९

क्षान्तिरेव जगत्पूज्या, क्षान्तिः परममङ्गलम् ।
क्षान्तिरेवौषधं चारु, सर्वव्याधिनिवर्हणम् ॥ १०

क्षान्तिरेवारिनिर्नाशं, चतुरङ्ग-महाबलम् ।
किं चात्र बहुनोक्तेन ? क्षान्तौ सर्वं प्रतिष्ठितम् ॥ ११

न्यायाचार्य - न्यायविशारदमहामहोपाध्याय-
श्रीमद्यशोविजयप्रणीता-

## ॥ षड्दर्शन कल्पलता ॥

ऐन्द्रीं श्रियं नाभिसुतः स दद्यादद्यापि धर्मस्थितिकल्पवल्लिः ।
येनोप्तपूर्वा त्रिजगज्जनानां, नानान्तरानन्दफलानि सूते ॥ १

सदोदयो हृद्गहनस्थितानामपि व्ययं यस्तमसां विधत्ते ।
जयत्यपूर्वो मृगलाञ्छनोऽसौ, श्री शान्तिनाथः शुचिपक्षयुग्मः॥२

चाणूरजिद्दर्पमहासमुद्रव्यालोडनस्वर्गिगिरिबाहुवीर्यः ।
राजीमतीनेत्रचकोरचन्द्रः श्रीनेमिनाथः शिवतातिरस्तु ॥ ३

यः सप्तविश्वाधिपतित्वसूचानूचानभोगीन्द्रफणातपत्रैः ।
विभाति देवेन्द्रकृतांसेवः, श्रीपार्श्वदेवः स शिवाय भूयात् ॥४

आस्वाद्य यद्वाक्यरसं बुधानां, पीयूषपानेऽपि भवेद् घृणैव ।
नमामि तं विश्वजनीनवाचं, वाचंयमेन्द्रं जिनवर्धमानम् ॥ ५

प्रकर्षः प्राह तर्ह्येषां, चिन्तया किं दुरात्मनाम् ।
केवलं दर्शितं वीर्यं, त्वया मोहादिभूभुजाम् ॥ ६

कृदृष्टिजानिर्यस्तूक्तो, मिथ्यादर्शननामकः ।
भवचक्रे न तद्वीर्यं, दर्शितं तत् प्रदर्शय ॥ ७

विमर्शःप्राह तस्यैवाधीनं पुरचतुष्टयम् ।
स्थानानि दर्शयाम्युच्चैस्तद्वशानां विशिष्य ते ॥ ८

दृश्यन्ते मानवावासे, ह्यवान्तरपुराणि षट् ।
यान्यमूनि ध्रुवं तानि, तेषां स्थानानि लक्षय ॥ ९

एकमत्र पुरं तावन्नैयायिकमितीरितम् ।
नैयायिकाश्च गीयन्ते, ते जना येऽत्र संस्थिताः ॥ १०

अन्यद् वैशेषिकं नाम, पुरमत्राभिधीयते ।
जना वैशेषिकास्तेऽमी, येऽस्य मध्ये व्यवस्थिताः ॥ ११

तथा परं बुधैः साङ्ख्यं, पुरमत्र प्रकाशितम् ।
ये चैतदधितिष्ठन्ति, लोकास्ते साङ्ख्यसञ्ज्ञकाः ॥ १२

इहापरं पुनर्बौद्धं, पुरं सङ्गीयते बुधैः ।
प्रसिद्धा बौद्धसञ्ज्ञास्ते, जना मध्येऽस्य ये स्थिताः ॥ १३

मीमांसकाभिधं चान्यत्, पुरं प्राज्ञैः प्रदर्शितम् ।
मीमांसकाश्च गीयन्ते, लोकास्ते येऽत्र संस्थिताः ॥ १४

लोकायतमिति प्रोक्तं, पुरमत्रापरं बुधैः ।
ये वास्तव्या इह ख्याता बार्हस्पत्या ते जनाः ॥ १५

तदेतेषु पुरेषूच्चैर्ये लोकाः परिदर्शिताः ।
ते मिथ्यादर्शनस्याज्ञां, पालयन्ति विशेषतः ॥ १६

विमर्शः प्राह षड् यानि, श्रूयन्ते लोकवार्तया ।
दर्शनानि किमेतानि, तान्युक्तानि त्वया मम ॥ १७

विमर्शः प्राह तान्येव, पञ्च मीमांसकं विना ।
पुराण्येतानि षट्स्वेतन्नेष्टं मीमांसकं पुरम् ॥ १८

जैम(मि)निर्वेदरक्षार्थं, दोषजातोद्दिधीर्षया ।
चकार येन मीमांसां, दृष्ट्वा तीर्थिकविप्लवम् ॥ १९

तस्मादेतानि पञ्चैव, पुरं मीमांसकं विना ।
लोकैर्दर्शनसङ्ख्यायां, गण्यन्ते नात्र संशयः ॥ २०

प्रकर्षः प्राह यद्येवं, ततः षष्ठं क्व वर्तते ।
विमर्शः प्राह यदिदं, विवेकाद्रौ निरीक्ष्यते ॥ २१

अप्रमत्तत्वशिखरं, तुङ्गं तत्र निवेशितम् ।
पुरं यद् विततं षष्ठं, तज्जैनमभिधीयते ॥ २२

अत्र स्थितानां लोकानां, न मिथ्यादर्शनाभिधः ।
बाधकः स्यात् प्रकृत्यैव महामोहमहत्तमः ॥ २३

प्रकर्षः प्राह बाध्यन्ते, यदनेन स्थिता अधः ।
शिखरस्था न बाध्यन्ते, को हेतुस्तत्र मातुल ! ॥ २४

विमर्शः प्राह पुर्यस्ति, महामोहादिभूभुजाम् ।
मुक्तिर्भुक्तेरतिक्रान्ता, निर्द्वन्द्वानन्दशालिनी ॥ २५

सर्वेऽपि गन्तुमिच्छन्ति, तामधः पुरवासिनः ।
मुक्त्वा लोकायतं स्वैः, स्वैर्मिथो मार्गैर्विरोधिभिः ॥ २६

न मुक्तेः प्रापका युक्ताः पन्थानस्ते च कल्पिताः ।
विवेकशिखरस्थैस्तु, दृष्टः पन्थास्तदाप्तिकृत् ॥ २७

त्यक्तमार्गाः कुमार्गं च, संश्रितास्तदधःश्रिताः ।
मिथ्यादर्शनलुप्ताशा, गिरिस्थास्तु न तादृशाः ॥ २८

प्रकर्षः प्राह येऽमीभिर्मुक्तिमार्गाः प्रकल्पिताः ।
प्रत्येकं तानहं श्रोतुमिच्छाम्युत्पन्नकौतुकः ॥ २९

विमर्शः प्राह यद्येवं, समाधाय ततो मनः ।
वक्ष्यमाणान्मया वत्स ! तान् मार्गानवधारय ॥ ३०

तत्त्वज्ञानाद् भवेन्मुक्तिरिति सर्वैर्विनिश्चितम् ।
तानि नैयायिकानां च, प्रमाणादीनि षोडश ॥ ३१

प्रमायाः करणं तत्र, प्रमाणं तच्चतुर्विधम् ।
प्रत्यक्षमनुमानं चोपमानं शाब्दमेव च ॥ ३२

ज्ञानं प्रत्यक्षमक्षार्थयोगजं व्यभिचारि न ।
तत्पूर्वं त्रिविधं प्राहुरनुमानं विशारदाः ॥ ३३

पूर्ववच्छेषवच्चैव, दृष्टं सामान्यतश्च तत् ।
हेतोः कार्यस्य कार्याच्च, हेतोरन्यस्य चान्यतः ॥ ३४

यथा मेघोन्नतेर्वृष्टिर्भविष्यत्यनुमीयते ।
पूरभेदाच्च जाता साऽन्यदिग्प्राप्तेर्गती रवौ ॥ ३५

उपमानं स्मृतं सञ्ज्ञासञ्ज्ञिसम्बन्धसङ्गतिः ।
आप्तोपदेशः शब्दश्च, मानमेतच्चतुर्विधम् ॥ ३६

आत्मदेहेन्द्रियस्वान्तधीदोषार्थप्रवृत्तयः ।
प्रेत्यभावः फलं दुःखं प्रमेयं मुक्तिरेव च ॥ ३७

संशयः कीर्तितं ज्ञानं, विरुद्धोभयकोटिकम् ।
येन प्रयुक्तः पुरुषश्चेष्टते तत् प्रयोजनम् ॥ ३८

दृष्टान्तो निश्चयस्थानं, सिद्धान्तोऽर्थः प्रतिष्ठितः ।
आनुमानिकवाक्यस्य, देशानवयवान् जगुः ॥ ३९

तर्को व्याप्यसमारोपे, व्यापकस्य प्रसञ्जनम् ।
अवधारणरूपं च, ज्ञानं निर्णय उच्यते ॥ ४०

बुभुत्सया कथा वादो, जल्पश्च विजिगीषया ।
स्वपक्षस्थापनाहीना, वितण्डा परिकीर्तिता ॥ ४१

हेत्वाभासा असिद्धाद्याश्छलमाकूतदूषणम् ।
असद्भूतोत्तरं जातिः, सा चोत्कर्षसमादिका ॥ ४२

पराजयस्य हेतुश्च, निग्रहस्थानमिष्यते ।
नैयायिकपदार्थानां, समासोऽयं प्रकीर्तितः ॥ ४३

द्रव्यं गुणस्तथा कर्म, सामान्यं च विशेषयुक् ।
समवायश्च षड् भावा, वैशेषिकनये स्मृताः ॥ ४४

भूरापोऽग्निर्मरुद् व्योम, कालो दिगसुमान्मनः ।
नव द्रव्याण्यमून्याहु र्गुणा रूपं रसस्तथा ॥ ४५

गन्धः स्पर्शश्च सङ्ख्या च, परिमाणं पृथक्त्वयुक् ।
संयोगश्च विभागश्च, परत्वं चापरत्वयुक् ॥ ४६

संस्कारधर्माधर्मेच्छासुखयत्नाकबुद्धयः ।
द्वेषो गुरुत्वद्रवत्वे स्नेहः शब्दस्तथेत्यमी ॥ ४७

उत्क्षेपणं तथाऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं, पञ्च कर्माण्यकीर्तयन् ॥ ४८

सामान्यं द्विविधं प्रोक्तं, परमेकं तथाऽपरम् ।
द्रव्यत्वाद्यपरं व्याप्यं, सत्तादि व्यापकं परम् ॥ ४९

विशेषोऽन्त्यः स्मृतो नित्यद्रव्यव्यावृत्तिकारणम् ।
सम्बन्धोऽयुतसिद्धानां, समवायः प्रकीर्तितः ॥ ५०

द्वे प्रमाणे मते चास्य, प्रत्यक्षं लैङ्गिकं तथा ।
वैशेषिकमतस्यायं, समासार्थः प्रकीर्तितः ॥ ५१

साङ्ख्याः प्राहुः शिवं गच्छेत्, पञ्चविंशतितत्त्ववित् ।
सत्त्वं रजस्तमश्चेति, गुणास्तत्र त्रयः स्मृताः ॥ ५२

प्रसादलाघवाद्वेषासङ्प्रसवसम्पदाः .
सत्त्वकार्याणि सन्तापस्तम्भोद्वेगाविशोषणम् ॥ ५३

अपद्वेषश्च भेदश्च, कार्याणि रजसो जगुः ।
तमः कार्याणि रौद्रत्वं, सादनं दैन्यगौरवे ॥ (यु.) ५४

प्रकृतिः समतावस्था, प्रोक्तैषां स्यात् ततो महान् ।
स गुणाष्टकसम्पन्नबुद्धितत्त्वाभिधो मतः ॥ ५५

अहङ्कारो भवत्यस्मात् स्वप्ने व्याघ्रादिमानकृत् ।
एकादशेन्द्रियाण्यस्मान्मनोधीकर्मभेदतः ॥ ५६

त्वग्जिह्वाघ्राणदृक्श्रोत्राण्याहुर्बुद्धीन्द्रियाणि वै ।
वाक्पाणिपायूपस्थांह्वीन्, पञ्च कर्मेन्द्रियाणि च ॥ ५७

स्पर्शो रसश्च रूपं च, गन्धः शब्दस्तथाऽत्यणुः ।
स्युस्तन्मात्राणि पञ्चैव, तत एव तमोघनात् ॥ ५८

तेभ्यश्च पञ्च भूतानि, प्रपञ्चः प्राकृतो ह्ययम् ।
चतुर्विंशतितत्त्वात्मा, पुमानन्यो निरञ्जनः ॥ ५९

भोगार्थं प्रकृतेः पुंसा, योगं पङ्ग्वन्धयोरिव ।
विनोपमानं त्रीण्येव, प्रमाणानि च ते जगुः ॥ ६०

साङ्ख्यदर्शनसङ्क्षेपः, प्रोक्तोऽयमथ वर्ण्यते ।
बौद्धानां दर्शनं प्रोचुर्द्वादशायतनानि ते ॥ ६१

पञ्चेद्रियाणि शब्दाद्याः, पञ्च स्वान्तं सुखादयः ।
धर्माश्चेति प्रमाणे द्वे, प्रत्यक्षं लैङ्गिकं तथा ॥ ६२

वैभाषिक-सौत्रान्तिक-योगाचाराश्च माध्यमिकनामा ।
बौद्धाश्चतुर्विधाः स्युः प्राहुर्वैभाषिकास्तत्र ॥ ६३

क्षणिकं हि वस्तु जातिर्जनयति तत्स्थापिका स्थितिर्भवति ।
जर्जरयति च जरा, तन्नाशो नाशयति पुद्गलकम् ॥ ६४

विज्ञानरूपसञ्ज्ञा, संस्कारो वेदनेति चाभिमताः ।
परलोकगामिनो हि, स्कन्धाः सौत्रान्तिकैर्नात्मा ॥ ६५

क्षणिकः संस्कारगणः स्वलक्षणं पारमार्थिकं तेषाम् ।
शब्दार्थोऽन्यापोहो, मोक्षः सन्तानविच्छेदः ॥ ६६

योगाचारमते खलु, भुवनं विज्ञानविलसितं सर्वम् ।
बाह्योऽर्थः सांवृतिकः, प्रकाशते वासनाजालात् ॥ ६७

नीलादिवासनागृहमालयविज्ञानमभिमतं तैश्च ।
तत्संशुद्धिर्मुक्तिः, प्रवृत्तिविज्ञानततिरूपा ॥ ६८

माध्यमिकमते सर्वं, स्वप्नाभं मानमेयधीर्मिथ्या ।
शून्यत्वदशा मुक्तिस्तदर्थमेवाखिलोऽभ्यासः ॥ ६९

लोकायतैः पुनर्मुक्तिनगरी न गरीयसी ।
मन्यते पुण्यपापादेरभावं ते हे मेनिरे ॥ ७०

मानं प्रत्यक्षमेवैषां, तत्त्वं भूतचतुष्टयम् ।
विषयेन्द्रियदेहाख्या, समुदायेऽस्य जायते ॥ ७१

चैतन्यं जायते तेभ्यो, मद्याङ्गेभ्यो मदो यथा ।
जलबुद्बुदवज्जीवाः, पुमर्थो न स्मराद् ऋते ॥ ७२

दृष्टहान्यप्रदृष्टार्थकल्पनादोषसम्भवात् ।
न भूतेभ्यः परं तत्त्वमिति लोकायतस्थितिः ॥ ७३

मीमांसकाः पुनः प्राहुर्वेदपाठादनन्तरम् ।
कर्तव्या धर्मजिज्ञासा, तन्निमित्तं च चोदना ॥ ७४

सा च प्रवर्तकं वाक्यं, धर्मस्तेनैव लक्ष्यते ।
अभावाद् वक्तृदोषाणां, तत्प्रामाण्यं हि निश्चलम् ॥ ७५

प्रत्यक्षमनुमानं चोपमानं शब्द एव च ।
अर्थापत्तिरभावश्च, षट् प्रामाणानि जैम[मि]नेः । ॥ ७६

अप्रमत्तत्वशिखरे, विवेकाद्रेः स्थिता अमी ।
जैनास्तु वत्स ! मन्यन्ते, मुक्तिमार्गमिमं शुभम् ॥ ७७

जीवाजीवाश्रवा बन्धः, संवरो निर्जरा तथा ।
मोक्षश्च सप्त तत्त्वानि, ज्ञेयानि हितमिच्छता ॥ ७८

ज्ञानमेतत् तथा श्रद्धा, सङ्गत्यागश्च सर्वथा ।
त्रयं मोक्षपथो ह्येष, सिद्धिर्नैकतरात्यये ॥ ७९

नास्मिन् विधिनिषेधानां, विरोधो जैनदर्शने ।
शुद्धं ह्येतत् कषच्छेदतापलक्षणकोटिभिः ॥ ८०

अनन्तपर्ययोपेतं, प्रमेयं द्रव्यमिष्यते ।
सत्ता तल्लक्षणं सा चोत्पादध्रौव्यव्ययात्मिका ॥ ८१

प्रत्यक्षं च परोक्षं च, द्वे प्रमाणे जिनागमे ।
दिगियं दुस्तरो ह्यत्र, प्रमाणनयविस्तरः ॥ ८२

चत्वारो वादिनोऽत्राद्यास्तत्त्वतो मुक्त्यवेदिनः ।
आत्मानं ते यदिच्छन्ति, नित्यं वा सर्वथा क्षयि ॥ ८३

न च नित्यैकरूपस्य, सर्वगत्वेन युज्यते ।
आत्मनो गमनं मुक्तौ, नष्टत्वान्नश्वरस्य च ॥ ८४

तस्मात् तपस्विनो ह्येते, मुक्तिमार्गं न जानते ।
मोक्षो लोकायतानां तु नीविमोक्षो हि योषिताम् ॥ ८५

अतिदुष्टाशयकरं, क्लिष्टसत्त्वविचिन्तितम् ।
पापश्रुतं सदा धीरैर्वर्ज्यं नास्तिकदर्शनम् ॥ ८६

ये सर्वज्ञं निराकृत्य, वेदप्रामाण्यमास्थिताः ।
निर्वृतिस्तत्त्वतोऽभीष्टा, न तैर्मीमांसकैरपि ॥ ८७

भूमिष्ठास्तदिमे सर्वे, न मुक्तिपथदर्शिनः ।
अप्रमत्तत्वशिखरस्थितास्तद्दर्शिनो जनाः ॥ ८८

तन्मिथ्यादर्शनग्रस्ता भवचक्रस्थिता जनाः ।
तादृशा नाद्रिसानुस्था, निःस्पृहा धूतकल्मषाः ॥ ८९

प्रकर्षः प्राह तदिदं, भवचक्रस्य दर्शनम् ।
महाहास्यकरं सिद्धं, नात्रास्मद्वाञ्छितं किल ॥ ९०

(वैराग्यकल्पलतायां श्लोकाः ११४४ तः १२२८ स्त.५)

(वैराग्यरतौ श्लोकाः११३७ तः १२२१ स्त. ४)

## ॥ धर्मस्वरूप-दर्शनम् ॥

(अनुष्टुप्)

धर्मरत्नं भवपुरे, चतुर्गतिचतुष्पथे ।
स्वर्णहट्टं नृजन्माऽऽप्य, सद्द्रव्यैरेव लभ्यते ॥ १

तत्प्रायः सुलभं येन, भवन्ति विपुलाः श्रियः ।
दुर्लभं तत्पुनर्भाग्यं, येन धर्मे मतिर्भवेत् ॥ २

मालास्वप्नेक्षणमिदं, सुप्तानां मोहनिद्रया ।
धर्मशून्यमधीतादि तत्रोत्स्वप्नायितं पुनः ॥ ३

अघाटमपि कल्याणं, सुघटादपि कूटतः ।
यथा प्रशस्यते तद्वद्, मुग्धोऽपि सुकृती नरः ॥ ४

असावनक्षरो लेखो, निर्देवं देवमन्दिरम् ।
निर्जलं च सरो धर्मं, विना यान्मानुषो भवः ॥ ५

धनैश्वर्याऽभिमानेन, प्रमादमदमोहिताः ।
दुर्लभं प्राप्य मानुष्यं, हारयध्वं मुधैव मा ॥ ६

छिन्नमूलो यथा वृक्षो, गतशीर्षो यथा भटः ।
धर्महीनो धनी तद्वत्, कियत्कालं ललिष्यति ॥ ७

धराऽन्तःस्थं तरोर्मूलमुच्छ्रयेणाऽनुमीयते ।
अदृष्टोऽपि तथा प्राच्यधर्मो लक्षेत सम्पदा ॥ ८

मूलभूतमतो धर्मं सिक्त्वा भोगफलं बुधाः ।
गृह्णन्ति बहुशो मूढास्तमुच्छिद्यैकदा पुनः ॥ ९

आस्तां सिद्धिगतं सौख्यं, मनोऽभीष्टं यदैहिकम् ।
जनास्तदपि धर्माख्यवृक्षस्य कुसुमोपमम् ॥ १०

कुलं गतमलं कामाऽनुरूपं रूपमव्यथम् ।
विश्वभोग्यं च सौभाग्यं, श्रीविलासो विकस्वरः ॥ ११

अनवद्या पुनर्विद्या, कीर्त्तिः स्फूर्तिमती सती ।
अभिरामो गुणग्रामः, सर्वं धर्मादवाप्यते ॥ (युग्मम्) १२

यद्यपि ज्वरितस्याऽर्त्तिर्जन्तोर्जनयते जलम् ।
तथाऽप्युष्णीकृतं तस्य, मुख्यपथं तदेव हि ॥ १३

तथा प्राक्कर्मदोषेण, पीड्यमानस्य यद्यपि ।
धर्मो न रतये कार्यो, नीरसोऽपि तथाऽप्यसौ ॥ १४

अतो धर्मं न मुञ्चन्ति, कथञ्चन विचक्षणाः ।
विपद्यऽपि गता बाढम्, मुच्यते किमु सम्पदि ? ॥ १५

## ॥ चतुर्विधधर्मस्वरूपम् ॥

दानशीलतपोभावरूपो धर्मश्चतुर्विधः ।
भृशं प्रासावकाशोऽभूदेष्यति ज्येष्ठपर्व्वणि ॥ १

अर्थमुक्तोऽपि दातॄणां करो गुरुतरो भवेत् ।
तत्पूर्णोऽपि पुनर्लातुर्लघुरेवेति मे मतिः ॥ २

दानं दौर्गत्यनाशाय दानं दुरितदारकम् ।
आशाकल्पद्रुमो दानं प्रियं त्रिजगतोऽपि तत् ॥ ३

दानेन शासनौन्नत्यं यादृशा तादृशेन वा ।
तस्माद्दीक्षाक्षणारम्भे तद्व्यापारि जनैरपि ॥ ४

पश्य दानस्य सौभाग्यं वस्तुपालादयो यतः ।
जीवन्त इव मन्यन्ते यदुत्थयशसश्छलात् ॥ ५

अहो ! दानसमं नास्ति जगत्त्रितयमोहनम् ।
यस्माद्दुष्टोऽपि तुष्टः स्यात्तथा शत्रुः सुहृद्यते ॥ ६

दान इत्यक्षरद्वन्द्वं विभज्य जगृहे जनैः ।
उदारैरादिमो वर्णः स्पर्द्धयेवापरैः परः ॥ ७

राजानो दुर्जना मातापितरो गुरुबान्धवाः ।
स्निह्यन्ते के न दानेन ? चिरं विमुखिता अपि ॥ ८

तथा–

कष्टानुष्ठानकर्त्तारो भूयासं सन्ति पूरुषाः ।
केऽपि ते विरला एव शीलशुभ्राः सदैव ये ॥ ९

कलिदुर्वातपातेन कथञ्चिद्विधुरा अपि ।
शीलबोहित्थमास्थाय भव्यास्तीर्णा भवार्णवम् ॥ १०

न त्रातारो न दातारो योगिनो न न भोगिनः ।
शीलपालकलोकानामर्घन्त्येकां कलामपि ॥ ११

अन्तरङ्गद्विषद्व्यूहं गलहस्तकदायकम् ।
तपः सुसाधुभिस्तप्तं निर्ज्जराङ्गमकृत्रिमम् ॥ १२

विषमाण्यपि कर्माणि दुश्चीर्णानि कथंचन ।
तपस्तपनयोगेन क्षयं यान्त्यन्धकारवत् ॥ १३

प्रत्यूहव्यूहतो नाम लोको यद्येष शङ्कते ।
नादधीत कथं कारं तपस्तद्ध्वंसमांसलम् ॥ १४

यदगम्यं यद्दुरापं दुःश्रद्धेयं च यद्भुवि ।
तदायासविनाभूता लभन्ते तपसा प्रियम् ॥ १५

दुष्कर्ममलसंस्पृष्टस्तावदात्मा न शुद्ध्यति ।
तपोऽग्निना स्वर्णमिव न यावज्जातु तप्यते ॥ १६

यक्षरक्षःफणिव्याघ्रा न तानाक्रमितुं क्षमाः ।
सिद्धमन्त्रोपमे येषां तपस्यास्था सनातनी ॥ १७

तथा–

नरके नारकाः सन्ति सहन्ते दुःखमेव च ।
न तेषां भावना शुद्धा तस्माल्लाभो न किंचन ॥ १८

पुण्डरीकादिभिस्तैस्तैः श्रेष्ठैकाहव्रतादपि ।
कर्मग्रन्थिस्त्रोटितो यद्भावना तत्र कारणम् ॥ १९

सुचिरादविवेकोऽपि कृताज्ञानतपा अपि ।
भावनातो नरः शुद्ध्येत् तामलीवामलाशयः ॥ २०

दानं शीलं तपस्तुण्डमुण्डनादि सुबह्वपि ।
अफलं स्नु हि शाखीव यद्येका नहि भावना ॥ २१

अहो ! भावस्य भव्यत्वं विरत्यां विगताग्रहः ।
आर्जिजत्तीर्थकृल्लक्ष्मीं श्रेणिकः पृथिवीमिव ॥ २२

दानं दुरितनाशाय शीलं सौभाग्यवर्द्धकम् ।
तपः पङ्कविशोषाय भावना भवनाशिनी ॥ २३

पूर्वाचार्यप्रणीतानि

## ॥ नरकवर्णनवृत्तानि ॥

(स्रग्धरा)

श्वभ्रे स्वभ्रान्तिदोषात् क्रकचखरमुखैरानखाग्रं शिखाग्रा-
दत्राणं दार्यमाणं व्यपगतकरुणैर्दारुणैर्दारुदारम् ।
किं त्वां सम्फुल्लमल्लीमुकुलपरिमलालोलरोलम्बमाला
तत्र त्रस्तैणनेत्रा प्रवरकबरिका त्रासतस्त्रातुमीष्टे ? ॥ १

वेल्लद्वावल्लभल्लीनिशितशरशताकारधाराललोलत्-
पत्रव्रातप्रपातत्रुटदखिलतनोर्नारकीयेऽसिपत्रे ।
कन्दर्पोत्फालबालाकमलदललुलन्नेत्रपत्रत्रिभागे
क्षिप्ता लीलाकटाक्षाः कटरि बठर ! रे रक्षणाय क्षमास्ते ? ॥२

तुद्यज्जिह्वाग्रजाग्रद्रुदितमतितरामुग्रसन्दंशकाग्रो-
दी(द्दी)र्घा(र्णा)स्यं पास्यमानः शठ ! नरकमठैस्तीव्रतप्तं त्रपुस्तैः।
रङ्गन्नारङ्गरङ्गस्फुरदधरसुधामाधुरीबन्धुराणां
ध्यायेस्त्वं तां वधूनां विधुरविधुतये मुग्ध ! रे बन्धकीं स्वाम् ॥३

आशापाशावनद्धव्यपघृणपरमाधार्मिकैः कुट्यमान-
स्यासक्तं मुक्तकण्ठं नरकनिपतितस्योग्रमाक्रन्दतस्ते ।

व्यालोलत्कङ्कणालीतरुणरणझणारावधावद्विलासा
दोःपाशा बालिशानां प्रथम(कथय?)
किमु विमोक्षाय मुग्धेक्षणानाम् ? ॥ ४

ज्वालामालाजटालान्तरनरकधरापाककुम्भीषु भीमै-
र्निक्षिप्तस्योर्ध्वपादं विधुरतरमधोमूर्ध(?) निर्धर्मधुर्यैः ।
प्रोत्तुङ्गपीनपाण्डुस्तनकलशलसत्तारहारालिमाला
तत्र त्राणाय बाला न खलु तव सखे ! मूर्ख ! सम्भावयामि ॥५

स्फाराङ्गारान्तरालेष्वलवधगधगत्सन्धिगर्भेष्वरे ते
सोत्साहे देहदाहे निरयपुरतटीवज्रकुण्डेषु तेषु ।
सेयं शृङ्गारकुल्यालहरिपरिलसन्नीलरोमाङ्कुराली
नालं लीलावतीनां डमरभरभिदे नाभिवापी गभीरा ॥ ६

अङ्गारद्वालुकायां पुलिनभुवि गलत्पादपार्ष्णि प्रकामा-
कारुण्याद् वैतरुण्यं(रण्या) मृदुगति नरकस्वामिषु भ्रामयत्सु ।
स्पृष्टं स्पष्टं चर्ये (त्वये?)ष्टं किमु भवति पुरा शोषमाणिक्यमाला-
प्रेङ्खोलन्मेखलाङ्कं जघनमतिघनं तत् तरुण्याः शरण्यम् ? ॥ ७

उन्मीलन्मूलशूलापटलजटिलतां शाल्मलीं जाल्म ! लीढा-
ङ्गां नामालिङ्गतस्ते नरकपतिपरीहासवैवश्यभाजः ।
वामोरूणामुरूरू विदलितकदलीकाण्डचण्डावलेपौ
चित्तान्तः स्तानि(स्वाति?)
शान्तिव्यतिकरचतुरौ तौ न दुश्चारिणस्ते ॥ ८

हा मातस्तात ! हा हा हृदय ! सुदयिते ! हा सुता ! भ्रातरो ! हा
हंहो मित्राण्यथैवं नरकभुवि मुहुस्तारमाक्रन्दतस्ते ।
मुग्धाः स्निग्धा विदग्धा मधुरमधुमुचो हावभावोर्मिफुल्ला
उल्लापाः पाप ! तापक्षपणसुखकरा योषितां किं भवेयुः ? ॥९

पू. उपाध्यायश्री संवेगसुन्दरगणिविरचिता

## ॥ शीलोदाहृतिकल्पवल्ली ॥

स्तुत्वा वाचमनेकशास्त्रलहरीगङ्गोपमां तीर्थकृद् -
वक्त्रावासनिवासिनीं भगवतीं प्रोद्यत्प्रभावाञ्चिताम् ।
प्राप्य श्रीस्वगुरोः पदाम्बुजभवां स्फोर(?ट?)प्रपत्तिं परां
शीलोदाहृतिकल्पवल्लिमतुलां कुर्वे सतां तुष्टये ॥ १

जितो येनाऽरातिर्भुवनविदितः सम्बररिपु-
र्महारागाहिर्यं व्यथयितुमलं न स्म भवति ।
शिशुत्वादारभ्य प्रचुरशमसङ्गैकरसिकः
स शैवेयो देवोऽवतु जिनपतिः प्रौढमहिमा ॥ २

सुसंस्थानादानातिशयनिधयः सत्तमधियः
सदा भव्या दिव्याऽमलगुणगणानामवधयः ।
सुरा यो(ये)दीर्घायुस्कलितवपुषः सत्सुखजुषो
नराः शीलाल्लीलाललितगतयः स्युः सुगतयः ॥ ३

अथ वसन्ततिलकाच्छन्दसा द्वे वृत्ते -

तं नो जहाति विपुला कमला कदाचित्
कान्तं कुलोत्थवनितेव विवेकभाजम् ।

तं स्वीकरोति सुगतिर्निपुणं यथाधी-
र्योऽजस्रमाश्रयति शीलगुणं प्रथिष्टम् ॥ ४

शीलं सुधाकरकराऽमलमादरेण
ये पालयन्ति भविका रसिकाः सुधर्मे ।
तेषामशेषसुखसन्ततिरङ्गमुच्चै-
र्न श्रीरिव त्यजति सद्म विवेकभाजाम् ॥ ५

वासोऽस्वप्ननिकेतने नरजनुश्चाचारशुद्धं कुलं
पद्मा सद्मनि नीरजन्मनि यथा केलिं विधत्ते त्वलम् ।
माधुर्यामृतजित्वरं च वचनं नीरोगमङ्गं च यत्
तत् शीलाऽमरशाखिनः फलमिदं जानन्तु भो भूस्पृशः ॥ ६

पापध्वान्तनिराकृताविह रविर्यद् वै सुधादीधितिः
कल्याणावलिकैरवाकरसमुल्लासप्रदाने च यत् ।
यद्वाऽनेकमनोऽभिवाञ्छितसुखापूर्तौ सुरानोकुह-
स्तन्नित्यं परिपालनीयमकलं शीलं सतां मण्डनम् ॥ ७

यः शीलमङ्गीकुरुते स धन्यो
निजं स एवात्र जनुः पुनीते ।
सौभाग्यभाग्याभ्युदयैर्विशिष्टां
स एव लोके लभते प्रतिष्ठाम् ॥ इन्द्रवज्रेयम् ८

कर्मानोकुहपङ्क्तिकृन्तनविधौ यत् तीक्ष्णपर्शूपमं
यच्चानेकभवौघसञ्चिततमोध्वान्तांशुमन्मण्डलम् ।
यच्च प्रौढकषायतापशमनश्वेताश्वबिम्बं परं
तत् शीलं विमलीकरोति नहि कं सम्पालितं यत्नतः ॥ ९

व्यावलात्तु(?)रगद्विपादिका(क)बलोन्मत्ता अपि क्षोणिपा-
स्तस्मै मानमनिन्दिताय ददते शीलेष्टदेवो हि यः ।
प्रोत्सर्पद्विषवेगदर्पकलिताः प्रौढाः पुनः पन्नगा-
स्तं नैवात्र तुदन्ति यस्य सततं शीलामृतं सन्निधौ ॥ १०

देवः श्लाध्यतमः स एव सुगुरुर्धर्मः स एवाऽनघो
वंशः सोऽमलतामितो व्रतमलं सद्भिः प्रशस्यं हि तत् ।
तज्ज्ञानं मतिरत्र सा च विमला तद्दर्शनं तत्तपो
यच्चाऽन्यद् वरशीलसंयुतमहो ! तद्धि प्रमाणं जने ॥ ११

वदनकुहुरनिर्यद्वह्नयोऽप्रत्नभीति-
प्रदनयननिवेशा भीषणाकारनासाः ।
व्यथयितुमसमर्था एव तं यातुधाना
यदुरसि शुचिशीलाख्यौषधी सुप्रधाना ॥ १२

तावन्नुः प्रसरीसरि(री)ति सुयशः सच्चन्दनामोदवत्
तावत् श्रीश्चरिकर्ति चात्र चरटेवाऽब्जेऽङ्कके खेलनम् ।
लोकाग्रे नरिनर्ति तावदपि गी रङ्गे यथा नर्तकी
यावत् शीलमिदं सुमित्रवदलं नो सन्निधिं सन्त्यजेत् ॥ १३

शीलं स्वर्गधुनीसमुत्थजलवद् विश्वं पुनीतेऽमलं
शीलं पापमपाकरोति निबिडं तापं यथा चन्दनम् ।
शीलं सर्वमलङ्करोति नियतं वर्ष्मेव सन्मण्डनं
शीलं कामितमातनोति सुतरामर्घ्यं द्युसद्रत्नवत् ॥ १४

निर्मर्यादविवादसादनिधनाद्यानेकदुःखप्रदं
वैरातङ्ककलङ्किताप्रभृतिकानर्थाय यत् केवलम् ।

तत् सन्त्यज्य कुशीलमुत्तमजनाः ! शीलं श्रयध्वं सदा
यद्ध्यानादपि निर्वृतेः सुखमलं हस्त (स्थ?)वल्लभ्यते ॥ १५

यत्(यः)शीलं न जहाति तद्धन इव प्राप्तं प्रयत्नाद्धनं
शीलं पुष्यति यस्तु निर्वृतिकरं बीजी यथाऽपत्यकम् (?) ।
शीलं यः स्ववशीकरोति निजकं त्वध्यात्मविद्वन्मनः
स स्तुत्यः सुधियां भवेद् यदि जगत्यत्राऽद्भुतं किं तदा ? ॥१६

यद् दुःपालमनुत्तराद् व्रतगणाद् यद्दानतो दुष्करं
यत्तूग्रात् तपसोऽधिकं यदपि च स्वर्णाचलादुन्नतम् ।
आदर्शप्रतिबिम्बितादपि हि यद् दुर्ग्राह्यमाकारत-
स्तत् शीलं परिपालयेद्धि विरलः कश्चिद् भवेऽत्राङ्गवान् ॥१७

ये शीलं प्रविहाय सौख्यसदनं संसाररोगाऽगदं
कृष्णव्यालकरालभोगविषमं वाञ्छन्ति भोगं भवे ।
मन्ये ते सुरपादपं प्रवितरन्निःशेषकामं परं
हित्वा निन्द्यगराश्रयं हि कनकाभिख्यं भजन्ते द्रुमम् ॥ १८

ये शीले हिमवालुकाकुमुदिनी कन्दप्रभाजित्वरे
लीनास्ते किमसारसंसृतिभवे सौख्ये रताः स्युः पुनः ।
गाङ्गे वारिणि हारिणि प्रतिदिनं ये मज्जनं कुर्वते
ते किं कुत्सितकर्दमाकुलकुशे बध्नन्ति चेतोरतिम् ? ॥ १९

ते दूरं लिहतेऽप्यशेय(ष?)विषमामाः शीलतोयऽन्वहं (?)
प्रौढैरप्युपचारतन्त्रकुशलैः साध्यानवैद्यैरहो ! ।
शीलाच्चोत्कटशत्रवः समधिकं वैरानुबन्धोद्यता
नश्यन्त्याशु तमोभरा इव रवेर्धर्मा इवाऽम्भोदतः ॥ २०

क्षाराब्धेः क्षीरनीरं सकि(क ?)लवनहुताशात् पुनस्तोयवर्षं
कल्याणं पीतलोहाल्ललितगतिविलासं नितान्तं बकोटात् ।
पावित्र्यं पङ्कतोऽहेर्लपनकुहुरतः पुण्यपीयूषयूषं
प्रेयः श्रेयः कुशीलादनवरतममन्दं समीहेत यो वै ॥ २१

ये कुर्वन्ति सुराद्युपासनविधिं तेषां सुखं चैहिकं
ये भूपावलिसेवनैककुशलास्ते शं लभन्ते नवा ।
ये रायं समुपार्जयन्ति च ततः सौख्यं न तेषां चिरं
शीलादत्र परत्र चापि सुखिनः सर्वेऽङ्गिनः स्युः सदा ॥ २२

तादृग् ना(नो)भावतंसैरविरलविलसद्रत्नरोचिर्विचित्रै-
र्नो तादृक् कुण्डलैर्वा कनकसुघटितैर्हारिहारैर्न तादृक् ।
केयूराद्यैरशेषैरपि बहुरचितैर्मण्डनैर्नैव तादृक्
शीलालङ्कारकेणात्र भवति भविनां यादृशी सा समन्तात् ॥२३

ख्याता सा जडसङ्गिनी सुमनसां सेवालिनी सर्वतः
सोऽप्येवामृतदीधितिर्निगदितो लोकैः कलङ्कीति वै ।
क्रूरैश्चन्दनभूरुहालिरपि साऽप्रत्नद्विजिह्वैर्वृता
तत् किं वस्तु जगत्यनुत्तरमहो ! यत् शीलतुल्यं भवेत् ? ॥२४

नो तत्राऽऽमयसञ्चया न कुनयास्तिष्ठन्ति नैवाऽऽधयो-
नाऽपि ध्वान्तचयोपमान्यपयशोमुख्यानि दुःखान्यहो ! ।
शीले देहिनमाश्रितेऽद्भूतसुखाधारे सुधाभेऽधिकं
किं तार्क्ष्ये वसति स्थितिं विदधते प्रोत्सर्पिदर्पाहयः ? ॥ २५

दौर्गन्ध्यं नहि चन्दनेन सममंशौ(शो)स्तेजसा दुस्तमः
सौजन्येन (च) दुर्जनत्वमपि नो वैज्ञ्य(ज्ञ्येन) मौढ्यं यथा ।

दैन्यं तूत्तमपुण्यजेन धरणीपालादिमानेन नो
कौशील्यं कलुषेतरेण हि यथा शीलेन नो सम्मिलेत् ॥ २६

वृत्तं नीरसमस्तवारि तु सरो भोज्यं निराज्यं पुनः
निःपुण्यं जननं निरंहतिधनं वै निर्विचारं वचः ।
निर्नाथं सदनं निरक्षि वदनं निर्हेलि यद्वन्नभ-
स्तद्वत् शीलविवर्जितं नहि विबभात्यङ्गिनामङ्गकम् ॥ २७

दौःशील्यान्न मतिः शुभेषु सुगतिर्नो नैव तत्त्वे रति-
र्नैवाऽथाऽपरतिर्न चाऽपि विरतिर्लौल्यान्न तृष्णाक्षितिः ।
न श्लोकोन्नतिरुत्तरायतिरपि श्रेयो न सत्सन्ततिः ।
किं कुत्राऽपि सुखं श्रुतं विषफलास्वादाद् बत प्राणिनाम् ? ॥२८

कर्पूरे हिमदीधितौ हलधरे हारे हरे सिन्धुरे
सौरे चापि हये तुषारनिचय(ये) गौरीगुरौ शौक्तिके ।
गाङ्गे चाऽम्भसि चन्दने त्वुडुगणे कुन्दे च डिण्डीरके
दीप्तिं ह्येषु दधाति सन्ततमहो ! शीलस्य धर्तुर्यशः ॥ २९

उग्रव्याघ्राकुरङ्गन्त्यतिविकटकरट्युत्करा वै तुरङ्ग-
न्त्यौद्धत्यैकाग्रचिता निखिलखलजनाः सज्जनन्त्येव विष्वक् ।
अद्रीन्द्रा ग्रावखण्डन्त्यलघुजलधयो गोष्पदन्त्यग्नयोऽपि
स्वैरं नीरन्ति शीलातिशयपरिणतेः प्राणभाजामजस्रम् ॥ ३०

ग्रावा लेखमणिः सुधाशनतरुः काष्ठं पशुः कामधुक्
सिन्धुश्चाऽपि जडात्मकः सरसिजं पङ्कोद्भवं श्रीश्चला ।
किट्टं धातुषु पुष्पजातिषु परिम्लानिर्विचाराऽसहं
सर्वं वस्त्विति चैकमेव विशदं शीलं वयं मन्महे ॥ ३१

स स्तुत्यः स च माननीयवचनः सोऽनेकलब्ध्यास्पदं
सोऽर्हत्शासनकज्जलध्वजसमः सोऽनिन्द्यविद्यानिधिः ।
सोऽगण्यामलसद्गुणैकजलधिः सोऽवाप्तधीशेवधि-
र्यः श्वेताम्बुजमध्यगां भगवतीं शीलाख्यलक्ष्मीं स्मरेत् ॥ ३२

उद्यच्चण्डमरीचिमण्डलरुचिप्रोद्दण्डपिण्डाधरी-
कारैकक्षमसर्वविश्वविलसत्प्रौढप्रतापाञ्चितम् ।
यल्लोकेऽत्र सुमाहिनं चिरतरं ह्यासाद्यते सम्पदा
साकं तत् खलु शीलकल्पतरुजं जानीत दिव्यं फलम् ॥ ३३

पाति प्रौढकषायवायुविचलन्नक्रेऽघकल्लोलके
संसाराम्बुनिधौ पतज्जनभरान् यद् यानपात्रं यथा ।
यत् कैवल्यपुराऽध्वदर्शनविधौ सार्थोपमेयं च सत्
तत् शीलं परिहृत्य को नु विभवी दुःशीलतामाश्रयेत् ? ॥३४

ध्यायन्त्वादृतमानसाः सुमनसस्तं शीलमन्त्रं परं
यस्मान्नश्यति दुष्टदुर्जनकृतक्षुद्रप्रयोगादिकम् ।
यस्मात् तानि भवन्ति यानि सुखमाशालीनि सौख्यानि वै
सिद्ध्याख्या वनिता स्वयं च वशगा यस्मात् समृद्ध्या समम्॥३५

यः शैलोपमसामयोनिजयनप्रख्यातिमाप्तः क्षितौ
यः पञ्चाननदर्पपाटनपटुत्वेनाऽपि शोभामितः ।
यो वा वाजिगजादिसङ्कुलरणक्षोणीविजेताऽधिकं
सोऽपीह व्रतराजिमुख्यमतुलं शीलं न धर्तुं प्रभुः ॥ ३६

श्रीसार्वागमशास्त्रसारकलनाकेलीगृहाः केऽप्यहो !
केचिद्दुर्दमवादिकुञ्जरकुलोन्माथैककण्ठीरवाः ।

छन्दोनाटककाव्यवित्तमजनोत्तंसास्तु केचिन्नरा
ये शीलं हृदि धारयन्त्यनुदिनं ते सन्ति वै पञ्चषाः ॥ ३७

सङ्ख्यावत्संसदुर्वी तमनणुसुगुणावासमाशिश्रियेत
त्वष्टारं पद्मिनीवद्दयितमिव सती कोकिलेवाम्रसालम् ।
हंसीवन्मानसं सन्मतिरिव विनयं श्रीरिवेन्द्रानुजं वै
यः शीलं चिन्तितार्थप्रदमनुवदलं चिन्तयेदेकचित्तः ॥ ३८

वेत्ता सोऽत्राऽवसेयः स च विशदमतिः सोऽर्हतां पर्युपास्तेः
कर्ता स प्राणिवग्रा(र्गा)द्यवनविधिपटुः सोऽमलध्यानधर्ता ।
उद्धर्ता वंशजानां स सकलशशभृज्ज्योतिराभप्रकीर्ति-
र्यः शीलावासमध्यात् क्षणमपि
न बहिर्याति सन्त्यक्तलौल्यः ॥ ३९

गर्जन्तस्तावदुच्चैर्विषयकरटिनः संस्थितिं कुर्वतां वै
चित्तारामेऽभिरामेऽशमदमनिशितोद्दामदंष्ट्रोत्कटास्यम् ।
रागद्वेषादिकश्वापदततिविजयावाप्तकीर्त्याह्वनादं
तन्वन् श्रीशीलनामा मृगपतिरसमो नैति यावज्जिगीषुः ॥ ४०

सुन्दर्योऽपि सुधाभुजां हि यकया रूपश्रियाऽधः कृता
राज्यद्ध्र्या सममुग्रसेनतनुजां यस्त्यक्तवांस्तामपि ।
अब्दं दानमदात्तु रैवतनगेऽलासीत्तपस्यां च यो
धुर्यः शीलवतां स नेमिजिनपो वः श्रेयसे भूयसे ॥ ४१

दद्यात् कस्य मुदं न चेतसि परां सा धारिणीकुक्षिभू-
र्यात्ताऽर्हन्नियमस्थितिं रथपदान्नेमिं दरीस्थं मुनिम् ।
दुर्ध्यानाम्बुधिनीरपूरनिपतन्तं प्रोद्दधाराऽऽशु वै
स्वेरायुक्त्यभिधाननावमिव सत् शस्यां ददन्ती किल ॥ ४२

रक्षत्वत्र स वः शिवो नवतमः श्रीकुम्भभूपाङ्गभू-
र्मल्लिर्यः कमनं समूलमवधीद् रोषास्त्ररिक्तोऽपि हि ।
यस्तु प्राग्भवमित्रषट्कमतनौ मज्जत्कुरागाम्बुधौ
पाति स्म प्रवरः सुशीलकलितानां विश्वभूमीस्पृशाम् ॥ ४३

अब्दद्वादशकं यथेच्छमनुभूतं येन वारस्त्रिया
सार्कं - - - - - - - - - - - - - - -

- - - - - - - - - - - - - - - - -

प्रोक्तो दुष्करकृत्त्विति स्वगुरुभिस्तं स्थूलभद्रं स्तुमः ॥ ४४

दस्यूनां पञ्चशत्या प्रभव इति पुमान् प्रापः यस्मात् प्रबोधं
स्वर्णानां कोटिभिर्यो नवनवतिमिताभिर्जहौ चाऽष्ट बालाः ।
योऽलासीद् वाजिपक्षाशुगमितमनुजैः साकमर्हत्तपस्यां
स श्री जम्बुप्रभुर्नो कथमिह लभते शीलदृष्टान्तभावम् ? ॥४५

मात्रा यस्तु सुनन्दया धनगिरेः क्रन्दन् ददे खिन्नया
बाल्येऽप्यागमपारगोऽत्र समभूद् श्रीसिंहगिर्यादरात् ।
श्यामाभिः प्रतिघस्त्रमुत्तमसमृद्ध्या प्रार्थमानो निजं
शीलं नो विजहौ स वज्रगणभृद् भूयात् सतां सन्मुदे ॥ ४६

यत्कुक्षाववतीर्णवान् गुणनिधिः श्रीवज्रनामा विभु-
र्व्योमाऽभ्राशुगसम्मितेषु जिनपाद् वर्षेषु वीराभिधात् ।
कान्तभ्रातृसुतेष्वितेषु चरणं या स्वीचकार व्रतं
स(सा)वो यच्छेनुद्गच्छस्य (? यच्छतु....)
जयिनि श्रेयः सुनन्दा सती ॥ ४७

ख्यातो यः कलिकेलिमन्दिरमहो सर्वासुमद्ध्वंसकृद्
यश्चाऽत्युग्रतरोरुपाप्मनिचयासङ्गैकबद्धस्पृहः ।

कामासक्तजनप्रपक्षकरणे दक्षो मुनिर्नारदः
प्राप्नोत्यक्षरसम्पदं स यदि तत् शीलस्य लीलायितम् ॥ ४८

यो गाढं कपिलाख्यया त्वभयया सम्पीड्यमानो रहः
शीलाद्वै निजकात् सुराद्रिवदहो नो चालितो वात्यया ।
क्रुद्धस्याऽपि कदर्थनान्न नृपतेः खेदं मनाक् चाऽऽप्तवां-
स्तं को वर्णयितुं सुदर्शनमिहेशः स्याच्च सद्दर्शनम् ॥ ४९

भर्तुर्यात्रिकचत्वरादिषु विगानं प्रोच्यमानं जनैः
श्रुत्वाऽऽरक्षिक(क्षक)पीडनास्तु(त्तु)बहूधोत्सर्गं व्यधाद्वेश्मनि ।
यत्शीलप्रतिपालनेन विपदां नाशो बभूवाऽऽशु सा
जीयादत्र मनोरमाह्ववनिता साध्वीजनैरानुता ॥ ५०

या श्रीनाभिजतीर्थनाथविलसद्वंशश्रियोऽलङ्कृति-
र्या शीलेन निजेन चाऽपि धवलीचक्रेऽखिलं वै जगत् ।
या बाल्येऽपि ललावशेषसुखदां जैनीं तपस्यां परां
सा ब्राह्मी विदितोत्तमैर्गुणगणैः केनोपमेया भवेत् ? ॥ ५१

सम्प्राप्तामलकेवलाज्जिनपतेरादीश्वरात् संयमं
लान्ती वै विनिवार्य दिग्जयकृते याते नृपे त्वार्षभौ ।
या शीलावननिष्ठधीश्चिरतरं तेपे तपो दुश्चरं
स्वीचक्रे व्रतमागतेऽपि भवतात् सा सुन्दरी वो मुदे ॥ ५२

प्राज्याद् राज्यपदाच्च्युताऽतिगहनाद् या काननाद् रावणे-
नाऽऽनीताऽपि निजां पुरीं नहि मनाक् तत्याज शीलं स्वकम् ।
यस्या वह्निरपि ज्वलन् जलमिवाऽभूत् शीलसम्पर्कतो
भर्त्रा साकमवाप सौख्यमपि सा सीतासती नन्दतात् ॥ ५३

ध्यायन्त्यार्हतधर्ममात्महृदये या सञ्चचाराऽवनौ
दुःसञ्चारवनस्य विश्वविदितेन प्रोज्झिता स्वामिना ।
भुक्त्वा द्वादशवत्सरीं तु विपदं शीलेन सौख्यं पुनः
प्राप्सीत् सा दमयन्त्यशेष भुवनस्तुत्या सती नन्दतु ॥ ५४

सिक्त्वा चालनिकाजलेन यकया चम्पाभिधायाः पुरो-
द्वाराणामुदघाटि वै त्रिकमहो ! शीलानुभावात् स्वकात् ।
चक्रे श्रीजिनशासनोन्नतिरशेषेलास्पृशां साक्षिकं
सा विश्वे जयतात् समग्रवनितामौलिः सुभद्रा सती ॥ ५५

देवः श्रीत्रैशलेयस्त्रिदशपतिमुखाऽस्वप्नकोटीभिरर्च्यो
यस्याः शीलव्रतस्याऽधिकमनणुतरां वै चकार प्रशंसाम् ।
यां च श्रीधर्मलाभाशिषमपि सुखदां प्राहिणोत् किं न सा स्या-
न्नुत्या सर्वत्र साध्वीसदसि हि सुलसोपासिका सर्वकालम् ॥५६

पूर्वे जन्मनि या गृहीतचरणाऽप्यालोक्य भोगे रतान्
पुंसः पञ्च निदानमेव कृतवत्याप्तुं सुखं तत् ततः ।
लेभे पञ्च धवांस्तु पाण्डुतनयानग्रेसरत्वं सती-
नां तस्यै द्रुपदाधिराजतनयायै श्रेयसं स्तात् सदा ॥ ५७

या नाऽभूद् युगबाहुमग्रजहतं वीक्ष्याऽपि सुव्याकुला
याऽत्याक्षीत् पुरमप्यहो सुखपदं शीलं स्वकं रक्षितुम् ।
या माता च नमेर्नृपस्य जगति ख्याता ललौ सद्व्रतं
सा रेखा मदनेति पूर्वपदयुग् देयान्मुदं वोऽतुलाम् ॥ ५८

वप्तुर्भर्तुरगारतस्तु समभूद् भ्रष्टा ययौ दुर्वनं
पश्चाद् वारवधूगृहं पुनरकार्षीद् वैकलीं स्वां दशाम् ।

शीलं रक्षितुमाप्तवत्यपि सुखं भूयः सुधासोदरं
सा श्रेयांसि तनोतु विश्वविदिता श्रीनर्मदासुन्दरी ॥ ५९

नैतन्नैतदनुष्ठितं समुचितं कृत्यं त्वया सर्वथा
यत् श्रीमैथिलभूमिपालतनयां सीतामिहानीतवान् ।
दौःशील्याचरणात् सुखानि न भवन्तीति प्रियं याऽब्रवीत्
सा ब्रह्मव्रतमौलिमण्डननिभा मन्दोदरी शं क्रियात् ॥ ६०

प्रच्छन्नं सुलसाकृतात् कपटतो याऽऽप्तापि दुर्व्यापदं
कृत्वा तापसरूपमप्यतितरां घोरे वनेऽस्थादहो ! ।
स्वं शीलं हि जुगोप चाऽऽप बहुलं सौख्यं पुनः पेशलं
सा भूयादृषिदत्तिका मुनिजनैर्नुत्या मुदे वः सती ॥ ६१

यस्या रूपं पटस्थं प्रचुरतरगुणं वीक्ष्य लाम्पट्यदोषा-
च्चण्डप्रद्योतभूपे प्रबलबलवृतेऽप्यागते प्रार्थनार्थम् ।
कान्ते जाते परासावपि निजतनयऽणै(यं वै?) ररक्षैव या स्वं
शीलं धीसम्प्रयोगाद् भवतु बहुमुदे सा मृगावत्यजस्रम् ॥ ६२

प्रच्छन्नं कटकात् समेत्य दयिते रन्त्वा पुनः प्रस्थिते-
ऽभिज्ञानेऽपि च दर्शिते श्वसुरकोऽरण्ये मुमोचैव याम् ।
तातेनाऽपि हि नाऽऽदृता गिरिनिकुञ्जेऽसूत पुत्रं हि या
सौख्यं चाऽऽप शुभाय सा भवतु वः सत्यञ्जनासुन्दरी ॥ ६३

किं कुर्वन् स भविष्यतीति बहुले शीते स्वदेव्या वचः
श्रुत्वा श्रेणिकराड् रुषाऽऽकुलमनाः पप्रच्छ वीरं जिनम् ।
साध्वी चेटकभूपभूरथ नवेति स्वाम्यपि प्रोचिवान्
सत्येवेति हि यां सदाऽस्तु सुमुदे सा चिल्लणा सुव्रता ॥ ६४

स्वामिंस्त्वं मृगयारसं खलु विमुञ्चेति स्वकीयं वचो-
ऽकुर्वाणे सति शान्तनौ नरपतौ याऽगात् पुनः स्वं पदम् ।
अस्थाद् विंशतिवत्सराणि च चतुर्युक्तान्यहो कानने
शीलं पालयति स्म निर्मलतमं गङ्गा सुखायाऽस्तु सा ॥ ६५

बह्वन्यायरतोऽपि चौरगणमुख्योऽपि प्र(म)त्तोऽपि च
क्षोणीनायककान्तया निधुवनार्थं यः समभ्यर्थितः ।
दत्तान् सद्गुरुणा विमृश्य नियमांश्चित्ते स्वशीलव्रताद्
भ्रष्टो नैव बभूव सोऽत्र जयतु श्रीवङ्कचूलो गृही ॥ ६६

यां मोक्तुं पितृमन्दिरे श्वसुरकोऽचालीन्निवेद्याऽग्रतः
सूनो रात्रिभवं स्वरूपमखिलं मार्गे पुनर्निर्मलाम् ।
ज्ञात्वाऽऽगात् स्वगृहं शशंस च महन(त्)शीलं यया जिग्यिरे
चत्वारः सचिवा जयत्वनुदिनं सा शीलवत्यङ्गना ॥ ६७

नार्यः कदाचन मनाग् मनसः स्वकीया-
न्नैसर्गिकीं कुटिलतां न परित्यजन्ति ।
ज्ञात्वेति तत्र न भवन्ति हि सक्तचित्ताः
सत्पुरुषा य(ह्य)गडदत्तमुखा यथेह ॥ ६८

सन्त्यक्ताऽवनिजानिनाऽतिगहनेऽरणे गता दुर्दशां
सञ्छिन्नं पुनरेव हस्तयुगलं प्राप्सीन्नवं पेशलम् ।
भेजे भूरिसुखानि सर्वजगति ख्याता कलावत्यहो
शीलस्याऽतिशयेन विस्मयकरं किं किं न सम्भाव्यते ? ॥६९

अथ ब्रह्मव्रताराधकेतरोदाहृतयः ।
तत्र तेषां(केषां)चिदभव्यानामपि स्वीकृत-
सर्वविरतीनामपि व्रतखण्डना जायते सा तदधिकारे प्रोच्यते-

पूर्वं यो नियमस्थितिं गुरुसकाशादग्रहीद् दुष्कलां
निर्वेदात् कुशलत्वमाप सकलस्याऽर्हत्क्रियौघस्य च ।
सोऽपि ह्यार्द्रकुमारको व्रतविधिं हित्वा चतुर्विंशतिं
वर्षाणां गृहसौख्यभाक् पुनरभूद् धिक् पुष्पचापोद्गतिम् ॥७०

श्रीशैवेयजिनस्य बन्धुरपि यः स्वीकृत्य जैनं व्रतं
दर्यां रैवतभूधरस्य विशदध्यानं प्रपन्नः परः(रम्) ।
सोऽपीक्ष्याऽऽवरणप्रमुक्ततनुकां राजीमतीं रागवा-
नासाश्त (?)त्र तु चेत्तदा खलु भवेदन्यस्य का सङ्कथा ? ॥७१

यः शिष्योऽन्तिमतीर्थपस्य नृपतिश्रीश्रेणिकस्याऽऽत्मभू-
रप्यत्युग्रतपोनिधिर्बहुतमव्याख्यानलब्ध्या सदा ।
जन्तून् बोधयति स्म यो दश दश श्रीनन्दिषेणो मुनिः
सोऽप्यासीत् पणयोषिता सह रतो धिक् कामविस्फूर्जितम् ॥७२

सम्पर्कं स्वगुरोर्विमुच्य तटिनीतीरे तपोभिर्घनैः
पार्श्वस्थांस्त्रिदशांश्चकार वशगान् यो वै सहेलं वशी ।
सोऽपि प्रालभताऽत्र निन्द्यनरकं सङ्गेन वारस्त्रिया
सन्त्यक्तव्रतसंस्थितिर्वृजिनवान् द्राक् कूलवालो यतिः ॥ ७३

विद्यन्ते नहि किं सुपर्ववनितास्तारुण्यराढाञ्चिता
लेखानामधिपोऽपि गौतमऋषेर्भेजे सि(?) यत् प्रेयसीम् ।
पुष्पेषुज्वलने घने ज्वलति हृत् तृण्याकुटीरे महान्
रक्षोऽपि प्रविमुह्यतीह यदि कः स्याद् विस्मयो वै तदा ॥७४

कष्टैः काननवासजैर्बहुविधैरुग्रैस्तपोभिर्व्रतै-
र्योगैरङ्गसमन्वितैरपि(ति)तरां यै रञ्जितं भूतलम् ।

श्रूयन्ते यदि तेऽपि तापसवरा द्वीपायनाद्याश्च्युताः
सत्शीलात् तदहो ! रिपोरिव कलाकेलेर्हि दुश्चेष्टितम् ॥ ७५

भ्रष्टोऽष्टश्रवणः पुराणपुरुषश्चोमापतिस्तापनः
स्कन्दः सोऽपि हिमद्युतिस्तु निजकात् शीलादहो ! श्रूयते ।
अन्ये चाऽप्यमरा यदीह वनितानां कर्मकृत्त्वं घनं
कुर्वन्त्येव तदा स्मरो हि विरलैः शक्येत जेतुं परैः ॥ ७६

येऽरातीन् रणभुव्यनुत्तरबलान् निघ्नन्ति वै हेलया
मत्तं कुञ्जरमानयन्ति वशमत्युग्रं च कण्ठीरवम् ।
तेऽप्यानङ्गरसाकुला गतबला नार्यंह्रिपद्मेष्वहो !
शूरा ह्यत्र नरा लुठन्ति विषमं धिग् मान्मथं चेष्टितम् ॥ ७७

सम्प्राप्ते निधनेऽपि कातरवचो धीरा न जल्पन्ति ये
कष्टां चापि दशां गता अपि निजं मानं न मुञ्चन्ति ये ।
कुर्वन्तः खलु तेऽपि दास्यमवशाः स्त्रीणामनङ्गानल-
ज्वालाभिः परितप्यमानवपुषो दृश्यन्त एवाऽवनौ ॥ ७८

अद्यापि क्षितिमण्डलेऽत्यपयशो ध्वान्तोच्चयश्यामलं
निन्द्यं नूपुरपण्डिताप्रभृतिकानामङ्गनानां महत् ।
शीलं स्थापयितुं कुशीलचरितज्ञातच्छलात् सन्ततं
दक्षैरप्युपदिश्यते मुनिजनैः सर्वत्र शान्तैरहो ! ॥ ७९

किं कुर्मो वयमत्र चेदनियमा नूनं नराश्चाऽर्गला-
मुक्ताः शीलगुणं बलादपहरन्त्यस्मत्सकाशाद् ध्रुतं (ध्रुवम्?) ।
मा भूत् कस्यचनापि नि(वि)श्ववलये निन्द्या पराधीनता
काश्चित् सत्त्वविवर्जिता यितितरां नार्यः प्रजल्पन्त्यहो ! ॥ ८०

दुःशीलतादिबहुदूषणतत्पराणा-
माख्यामि पाप्मपदमत्र वदन्ति दक्षाः ।
तत्सङ्गतिस्तु घनदुःखपरम्पराणां
हेतुः कथं न भवति प्रविचार्यतां भोः ! ॥ ८१

दारिद्यं क्लीबता रुक्ततिरि(र)मतिरपाण्डित्यमल्पायुरापत्-
कौरूप्यं नारकाणां गतिरधममनुष्यत्वमाशाविनाशः ।
तिर्यक्त्वं चेन्द्रियाणामपहतिरशुभश्रेणिरित्यादि दुःखं
दुःशीलैरत्र पुम्भिः प्रबल भयचयैः साकमासाद्यते वै ॥ ८२

यद्दोर्दण्डविमुक्तबाणनिकरत्रस्ताः कुरङ्गा इव
प्रत्यर्थिपृथिवीभुजो वनभुवं ह्याशिश्रियुः सर्वदा ।
लङ्का यन्नगरी बिभीषणमुखा यस्योद्धुताः सोदराः
सोऽप्याप्तो निधनं गतस्तु नरकं दौःशील्यतो रावणः ॥ ८३

पराङ्गनासङ्गजुषां नराणां
भवेद् यदा दुर्भगताऽपकीर्तिः ।
तदा न चित्रं हृदि चिन्तनीयं
मषी न कार्ष्ण्याय निषेविता किम् ? ॥ ८४

परस्त्रियं पुण्यततेर्निहन्त्रीं
सुखाशया येऽत्र भजन्ति मूढाः .
शङ्के स्पृशन्त्युग्रविषोद्धुतां ते
प्राणेच्छया क्रूरतरीं(रां) भुजङ्गीम् ॥ ८५

त्यक्त्वा निजं या दयितं विलज्जा परेषु रागं तनुते नरेषु ।
विद्युल्लताचञ्चलमानसायां रमेत कस्तत्र पराङ्गनायाम् ? ॥ ८६

मोक्षद्रुमे तेन कुठारघातो ददे च देहे च रणाभिधौकः ।
उन्मूलिता चारुगुणालिवल्ली येनाऽन्यनारीषु रतिः कृतेह ॥८७

निर्भर्तृका-सङ्गतिरुच्यते वै
प्राज्ञैरनर्थैकनिबन्धनाय ।
कुलिङ्गिनीभिः सह रन्तुमिच्छा
सर्वापहाराय तदा न चित्रम् ॥ ८८

न मातरं नो जनकं गुरुं वा हितं वचो न श्रुतमार्हतं च ।
मित्राणि बन्धून्न च देवताद्यं वै मन्यते वारवधूरतो ना ॥ ८९

या खानिरुर्व्यां कु(क)पटोच्चयानां
यदीयचित्ते न कृपा कदाचित् ।
ध(अ?)न्यस्य हेतोर्विदधाति हार्द्दं
यासां (या सा?) कथं वरवधूः सुखाय ॥ ९०

निषेवते यो वनिताः प्रकामं
पशुक्रियाभक्तमतिर्नृपाशः ।
स सूक्ष्मजन्तून् नवलक्षमानान्
निहन्ति जैनागमवाक्यमेतत् ॥ ९१

यथा तरूणां दववह्नितो भी-
र्यथा र(रु)रूणां च हरेः करालात् ।
बिडालतः कुक्कुटशावकानां
यथा तथा स्त्रीजनतो यतीनाम् ॥ ९२

नितम्बिनीं ये हृदये निधाय
वाञ्छन्ति मोक्षं बत मुग्धलोकाः ।

आरुह्य ते लोहमयीं शिलां वै
तरीतुमिच्छन्ति महाम्बुराशिम् ॥ ९३

व्यापत्खनिः सद्म कलेर्निदान-
मनर्थराशेः खलु याऽत्र लोके ।
स्वान्तं दुराराध्यतमं च यस्याः
सा सौख्यहेतुर्वनिता कथं स्यात् ? ९४

सा जातिरब्धौ विनिमज्जतु द्राक्
कुलं च तद् यातु विदूरमाशु ।
गुणा विशन्तूग्रतमे हुताशे
दुःशीलतायां निरतस्य पुंसः ॥ ९५

विज्ञाय किम्पाकफलोपमानां-
स्त्यजन्ति विज्ञा विषयानशेषान् ।
मूढाः पुनस्तत्र रतिं दधाना
भवन्त्यजस्रं जनगर्हणीयाः ॥ ९६

विद्योततोऽत्राभिजनो जनस्य
शीलेन वै शुद्धतरेण शश्वत् ।
सालो हि मूलेन सुनिश्चलेन
रुचिं दधाति च्छना(?)दिकैर्नो ॥ ९७

तृष्णा वञ्चनपाटवं वितथा(थ)वाग् वैधेयताऽलज्जता
नैष्ठुर्यं च(त्व)भिमानिता मनसिजक्रीडारुचिः प्रायशः ।
शुग्रोषावविवेकिता च सहजा दोषालिरित्यादिका
यत्र स्याद् वनितासु तास्विह पुमान्
कुर्यात् कृती को रतिम् ? ॥ ९८

कर्तव्यो नहि योषितां प्रविलसत्स्नेहं गतानामपि
विश्वासो हितमिच्छुभिर्बुधजनैर्नूनं कदाचित् क्षितौ ।
श्रीरामेण च लक्ष्मणेन च यथा तस्मिन् वने दण्डका-
ऽभिख्ये सूर्प्पणखाप्रदर्शितबहुप्रेमाऽपि नाऽङ्गीकृता ॥ ९९

भाषन्ते मधुरं वचो यदि पुनः प्रीतिं परां दर्शय-
त्यानन्दं रचयन्ति विभ्रमततिं कुर्वन्तिं पुष्णन्ति शम् ।
तन्वन्त्यादरमद्भुतं च जनयन्त्येवेह चित्ते तथा-
प्यात्मज्ञा नहि विश्वसन्ति कुटिलभ्रूणां चरित्रे क्वचित् ॥१००

अर्च्यन्ते कुसुमेषुशासनधरास्ते निर्जरा जर्जरा
मुक्त्यर्थं मनुजैरनेकविधिभिर्भक्तिप्रणुन्नैस्तदा ।
लोके किं नहि पूजयन्ति खलु ते गर्त्तावराहादिका-
नज्ञानप्रचयप्रनष्टमतयस्तत्त्वार्थमुक्ता यिह ॥ १०१

नारीणां निशितैः कटाक्षविशिखैर्नो भिद्यतेऽस्मोत्तरो (?)
येषामत्र पवित्रसद्गुणजुषां शीलाह्वसन्नाहकः (?) ।
यैश्चापि स्मरभूधवो बहुबलोऽजेयो जितो लीलया
दान्तैर्हेतिविवर्जितैरनुदिनं तेभ्योऽस्त्वजस्त्रं नमः ॥ १०२

पीयूषप्रतिमं निपीय व[च]नं प्रेक्ष्याऽलसां सद्गतिं
सप्रेमेक्षितमद्भुतप्रदमनिन्द्यं विभ्रमं भ्रूभवम् ।
वक्षोजौ च गभीरनाभिवलयं मध्यं कृशं योषितां
स्वान्तं नो विकृतिं जगाम नियतं येषां हि तेभ्यो नमः ॥१०३

वामा क्लीबवदुत्तमैर्हि पशुमद्धेयं च सद्मासनं
कुड्यस्याऽऽन्तरमप्यनङ्गरसयुक् स्त्रीणां कथा भिक्षुभिः

प्राक्केलिस्मृतिरङ्गवीक्षणमपि स्वाङ्गेषु सत् संस्कृति-
वर्ज्यं चाऽत्यशनं प्रणीतमपि च ब्रह्मव्रताराधकैः ॥ १०४

शीलं चन्दनचन्द्रकाशकुसुमप्रालेयपिण्डोज्ज्वलं
याः प्राग्र्यं परिपालयन्ति नितरां तुच्छाऽपि ताभिर्ह्यहो ! ।
स्त्रीजातिः पुरुहूतमुख्यसुमनोभिर्दानवैर्मानवै-
र्निर्ग्रन्थैः सुविचक्षणैरपि जने स्तुत्याः कृता नित्यशः ॥ १०५

याः श्रीनन्दनसन्निभानपि परान् स्वप्नेऽपि वाञ्छन्ति नो
पुंसो जल्पमनल्पमन्यमनुजैः साकं न याः कुर्वते ।
यास्तुर्यव्रतधर्मपालनपरा रत्नत्रिकाराध(धि)का-
स्ता लक्ष्मीरिह मन्महे वयमहो साक्षान्न वै योषितः ॥ १०६

अमङ्गलं शाम्यति दुःखजालं
प्रणश्यति द्रागिह सर्वकालम् ।
येषां प्रशस्यादपि दर्शनाद् वै
जयन्तु ब्रह्मव्रतधारिणस्ते ॥ १०७

सुसञ्चितं धर्मधनं प्रविश्य
यो वर्ष्मगेहेऽपहरत्यजस्रम् ।
अनङ्गचौरः प्रबलौ जितो यैः
सोऽप्यत्र तेभ्योऽस्तु नमस्त्रिसन्ध्यम् ॥ १०८

सर्वज्ञसिद्धान्तपुरे प्रकुर्वन्
राज्यं कृपाह्वोत्तमपट्टदेव्या ।
समं च सम्यक्त्वमहाप्रधान-
प्रभूषितः शीलनृपोऽत्र जीयात् ॥ १०९

यक्षाद्याः शकडालमन्त्रितनयाः सप्ताऽथ कंसद्विषो
भामाद्या दयिताः सतीजननुताः कुन्त्यादिकाश्चाऽपराः ।
कौशल्याऽपि च देवकी जिन[पद]न्यस्ताः समस्ता अपि
श्रेयांसीह वितन्वतामनुदिनं सत्यः प्रभूतानि वः ॥ ११०

यद्वाणीरसमानिपीय भविका द्राक्षासितादौ रुचिं
नो कुर्वन्ति यदीयकीर्तिरतनुः प्रालेयधामोज्ज्वला ।
प्रोद्यद्वृद्धतपोगणाम्बरदिवानाथोपमानाश्चिरं
श्रीमत्श्रीजयसुन्दराह्वगुरवो जीयासुरुर्वीतले ॥ १११

## ॥ आशाम्बरहितशिक्षा ॥

मठवासश्छद्मस्थव्याख्यादीक्षे प्रभूतजनसङ्गः ।
तैलाभ्यङ्गकमण्डलुवह्न्याधाकर्मतृणपट्यः ॥ १

जिनवृन्दानाचरितान्यप्येतानि श्रयन्ति निजबुद्ध्या ।
कथयन्ति च तत्कल्पं कुर्मो वयमहा ! धृष्टत्वम् ॥ २

सर्वाशुचि पृथुगेहं देहं मत्वा वसन्ति देवगृहे ।
तीर्थकराशातनया गदन्ति चानन्तसंसारम् ॥ ३

गतवसनोऽपि जिनो ननु बिभर्त्ति न पिशाचरूपतां लोके ।
तस्यातिशययुतस्य हि सादृश्याख्यानमतिदुष्टम् ॥ ४

यदि वसनपरित्यागो विहितः क्षपणैः परिग्रहं मत्वा ।
किं तृणमयं न वसनं सूत्रं वा तत्र किं नास्ति ॥ ५

बहुमूल्यं दुष्प्रापं वसनाद् दुःशोध्यजीवसंभूति ।
तृण-वसनं सति तस्मिन्नाशाम्बर नाम तच्चित्रम् ॥ ६

कृतवसनपरित्यागा उपानहस्तत्कृता जिनास्पृश्याः ।
परिदधति किमिति किं वा विचार्यते नग्नबालानाम् ॥ ७

वह्नेः पापं सद्यो धूमो यत्तद्भवः कलुषमूर्त्तिः ।
दर्शनमान्ध्यगलेग्रहतापातकमधुनापि विदधाति ॥ ८

जीवानां वधहेतुर्वह्निरयं सर्वतोमुखं शस्त्रम् ।
अर्हदसेवितमपि तं सेवन्ते नैव वसनमपदोषम् ॥ ९

न दधति वसनं वदने, दुर्गन्धात्युष्णपवनभवना ये ।
ते वायुकायरक्षां जल्पन्तो विदधति कथं नु ॥ १०

संकीर्ण्णमुखकमण्डलुमध्ये शोध्या भवन्ति ये जीवाः ।
तेषां तद्वधसंभव-पापस्य च वेत्ति कः संख्याम् ॥ ११

जीवाङ्गस्पर्शादौ प्रायश्चित्तं तथाऽन्तरायः स्यात् ।
पट्टगुलिकाकमण्डलुपिच्छीहिङ्ग्वादि तत्किं न ॥ १२

येऽनन्तकाय-बहुबीजभक्षिणः खरतराविशेषेण ।
शाकाहारास्तेषां मता न किं जीवकायाः षट् ॥ १३

शुद्धं नीरं पिबतां मुहुरपि दोषो न जीववधरूपः ।
नेन्द्रियाविकृतिस्तादृग् यथाऽनिशं घृतयुतान्नेन ॥ १४

दोषोऽल्पोऽम्भः पिबतां त्यजतां घनमुत्तमाङ्गदेहेषु ।
भूमिष्ठान् प्लावयतां त्रसान्न दोषोस्ति किं तेन ॥ १५

यच्चैकस्मिन् गेहे दशपञ्चभुजिक्रियां प्रकुर्वन्ति ।
श्रावकनिमन्त्रिताः किं ? तत्राधाकर्मदोषो न ॥ १६

सर्वेषामपि यतिनां भिक्षा विरसा निरादराऽभिहिता ।
स्निग्धैकगृहान्नभुजां गृहिणीक्षणकाङ्क्षिणां न पुनः ॥ १७

तीर्थकृतां सा लब्धिः पाणेर्बह्वपि पतेन्न भूमितले ।
संप्रत्यशनं यतिकरगतपतितं भवति जीवघ्नम् ॥ १८

वस्त्रैराभरणैर्वा यदि गेही स्याज्जिनस्ततः कुसुमैः ।
नैवेद्यैः स्नात्रेण च भोगक्षुत्तापकलितोऽपि ॥ १९

आरण्यको न धर्मो नगरे जनसंकुलेन भवति भव्यः ।
लोकेऽपि महदरिष्टं नगरे वनचारिसंचारः ॥ २०

कुर्वन्ति यदि न लज्जां नग्ना मग्ना दुराग्रहसमुद्रे ।
दुश्चर्मा किमिति ततः कौपीनं लज्जया धत्ते ॥ २१

स्ववचनविरुद्धमेतल्लोकविरुद्धं तथागमविरुद्धम् ।
नग्नत्वं बिभ्राणाः केवलमिह दधति पशुभावम् ॥ २२

आद्यत्वे क्षपणानां प्रमाणमिह नोपलभ्यते किंचित् ।
आद्यत्वे भव्यत्वं यदि मिथ्यात्वं तदा भव्यम् ॥ २३

एवं श्रीजिनकल्पं येऽस्तव्यस्तं समाचरन्तीह ।
सोऽपीदृग् भूयादिति तस्मिन्नपि लाघवं दधति ॥ २४

ये मनसा निस्संगास्तेषां वस्त्रं न मोक्षबाधायै ।
गृह्णीत तदिह वस्त्रं क्षपणा लज्जापरित्यक्ताः ॥ २५

पू.मु. श्री विनयचन्द्रविजयकृतम्

## ॥ अनङ्गदुर्जयाष्टकम् ॥

(मालिनी)

सुलभमरिशतानां नाशनं प्रोन्नतानां
सुलभमनशनं वा धारणं वृत्तमत्र ।
सुलभमुदनिधेर्वोल्लङ्घनं वा भुजाभ्या-
मतिकठिनमनङ्गं मारणं मानुषाणाम् ॥ १

सुलभमनलमध्ये मज्जनं वाऽशनं वा
सुलभमशितरश्मेश्चक्षुषा रश्मिपानम् ।
सुलभमिभवरैरायोधनं मद्यमत्तै-
रतिकठिनमनङ्गं मारणं मानुषाणाम् ॥ २

सुलभमसुकरायां कन्दरायां निवासः
सुलभमतुलशक्तेः पञ्चवक्त्रस्य वक्त्रे ।
प्रकटितबहुमन्योभी(र्भी ?)षणे पाणिदान-
मतिकठिनमनङ्गं मारणं मानुषाणाम् ॥ ३

सुलभमशितरश्मेर्दर्शनं कृष्णनक्तं
सुलभमनुदिनं वा ह्यासनं कण्टकानाम् ।
सुलभमलकपाशाल्लुञ्चनं सानुभावा-
दतिकठिनमनङ्गं मारणं मानुषाणाम् ॥ ४

सुलभमनुदिनं वा भोजनं भैक्ष्यवृत्त्या
सुलभमनुदिनं वाऽऽकाशमध्योड्डुयं वा ।
सुलभमनुदिनं वा भूधराग्रे निवासो
ह्यतिकठिनमनङ्गं मारणं मानुषाणाम् ॥ ५

सुलभमनुदिनं वा नीरसं भुक्तमेकं
सुलभमनुदिनं वा भीषणारण्यवासः ।
सुलभमनुदिनं वाऽऽशाम्बरत्वं विधेय-
मतिकठिनमनङ्गं मारणं मानुषाणाम् ॥ ६

सुलभमहिधरण्या धारणं विद्यया वा
सुलभमहिशिरस्कादानयं वा मणेर्वा ।
सुलभमतितपस्कं वा विधेय(यं) सुघोरं
ह्यतिकठिनमनङ्गं मारणं मानुषाणाम् ॥ ७

इषुरसवसुचन्द्रे (१८६५) वत्सरे माधवे च
विमलधवलपक्षे वासरे तिग्मरश्मौ ।
निखिलहृदयनन्दं सद्गुरोः सुप्रसादा-
न्ननु मुनि विनयेन्दु नाष्टकं प्रोक्तमेतत् ॥ ८

पू.मु.श्री लक्ष्मीकल्लोलगणिविरचितः

## ॥ सुक्तसंग्रहः ॥

(सप्तवर्गाक्षर-वरेण्यावमशब्दग्रथित)
अर्हं प्रणम्य विज्ञानं विनोदाय मयाऽनया ।
सदसद्व्यक्तियुक्त्या च क्रियते सूक्तसङ्ग्रहः ॥ १

कवर्णादिक्षपर्यन्त-रीत्या षट् षट् स्वनश्रिया ।
सदसज्जनोपदेष्टुं पूर्वाचार्यैरकृतपूर्वः ॥ २

कृतज्ञः कार्यकर्ता च काम्यरूपश्च कोमलः ।
कोविदः कमलावासः कषट्कोऽयं नृपूत्तमः ॥ ३

कृपणः कूटधीः कृष्णः कुटिलः कटुवाक् कुणिः ।
कषट्कं पुण्यहीनाना-मिदं सम्पद्यते नृणाम् ॥ ४

खलीनखड्गव्यग्रत्वं खल्वाटत्वं खरांशुता ।
खेदघ्न खलघातित्वं षट् खकारा नरोत्तमे ॥ ५

खेला खस-खरत्वं च, खर्जू-खर्वत्व-खोरता ।
खकाराः षडमी लोके गर्हिता नरि गर्हिते ॥ ६

गुणित्वं गुरुता चैव गौरत्वं ग्रामणीयता ।
गोधनत्वं गौरवास्ति-र्गषट्कं प्राप्यमुत्तमैः ॥ ७

गर्गत्वं गौणता चैव गार्हस्थ्य-गण-गोरसैः ।
हीनता गतिवक्रत्वं गषट्कं पापयोगतः ॥ ८

घृणिमत्त्वं घृणावत्त्वं घनौपम्यं घनोपमा ।
घटारोग्यं घटद्वाक्यं घकाराः षण्नरोत्तमे ॥ ९

घर्घरारव घर्मित्वं घस्मरत्वं च घूर्णिमा ।
घृष्टत्वं घातकत्वं च, घकाराः षण्नराधमे ॥ १०

चक्षुते(स्ते)जश्चित्ततुष्टिः चातुर्यं चिरजीविता ।
चिलीन-चेलत्वहानिः षट् चाः स्युः पुण्यवन्नरि ॥ ११

चापल्यं चाटिका चेष्टा चाटुता चलचित्तता ।
चौर्यक्रिया चकाराः षट् पापिनां पुण्यहानिदाः ॥ १२

छेकता छलहीनत्वं छत्रित्वं छायया श्रितम् ।
छविदीप्तिः च्छुप्तिहानि-श्छकाराः षण्नरोत्तमे ॥ १३

छर्दिश्छिद्रं छाकता च छातत्वं छद्मतायुतम् ।
छिन्नाङ्गता छकाराः षट् क्षीणपुण्यप्रभावतः ॥ १४

जीवरक्षा जनश्लाघा जिनपूजा जितात्मता ।
जल्पशक्तिर्जयावाप्ति-र्जकाराः षट् सतां नृणाम् ॥ १५

जाड्यं जनापवादश्च जारता जातिहीनता ।
जिह्मता जन्तुघातित्वं जकाराः षण्नराधमे ॥ १६

झात्कारश्च झलत्कारा(र)झमत्कारौ च झुंमणुं ।
झबज्झबश्च झीरा च झस्य षट्कं शुभं नृणाम् ॥ १७

झुंझितो झूरितो झीर्णो झषाटी च झलायुतः ।
सझुंझमुसयः पापी झषट्कोऽनर्हगौरवः ॥ १८

ज्ञात्यग्रिमो ज्ञानवांश्च ज्ञोक्ति ज्ञप्ति ज्ञसंस्तवः ।
ज्ञानभक्तो ज्ञषट्केना-श्रित एव नराग्रणीः ॥ १९

ज्ञान-ज्ञप्ति-ज्ञताभ्रष्टो, ज्ञसङ्गतिविवर्जितः ।
ज्ञान्यभक्तो ज्ञषट्के(को?)ना-श्रित एवं नराग्रणीम् ॥ २०

टिक्कंगले टोड्डुरं च टारावरोह टट्टुरौ ।
ट्टिटिलिका टटारत्वं षट् टकाराः शुभाश्र(श)ये ॥ २१

टिट्टिभत्वं च टुण्टत्वं टौंक्यं टप्परकर्णता ।
टक्करा टुंचनत्वं च षट् टकारा दुराशये ॥ २२

ठक्कुरत्वं ठरणत्व-मठांठल्यं च ठींभता ।
ठणत्कार-ठमत्कारौ स्त्रीणां पुण्याठ्ठषट्कमिदम् ॥ २३

ठोठत्वं ठग ठल्लत्वं ठींठत्वं ठीठीआन्वितम् ।
ठामणत्वं च जायेत ठषट्कं पापयोगतः ॥ २४

डिण्डीरगौरकीर्तित्वं डिण्डिमा डुंगरोच्चता ।
डयनत्वं डयनावाप्ति-र्डिम्बहानिः सुपुण्यतः ॥ २५

डोल्लत्करत्वं डुम्बत्वं डिंगरत्वं च डिम्भता ।
डामर्यं डक्कपुत्रत्वं डकाराः षड् दुरात्मनः ॥ २६

ढोल्ल ढोल्लिक ढक्काप्ति-र्ढींचता ढक्कितारवः ।
ढौकनं चेति जायेत ढषट्कं पुण्यशालिनाम् ॥ २७

ढांढर्यं ढीमणं ढिक्का ढौढल्लं ढरढिल्लिता ।
ढौमण्यं चेति जायेत ढषट्कं पापशालिनाम् ॥ २८

णज्जर णच्चाउत्तो णिसत्त णिज्जाउ णिवह संजुत्तो ।
णिम्मंसू चैते स्यु - र्णषट्कयोगाः सुपुण्यानाम् ॥ २९

णिद्धंधस णिक्खरिओ णंदण णिव्वह(णिव्वर?) णिक्कडो णिक्खो।
एतं णकारषट्कं पापिष्ठानां भृशं भवति ॥ ३०

त्यागस्तत्त्वज्ञतातुष्टि-स्त्रिकशुद्ध्यादयो गुणाः ।
तीव्रेच्छा-तप्तिहीनत्वं तकाराः षण्नरोत्तमे ॥ ३१

तरुच्छेदस्तामसत्वं तस्करता तृणत्रुटिः ।
तृष्णा च तप्तिरन्येषां तकाराः षण्नराधमे ॥ ३२

स्थानाप्तिः स्थिरता स्थाम स्थूललक्षादयो गुणाः ।
स्थाविष्ठ्यं स्थलभाषित्वं थकाराः षण्नरोत्तमे ॥ ३३

स्थक्कता स्थपुटाङ्गत्वं स्थाविरं स्थाणुता तथा ।
थूत्कृतिः स्थलवासित्वं षट् थककयइ रा दुराशये ॥ ३४

दीप्तिर्दानं च दाक्षिण्यं दया देवार्चनं दमः ।
भाग्यभाजां दकाराः षट् सम्पद्यन्ते ध्रुवं नृणाम् ॥ ३५

दुःख-दौर्भाग्य-दौर्गत्यं दीनता दीर्घसूत्रता ।
दम्भोऽमी षड् दकाराः स्युः पापभाजां नृणां ध्रुवम् ॥ ३६

धार्मिष्ठ्यं धृति धी धैर्यं धारणा धनिता तथा ।
पुण्यप्रेरणया षट्कं धकाराणां नरोत्तमे ॥ ३७

धाटीवाहत्वं धूर्त्तत्वं धीवैकल्यं च धिक्कृतिः ।
ध्यानदौष्ट्यमपेयस्य धीतिः षड् धास्तमोभृताम् ॥ ३८

निरामयत्वं नम्रत्वं निर्दम्भत्वं नयान्वितम् ।
निर्ममत्वं निरीहत्वं नकाराः षण्नरोत्तमे ॥ ३९

निःस्नेहत्वं च नीचत्वं निर्दयत्वं नृशंसता ।
निर्गुणत्वं निःकलत्वं नकाराः षण्नराधमे ॥ ४०

प्रियत्वं परभागित्वं प्रभुता पेशलं वचः ।
परोपकारः पाण्डित्यं पषट्कं पुण्ययोगतः ॥ ४१

प्रार्थना पारवश्यं च पीनता पुत्रहीनता ।
प्रत्यर्थियोगः पामा रुक् पकाराः पापयोगतः ॥ ४२

स्फारता स्फुटभाषित्वं स्फीतिमत्ता स्फुटान्वयः ।
फलावाप्तिः स्फुरत्कान्तिः फकाराः षण्महात्मनाम् ॥ ४३

फल्गुत्वं स्फुरदोष्ठत्वं फटाटोपश्च फिक्कता ।
फेत्कारिता फूत्कृतिश्च फकाराः षड् दुरात्मनाम् ॥ ४४

बुद्धिर्बन्धुरता बौध्यं बेररूपं बलिष्ठता ।
बहुप्रदत्वं षडमी, बकारा बहुपुण्यतः ॥ ४५

बीभत्सता बालिशत्वं बुद्धिवैकल्य बन्दिता ।
बोक्कसत्वं बुद्बुटत्वं बकाराः षड् दुरात्मनि ॥ ४६

भारक्षमत्वं भर्तृत्वं भद्रकत्वं च भव्यता ।
भूतिमत्त्वं भाममुक्ति-र्भकाराः षड् विभूतये ॥ ४७

भीमत्वं भारवाहत्वं भ्रष्टत्वं भूतिवर्जितम् ।
भाग्यहानिर्भयभ्रान्तिः षड् भकाराः सुखाय न ॥ ४८

मर्मज्ञत्वं च मैत्रीत्वं मेधावित्वं महात्मता ।
मितभाषित्वमुक्तित्वे मकाराः षण्नरोत्तमे ॥ ४९

मलीमसत्वं मन्दत्वं मदोन्मत्तत्वमूर्खता ।
मौखर्यं मद्यपायित्वं मकाराः षण्नराधमे ॥ ५०

याथातथ्यं यशस्वित्वं योद्धत्वं च यदृच्छता ।
यूनत्वं युक्तवादित्वं षड् यकारी नरोत्तमः ॥ ५१

यद्भविष्यो यथाजातो याचको यद्वदः पुनः ।
यातयामो यक्ष्मरोगी षड् यकारी नराधमः ॥ ५२

रोगमुक्तो रूपयुक्तो रतिरङ्ग रसाकरः ।
रम्यरावो रमावासो रषट्कः पुण्यपीवरः ॥ ५३

रागद्वेषी रिपुत्रासी रीणो रेफमतिश्रितः ।
रूपहीनो रमाक्षीणो रषट्कः पापधीवरः ॥ ५४

लालित्यं लोकसांमत्यं लक्ष्मी लज्जाश्रितं लयः ।
दयायां ललनालीला लषट्कं लभ्यमुत्तमैः ॥ ५५

लुब्धत्वं लुब्धकत्वं च लाम्पट्यं लघुता तथा ।
लक्षणाभाव लासर्यं लषट्कमघशालिनाम् ॥ ५६

विद्वता व्याधिहीनत्वं वीर्यसम्पद् विभूतयः ।
व्रीडायुतं विनिद्रत्वं षड् वकाराः शुभात्मनाम् ॥ ५७

वैवर्ण्यं व्यपदेशश्च वैलक्ष्यं विप्रलापता ।
वेश्याव्यसन वैतथ्यं षड् वकारा विकारिणाम् ॥ ५८

शूरः शीलयुतः श्लीलः श्लाघ्यः शीतलवाग्गुणः ।
श्लथपातकबन्धश्च षट्शकारोऽविकारवान् ॥ ५९

शूली शान्तरसानिष्टः शोकशङ्कापरिप्लुतः ।
श्लथाङ्गः शीर्णवासा च, षट्शकारोऽधमः पुमान् ॥ ६०

षड्ज षट्कारकज्ञत्वं षण्ढ षण्मुख षण्डता ।
षट्कर्मादिसवर्दाता षट्षोऽयं पुरुषोत्तमः ॥ ६१

षण्ढ षुंकार षिंगित्वं षोडशावर्तता तथा ।
षाट्कारवाक्यं षाटक्यं षट्षोऽयं पुरुषाधमः ॥ ६२

सौभाग्यं सूक्तिवक्तृत्वं साहसाङ्क सहिष्णुता ।
सुपात्रदान सत्सङ्गः सकाराः षट् सुपुण्यतः ॥ ६३

सुरापी स्वापहतां च सत्त्वघ्नः सुखघातकः ।
साम्य-सौम्यपरिभ्रष्टः षट्सकारो नराधमः ॥ ६४

हर्षितास्यं हेमभूषा हयहेषा हरिप्रिया ।
हर्म्यवासो हविस्या(ष्या)न्नं हषट्कं सज्जनाश्रयम् ॥ ६५

हताशता हानि हास्यं हीनवंश हठक्रिया ।
हीलाषट्कमिदं हस्य प्राप्यते पुण्यवर्जितम् ॥ ६६

क्षमित्वं च क्षमावत्त्वं क्षीरभोज्यं क्षुदल्पता ।
क्षुद्रावासः क्षौमवासः क्षस्य षट्कं महात्मनाम् ॥ ६७

क्षीबत्वं क्षामता क्षैण्यं क्षोभः क्षाराश्रयः क्षयः ।
सम्पनीपद्यते षट्क-मिदं क्षस्य दुरात्मनाम् ॥ ६८

इति सप्तवर्गसर्वाक्षरोत्थषट्षड्वरेण्यरेफरवैः ।
लक्ष्मीकल्लोलबुधो निर्मितवान् सूक्तसङ्ग्रहं शुद्धम् ॥ ६९

अज्ञातकर्तृकः

# ॥ सुभाषित-अष्टकानि ॥

## ( १ ) हंसाष्टकम्

यः सन्तापं गाङ्गं सन्त्यन्यत्रापि तटगतं स्मरसि ।
अपसरणमथ स्थित्वा गदितं हंसाष्टकं नाम ॥ १

यः सन्तापमपाकरोति जगतां यश्चोपकारक्षमः
सर्वेषाममृतात्मकेन वपुषा प्रीणाति नेत्राणि यः ।
तस्याप्युन्नतिमम्बुदस्य सहसे यन्न त्वमेतावता
वर्णेनैव परं मराल ! धवलः कृष्णश्चरित्रैरसि ॥ २

गाङ्गमम्बु(ङ्ग)सितमम्बु यामुनं, कज्जलाभमुभयं निमज्जतः ।
चीयते न च न चाऽपचीयते, राजहंस ! तव शुद्धपक्षता ॥ ३

सन्त्यन्यत्रापि वीचीचयचकितचलत्क्रोञ्चचञ्चुप्रभिन्न -
प्रोन्निद्राम्भोजरेणुप्रकरविरचनाहारिवारिप्रवाहाः ।
किन्तु स्वच्छाशयत्वं जगति न सुलभं तेन गत्वाऽपि दूरं
बद्धोत्कण्ठानुरागादनुसरति सरो मानसं राजहंसः ॥ ४

तटमनुतटं पद्मे पद्मे निवेशितमानसं
प्रतिकमलिनीपत्रच्छायं क्षणं क्षणमासितम् ।
नयनसलिलैरुष्णैः कोष्णाः कृता जलवीचयो
जलदमलिनां हंसेनाऽऽशां विलोक्य गमिष्यताम् ॥ ५

गतं तद्गाम्भीर्यं तटमुपचितं जालिकशतैः
सखे ! हंसोत्तिष्ठ त्वरितममुतो यामि सरसः ।
न यावत् पङ्काम्भःकलुषिततनुर्भूरि विलसन्
बकोटो वाचाटश्चरणयुगलं मूर्ध्नि कुरुते ॥ ६

स(स्म)रसि सरसि वीची मन्द(मम्बु)दोलायितानां
तदनु विलसताऽग्रं त्वन्मुखाद् यन्मयाऽऽत्तम् ।
इति मनसि निविष्टामालपेन्नैव हंसीं
त्यजति विरहखेदाज्जीवितं राजहंसः ॥ ७

अपसरणमेव युक्तं मौनं वा तत्र राजहंसस्य ।
कटु रटति निकटवर्ती वाचाटष्टिट्टिभो यत्र ॥ ८

स्थित्वा चिरं नभसि निश्चलतारकेण,
मातङ्गसङ्गमलिनां नलिनीं विलोक्य ।

उत्पन्नमन्यु परिघर्घरनिःस्वनेन,
हंसेन साश्रु परिहृत्य गतं नलीनम् ॥ ९

## ( २ ) चक्राष्टकम्

अस्तं मित्रे वापी कवलित-शतगुण-दिनान्तमेकेन ।
उत्कूजति कथय तथा वदन्ति चक्राष्टकं नाम ॥ १

अस्तं गतोऽयमरविन्दवनैकबन्धु-
र्भास्वान्न लङ्घयति कोऽपि विधिप्रणीतम् ।
चक्राङ्ग ! धैर्यमवलम्ब्य विमुञ्च शोकं
धीरास्तरन्ति विपदं न हि दीनचित्ताः ॥ २

मित्रे क्वापि गते सरोरुहवने बद्धानने क्लाम्यति
क्रन्दत्सु भ्रमरेसु वीक्ष्य दयिताश्लिष्टं पुरः सारसम् ।
चक्राङ्गेन वियोगिना बिशलता नास्वादिता नोज्झिता
वक्त्रे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥ ३

वापीतोयं तटतरुवनं पद्मिनी पत्रशय्या ।
चन्द्रालोको विकचकुमुदामोदहृद्यः समीरः ।
यत्रैतेऽपि प्रियविरहिणो दाहिनश्चक्रनाम्न-
स्तत्रोपायः क इह भवतः प्राणसन्धारणाय ॥ ४

कवलितमिह नालं कन्दलं चेह दृष्टं
इह हि कुमुदकोशे पीतमम्भः सुशीतम् ।
इति विरटति रात्रौ पर्यटन्ती तटान्ते
सहचरपरिमुक्ता चक्रवाकी वराकी ॥ ५

शतगुणपरिपाट्यो पर्यटन्नन्तराले
कुमुदकुवलयानामर्द्धरात्रेऽप्यखिन्नः ।

उपनदि दयितायाः क्वापि शब्दं निशम्य
भ्रमति पुलिनपुष्टे चक्रवच्चक्रवाकः ॥ ६

दिनान्ते चक्रवाकेन प्रियाविरहभीरुणा ।
तथा निःश्वसितं तेन, यथा नोच्छ्वसितं पुनः ॥ ७

एकेनार्कं प्रकटितरुषा पाटलेनाऽस्तसंस्थं
पश्यत्यक्ष्णाऽश्रुजललुलितेनाऽपरेण स्वकान्तम् ।
अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ सङ्कीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥ ८

उत्कूजति श्वसिति मुह्यति याति तीरं,
तीरान्तरं तरुतलात् पुनरेति वापीम् ।
वाप्यां न तिष्ठति न चात्ति मृणालखण्डं,
चक्रः क्षपासु विरहे खलु चक्रवाक्याः ॥ ९

कथय किमपि दृष्टं स्थानमस्ति श्रुतं वा,
व्रजति दिनकरोऽयं यत्र नाऽस्तं कदाचित् ।
इति विहगसमूहान्नित्यमापृच्छतीदं,
रजनिविरहभीतश्चक्रवाको वराकः ॥ १०

## ( ३ ) भ्रमराष्टकम्

येन कृत्वापि मातङ्गेऽन्यासु निराचष्टे च दूराच्च ।
प्रतिवेशिनिरानन्दो भ्रमराष्टकमेतदाख्यातम् ॥ १

येनामोदिनि केशरस्य मुकुले पीतं मधु स्वेच्छया
नीता येन निशाशशाङ्कधवले पद्मोदरे शारदी ।
भ्रान्तं येन मदप्रवाहमलिने गण्डस्थले दन्तिनां
सोऽयं भृङ्गयुवा करीरविटपे बध्नाति तुष्टिं कुतः ॥ २

कृत्वाऽपि कोशपानं, भ्रमरयुवा पुरत एव कमलिन्याः ।
अभिलषति बकुलकलिकां,
मधुलिहि मलिने कुतः सत्यम् ? ॥ ३

मातङ्गेन मदावलिप्तमतिना यत्कर्णतालानिलै-
र्दानार्थं समुपागता मधुलिहो दूरं समुत्सारिताः ।
तस्यैवाननमण्डनक्षितिरसौ भृङ्गाः पुनः सर्वतो
जीविष्यन्ति वनान्तरेषु विकसत्पुष्पासवैः सीधुभिः ॥ ४

अन्यासु तावदुपमर्द्दसहासु भृङ्ग !
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धामिमामसरसां कलिकामकाले,
बालां कदर्थयसि किं नवमालिकायाः ? ॥ ५

निराचष्टे यष्टिं कुरुबकतरोरब्जसरसा-
मसद्भावं ब्रूते वदति बकुलानामकुशलम् ।
वनान्ते चूतानामभवनमिहाख्यातवसता-
मसौ झिण्टीझाटे झटिति घटमानो मधुकरः ॥ ६

दूरादुज्झति चम्पकं न च भजत्यम्भोजराजीरजो
नो जिघ्रत्यपि पाटलापरिमलं धत्ते न चूते रतिम् ।
मन्दारे यदनादरी विचकिलोपान्ते च सन्तप्यते
तन्मन्ये क्वचिदङ्ग ! भृङ्गतरुणेनाऽऽस्वादिता मालती ॥ ७

प्रतिवेशी हंसजनः क्रीडाभवनानि पुण्डरीकाणि ।
हृद्यं मधुजलममलं मधुकर ! तत्रैव यदि रम(सर)सि (से) ॥८

निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
न साले सालम्बो लवमपि लवङ्गे न रमते ।

प्रियाङ्गे नो सङ्गं रचयति न चूतेऽभिरमते
स्मरन् लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥ ९

## ( ४ ) करभाष्टकम्

सरलित न भवति चिन्ता रूक्षं दुःप्राप वक्रमायाते ।
चर करभ सहितमस्यां कथितं करभाष्टकं नाम ॥ १

सरलितगलनालीं कन्धरां धत्स्व धैर्यात्
करभ ! लघु शमीनां ग्रासमेकं गृहाण ।
सरसमधुरपत्रास्ताः कुतः पीलुजात्यो
हरिततरुकरीरे रे ! मरौ याः प्ररूढाः ॥ २

न भवति मिथुनानां प्रेम लावण्ययोगा-
ज्जनयति सुखमन्तः कस्यचित् कोऽपि दृष्टः ।
पतति कुटिल(झटिति)दृष्टिर्दग्धदासेरकाणां
जरठभुरुटवल्लीपिञ्जरासु स्थलीषु ॥ ३

चिन्तां मुञ्च गृहाण पल्लवमिदं प्लक्षस्य शालस्य वा
गाङ्गस्याऽस्य जलस्य चन्द्रवपुषो गण्डूषमेकं पिब ।
जीवन् द्रक्ष्यसि ताः पुनः करभ हे ! दासेरकीया भुवो
रम्याः पीलुशमीकरीरबदरीः कूजत्कपोताकुलाः ॥ ४

रूक्षं वपुर्न च विलोचनहारि रूपं
न श्रोत्रयोः सुखदमारटितं कदाचित् ।
इत्थं न साधु तव किञ्चिदिदं तु साधु
तुल्ये रतिः करभ ! कण्टकिनि द्रुमे यत् ॥ ५

दुःप्रापमम्बु पवनः परुषोऽतितापी
छायाभृतो न तरवः फलभार नम्राः ।

इत्थं सखे ! करभ ! वच्मि भवन्तमुच्चैः
का सङ्गतिः खलु मरौ रमणीयतायाः ॥ ६

वक्रग्रीवमुदीक्षसे किमपरं बाष्पाम्बुपूर्णेक्षणः
कः खेदः करभाऽधुना तृणलवैः सन्तर्पयैतद्वपुः ।
कान्तान्तःस्फुरदोष्ठसम्पुटभुवो ये लीलयाऽऽन्दोलिता
मुक्तास्तेन च (नव)नीलकन्दल[दल]श्यामाः शमीपल्लवाः ॥७

आयाते दयिते मरुस्थलभुवां सञ्चिन्त्य दुर्लङ्घ्यतां
गेहिन्या(ः) परितोषबाष्पतरलामासाद्य सद्यो(दृष्टिं)-मुखे ।
दत्वा पीलुशमीकरीरकवलान् स्वेनाञ्चलेनादरात्
उन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः ॥ ८

चर करभ ! यथेच्छं सन्ति शष्पाण्यरण्ये
बहुकुसुमसमृद्धाः पीलवश्च स्थलीषु ।
यदि गणयसि वाक्यं बन्धुवर्गस्य दूरात्
परिहर करवीरं मृत्युरेवैष सद्यः ॥ ९

## ( ५ ) हरिणाष्टकम्

रज्ज्वा स्थलीनामसकृत् प्रियायाः, छित्त्वा द्रुत त्यक्त समेतमन्याः।
आद्यं पदं दर्शितमष्टभेदं, पूर्वप्रसिद्धं हरिणाष्टकस्य ॥ १

रज्ज्वा दिशः प्रविवताः सलिलं विषेण
पाशैर्मही(र्मुहुर्) हुतभुजा ज्वलिता वनान्ताः ।
व्याधाः पदान्यनुसरन्ति गृहीतचापाः
कं देशमाश्रयति यूथपतिर्मृगाणाम् ॥ २

स्थलीनां दग्धानामुपरि मृगतृष्णामनुसरं-
स्तृषार्त्तः सारङ्गो विरमति न खिन्नेऽपि मनसि ।
अजानानस्तत्त्वं न च मृगयतेऽन्यत्र सरसी-
मभूमौ प्रत्याश्या न च फलति विघ्नं च कुरुते ॥ ३

असकृदसकृन्नष्टाङ्गोऽयं मृगो मृगतृष्णिकां
श्रमपरिगतोऽप्युत्पक्ष्माक्षः परैति पुनः पुनः ।
गणयति न तन्मायातोयं हृतः सलिलाशया
भवति हि मतिस्तृष्णान्धानां विवेकपराङ्मुखा ॥ ४

प्रियायां स्वैरायामतिकठिनगर्भालसतया
किराते चाकर्णीकृतधनुषि धावत्यनुदिनम् ।
प्रियाप्रेमप्राणप्रतिभयवशात् पश्य विवशो
मृगः पश्चादालोकयति च मुहुर्याति च मुहुः ॥ ५

छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद् वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादतिजवेनोत्प्लुत्य धावन्मृगः
कूपान्तः पतितः करोतु विमुखे किं वा विधौ पौरुषम् ? ॥६

द्रुततरमितो गच्छ प्राणैः कुरङ्ग ! वियुज्यसे
किमिति वलितग्रीवं स्थित्वा मुहुर्मुहुरीक्ष्यते ।
विदधति हतव्याधा नैते मनागपि सार्द्रतां
कठिनमनसामेषामेते विलोकितविभ्रमाः ॥ ७

त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव मुक्ता स्थली
विश्रामस्थितिहेतवो न गणिता बन्धूपमाः पादपाः ।

बालापत्यवियोगदुःखविधुरा मुक्तऽर्धमार्गे मृगी
मार्गं तत्पदवीं तथाप्यकरुणा व्याधा न मुञ्चन्ति माम् ॥८

अन्यास्ता मलयाद्रिकाननभुवः स्वच्छश्रवन्निर्झरा -
स्तृष्णा यासु निवर्तते तनुभृतामालोकमात्रादपि ।
रूक्षध्वाङ्क्षपरिग्रहो मरुरसौ स्फारीभवद्भ्रान्तयः
ता एता मृगतृष्णिका हरिण हे ! नेदं पयो गम्यताम् ॥ ९

## ( ६ ) सिंहाष्टकम्

क्षुत्क्षाममत्तेभमृगैर्मृगारि-रद्यापि निद्रा प्रकृतिर्यथेष्टम् ।
विस्रं वपुस्साम नयश्च लोके सिंहाष्टकं कस्य मुदे न पुंसः ? ॥१

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविशालकुम्भदलनव्यायामबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केशरी ॥ २

मृगैर्नष्टं शशैर्लीनं, वराहैर्वलितं रुषा ।
हयानां हेषितं श्रुत्वा, सिंहैः पूर्ववदासितम् ॥ ३

मत्तेभकुम्भनिर्भेद-कठोरनखराशनिः ।
मृगारिरिति नाम्नैव लघुतामेति केशरी ॥ ४

मृगारिं वा मृगेन्द्रं वा, सिंहं व्याहरतां जनः ।
तस्य द्वयमपि व्रीडा, क्रीडादलितदन्तिनः ॥ ५

अद्यापि न स्फुरति केसरभारलक्ष्मी-
र्न प्रेष(ङ्ख)ति ध्वनितमद्रिगुहान्तरेषु ।
मत्तास्तथापि हरिणा(करिणो)हरिणाधिपस्य

पश्यन्ति भ्रान्तमनसः पदवीं वनेषु (?) ॥ ६

निद्राघूर्णितलोचनो मृगपतिर्यावद् गुहां सेवते
तावत् स्वैरममी चरन्तु हरिणाः स्वच्छन्दसञ्चारिणः ।
उन्निद्रस्य विधूतकेसरसटाभारस्य निर्गच्छतो
नादे श्रोत्रपथं गते हतधियां सन्त्येव दीर्घा दिशः ॥ ७

प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः ।
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ॥८

यथेष्टं चेष्टध्वं मदमलिनगण्डाः करटिनः ।
तटान्यद्रेर्मन्दं विकषत विषाणैश्च महिषाः ।
सरागं सारङ्गाः ! सह सहचरीभिर्विचरताऽ-
प्रचारः सिंहानामिह न विधिना हन्त विहितः ॥ ९

विस्त्रं वपुः परवधप्रवणं च कर्म
तिर्यक्तयैव कथितः सदसद्विवेकः ।
इत्थं न किञ्चिदपि साधु मृगाधिपस्य,
तेजस्तु तं स्फुरति यस्य जगद् वराकम् ॥ १०

सामोपायनयः प्रपञ्चपटवः प्रायेणः ये भीरवः
शूराणां व्यवसाय एव हि परं संसिद्धये कारणम् ।
विस्फूर्जद्विकटाटवीगजघटाकुम्भैकसञ्चूर्णन-
व्यापारैकरसस्य सन्ति विजये सिंहस्य के मन्त्रिणः ॥ ११

## ( ७ ) धवलाष्टकम् ॥

मार्गे नखनसि(ति)चानसि न ध्वानं गुरुर्यथात्र यस्यादौ ।
ऊ(व्यू)ढा येन सुधवलैर्गदितं धवलाष्टकं नाम ॥ १

मार्गे कर्दमदुस्तरे जलभृते गर्त्ताशतैराकुले
खिन्ने शाकटिके भरेऽतिविषमे दूरं गते रोधसि ।
शब्देनैतदहं ब्रवीमि महता कृत्वोत्थितां तर्जनी-
मीदृक्षे विषमे विहाय धवलं वोढुं भरं कः क्षमः ? ॥ २

नखनसि(ति)खुरैः क्षोणीपृष्टं न नर्दति सादरं
प्रकृतिपरुषं प्रेक्ष्यासन्नं न कुप्यति गोतरम् ।
वहति च धुरं धुर्यो धैर्यादनुद्धरकन्धरो
जगति गुणिनः कार्यौदार्या[त्]परानतिशेरते ॥ ३

अनसि सीदति सैकतवर्त्मनि प्रचुरभारभरक्षपितोक्षणि ।
गुरुभरोद्धरणोद्धुरकन्धुरं स्मरति सारथिरन्यधुरन्धरम् ॥ ४

न ध्वानं कुरुषे न यासि विकृतिं नोच्चैर्वहस्याननं
दर्पान्नोल्लिखसि क्षितिं खुरपुटैर्नाऽवज्ञया वीक्षसे ।
किन्तु त्वं वसुधातलैकधवलः स्कन्धाधिरूढे भरे
तीव्राण्युच्चतटे विटङ्कविषमाण्युल्लङ्घयन् लक्ष्यसे ॥ ५

गुरुर्नाऽयं भारः क्वचिदपि न पन्थाः स्थपुटितो
न ते कुण्ठा शक्तिर्वहनमपि नाऽङ्गेन विकलम् ।
इह द्रङ्गे नाऽन्यस्तव गुमसमानस्तदधुना
धुनानेन स्कन्धं धवल ! किमु मुक्तः पथि भरः ? ॥ ६

यथा भग्नः पन्थाः परुषविषमग्रावगहने
गलीनां नाऽङ्गानि स्पृशति च यथा सारथिरयम् ।
यथा चैते दृप्ताः खवलितभुवो यान्ति वृषभा-
स्तथा दूरीभूतः स खलु धवलो नूनमधुना ॥ ७

यस्यादौ व्रजमण्डनस्य बहुभिर्व्यूढा न गुर्वी धुरा
धौरेयैः प्रगुणीकृतो न युगपत् स्कन्धः समस्तैरपि ।
तस्यैव श्लथकम्बलस्य धवलस्योत्थापने साम्प्रतं
द्रङ्गेऽत्रैव जरावसादिततनोर्गोः पुण्यमुद्घुष्यते ॥ ८

व्यूढा येन महाधुरा सुविषमे मार्गे सदैकाकिना
सोढो येन कदाचिदेव न निजे गोष्ठेन्यसण्डध्वनिः ।
आसीद् यश्च गवां गणस्य तिलकस्तस्यैव सम्प्रत्यहो !
धिक्कष्टं धवलस्य जातजरसो गोः पण्यमुद्घुष्यते ॥ ९

## ( ८ ) नरवृत्ताष्टकम्

दक्षो दानं स्तब्धो दुर्मन्त्री शुष्कमिन्धनं त्यजति ।
अर्थः ऋ(र)तौ लोके वा, नरवृत्ताष्टकं नाम ॥ १

दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्योगी विद्यान्तं धर्मार्थयशांसि च विनीतः ॥ २

दानं दरिद्रस्य विभोः प्रशान्ति-र्यूनां तपो ज्ञानवतां च मौनम् ।
इच्छानिवृत्तिश्च सुखोचितानां, दया च भूतेषु दिवं नयन्ति ॥३

स्तब्धस्य नश्यति यशो विषमस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ ४

दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः
सन्तापयन्ति कमपथ्य भुजं न रोगाः ।

कं श्रीर्न दर्पयति कं न निहन्ति तृष्णा
कं स्वीकृता न विषयाः परितापयन्ति ॥ ५

शुष्केन्धनैर्वह्निरुपैति वृद्धिं, मूर्खेषु कोपश्चपलेषु शोकः ।
कान्तासु कामो निपुणेषु वित्तं,
धर्मो दयावत्सु महत्सु धैर्यम् ॥ ६

त्यजति भयमकृतपापं मित्राणि शठं प्रमादिनो विद्या ।
ह्रीः कामिनमलसं श्रीः स्त्री क्रूरं दुर्जनो लोकः ॥ ७

अर्थस्य मूलं निकृतिः क्षमा च, कामस्य वित्तं च वपुर्वयस्य ।
धर्मस्य दानं हि दयादमौ च, मोक्षस्य सर्वार्थनिवृत्तिरेव ॥८

रतौ विवाहे व्यसने रिपुक्षये
प्रियासु नारीषु धनेषु बन्धुषु ।
यशस्करे कर्मणि मित्रसङ्ग्रहे-
ष्वतिव्ययो नास्ति नराधिपाऽष्टसु ॥ ९

## ( ९ ) वानरवल्लभाष्टकम्

माधुर्यमुत्साहसुजीर्णरूपं श्रुतेन शाठ्येन जवो हि वैद्यम् ।
नीतिप्रिया वानरवल्लभेन, उल्लिङ्गनावृत्तमुदाजहार ॥ १

माधुर्यं प्रमदाजने सुललिते दाक्षिण्यमार्ये जने
शौर्यं शत्रुषु मार्दवं परिजने धर्मिष्ठता साधुषु ।
मर्मज्ञेष्वनुवर्त्तना बहुविधा मानं जने गर्विते
शाठ्यं पापजने नरस्य कथितं पर्याप्तमष्टौ गुणाः ॥ २

उत्साहसम्पन्नमदीर्घसूत्रिणं, क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च,
लक्ष्मीः स्वयं वाञ्छति वासहेतोः ॥ ३

सुजीर्णमन्नं सुविचक्षणः सुतः, सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं,
तद्दीर्घकालेऽपि न याति विक्रियाम् ॥ ४

रूपं जरा सर्वसुखानि तृष्णा, खलेषु सेवा पुरुषाभिमानम् ।
याच्ञा गुरुत्वं गुणमात्मशंसा,
चिन्ता बलं हन्ति दयां च लक्ष्मीः ॥ ५

श्रुतेन बुद्धिर्व्यसनेन मूर्खता, प्रियेण नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृतिः समाधिना, नयेन चालङ्क्रियते नरेन्द्रता॥६

शाठ्येन मित्रं कपटेन धर्मं, परोपतापेन समृद्धिभावम् ।
सुखेन विद्यां परुषेण नारीं, वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥७

जवो हि सप्तेः परमं विभूषणं, त्रपाऽङ्गनायाः कृशता तपस्विनः।
द्विजस्य विद्यैव मुनेरपि क्षमा,
पराक्रमः शस्त्रबलोपजीविनाम् ॥ ८

वैद्यं पानरतं नटं कुपठितं मूर्खं परिव्राजकं
योधं कापुरुषं विटं गतवयं स्वाध्यायहीनं द्विजम् ।
राज्यं बालनरेन्द्रमन्त्रिरहितं मित्रं छलान्वेषिणं
भार्यां यौवनगर्वितां पररतां मुञ्चन्ति ये पण्डिताः ॥ ९

## ( १० ) भग्नाशस्या( दैवा )ष्टकम्

वीचीकैवर्त्त यद्भग्नं तथा शशिदिवाकरम् ।
अलं सृजति पौष्याश्च, भग्नाशस्या(दैवा)ऽष्टकं विधेः ॥ १

वीचीव्यासचयं निरुद्धवसुधं क्वाऽगाध(र)रन्ध्रं पयो
गोलाङ्गूलविलोलपाणितुलिताः क्षुद्राः क्व ते क्ष्माभृतः ।
बद्ध्वा दाशरथिस्तथापि जलधिं प्रत्याजहार प्रियां
ग्रावाणोऽपि तरन्ति वारिणि यदा पुंसोऽनुकूलो विधिः ॥ २

कैवर्त्तकर्कशकरग्रहणच्युतोऽपि
जाले पुनर्निपतितः शफरो वराकः ।
जालादपि प्रगलितो गलितो बकेन
वामे विधौ बत कुतो व्यसनान्निवृत्तिः ? ॥ ३

यद्भग्नं धनुरीश्वरस्य शिशुना यज्जामदग्न्यो जित-
स्त्यक्ता येन गुरोर्गिरा वसुमती बद्धो यदम्भोनिधिः ।
एकैकं दशकन्धरक्षयकृतो रामस्य किं वर्ण्यते
दैवं वर्णय येन सोऽपि सहसा नीतः कथाशेषताम् ॥ ४

शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च समीक्ष्य दरिद्रतां विधिरहो ! बलवानिति मे मतिः॥५

अलङ्कारः शङ्काकरनरकपालं परिकरो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको गतवयाः ।
अवस्थेयं स्थाणोरपि भवति यत्राऽमरगुरो-
र्विधौ वक्त्रे मूर्ध्नि स्थितवति वयं के पुनरमी ? ॥ ६

सृजति तावदशेषगुणालयं पुरूषरत्नमलङ्करणं भुवः ।
तदनु तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥७

पौष्यां पञ्च शराः शरासनमपि ज्याशून्यमिक्षोर्लता(ष्वासनं)
जेतव्यं जगतां त्रयं स च पुनर्जेताऽप्यनङ्गः किल ।
इत्याश्चर्यपरम्पराघटनया चेतश्चमत्कारयन्
व्यापारः सुतरां विचारपदवीवन्ध्यो विधेर्वन्द्यताम् ॥ ८

भग्नाशस्य करण्डपिण्डिततनोर्ग्लानेन्द्रियस्य क्षुधा
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये चाऽऽकुलम् ॥ ९

## ( ११ ) मेघाष्टकम्

सुखयसि विलपति यत्त्वं तृषार्त्तमेतानि वितर हे मेघ ! ।
अयि जल[द] मामभ्युन्नत-मिदमम्बुधराष्टकं नाम ॥ १

सुखयसि तृषोत्रास्यत्तालुस्खलद्ध्वनिविह्वलं
कतिपयपयोबिन्दुस्यन्दैर्न चातकमागतम् ।
जलधर ! यदा कालात् कोऽपि प्रचण्डसमीरणः
प्रवहति तदा न त्वं नाऽयं न ते जलबिन्दवः ॥ २

विलपति तृषा सारङ्गोऽयं भवानयमुन्नतो
जलमपि च ते संयोगोऽयं कथञ्चिदुपस्थितः ।
उपकृतिकृते प्रह्वं चेतः कुरुष्व यदग्रतो
भ्रमति पवनः क्व त्वं क्वाऽयं क्व वा जलसंहतिः ॥ ३

यत्तद् गर्जितमूर्जितं यदपि च प्रोद्दामसौदामिनी-
दानाडम्बरमम्बरे विरचितं यद्दूरमभ्युन्नतम् ।
तेषां पर्यवसानमेतदधुना जातं यदम्भोधरं(रा)
द्वित्रां कृत्रिमरोदनाश्रुतनवोन्मुक्ताः पयोबिन्दवः ॥ ४

तृषार्त्ते पाथोद ! प्रलपति पुरश्चातकशिशौ
यदेतन्नैष्ठुर्यं तदिह गदितुं मां त्वरयति ।
विपद् वा स्वाधीना किमुत जडता वा परिणता
मरुद्वानो वास्यत्यथ घन ! शरद् वा न भवति ॥ ५

एतान्यहानि किल चातकशावकेन,
नीतानि कण्ठकुहरे स्थितजीवितेन ।
तस्यार्थिनो जलद ! पूरय वाञ्छितानि,
मा भूत् त्वदेकशरणस्य बत प्रमादः ॥ ६

वितर वारिद ! वारि तृषातुरे, त्वरितमुद्यतचातकशावके ।
मरुति विस्फुरति क्षणमन्यथा,
क्व च भवान् क्व पयः क्व च चातकः ॥ ७

हे मेघ ! मानमहितस्य तृषातुरस्य
त्यक्तत्वदन्यशरणस्य च चातकस्य ।
अम्भःकणान् कतिचिदप्यधुना विमुञ्च
नो चेद् भविष्यसि जलाञ्जलिदानयोग्यः ॥ ८

अयि जलद ! यदि न दास्यसि, ?
कतिचित् त्वं चातकाय जलकणिकाः ।
तदयमचिरेण भविता, सलिलाञ्जलिदानयोग्यस्ते ॥ ९

मामभ्युन्नतमागतोऽयमिति वा कामं समासेवते
मच्छायामिति वा यदन्यविषयं तद् द्वेष्टि वारीति वा ।
सद्यो वर्ष वराक चातककृते नो चेदयं याचिता
याच्ञां यावदुपेक्षणं च जलद ! व्रीडाकरं त्वादृशाम् ॥ १०

## ( १२ ) समुद्राष्टकम्

एतस्मात् किं ब्रूमो लक्ष्म्या दूरादयमितोद्या(या)मा ।
आदाय पादैर्गदितं सुमुखि ! समुद्राष्टकं नाम ॥ १

एतस्माज्जलधेर्जलस्य कणिकाः काश्चिद् गृहीत्वा ततः
पाथोदाः परिपूरयन्ति जगतीं रुद्धाम्बरा वारिभिः ।
भ्राम्यन् मन्दरकूटकोटिघटनाभीतिभ्रमत्तारिकां
प्रापैकां जलमानुषीं त्रिभुवने श्रीमानभूदच्युतः ॥ २

किं ब्रूमो जलधेः श्रियं स हि खलु श्रीजन्मभूमिः स्वयं ।
वाच्यं किं महिमापि यस्य हि तव द्वीपं महीति श्रुतिः (?) ।
त्यागस्तस्य च कोऽपि बिभ्रति जगद् यस्याऽर्थिनो ह्यम्बुदाः
शक्तेर्यस्य कथैव का हि भवति क्षोभेण कल्पान्तरम् ॥ ३

लक्ष्म्यास्त्वं निलयो निधिश्च पयसां निःशेषरत्नाकरो
मर्यादानिरतस्त्वमेव जलधे ! ब्रूतेऽत्र कोऽन्यादृशम् ।
किन्त्वेकस्य गृहागतस्य वडवावह्नेः सदा तृष्णया (?) ।
क्लान्तस्योदरपूरणेऽपि न सहो यत्तून्मनाग् मध्यमः ॥ ४

दूरान्मार्गग्लपितवपुषो मारुतोत्तम्भितान्तः-
कल्लोलालीबहलवितृषो धाविताः पान्थसार्थाः ।
व्यावर्त्तन्ते तटमुपगता यस्य विच्छिन्नवाञ्छा -
स्तस्याऽम्भोधेर्विफलपयसः कार्यतः किं न शुष्कम् ? ॥ ५

अयं वारामेको निलय इति सञ्चिन्त्य सहसा
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥ ६

इतो वसति केशवः पुरमितस्तदीयद्विषा-
मितोऽपि शरणागता शिखरिपक्षिणः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्त्तकै-
रहो ! विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ७

या(द्या)मारोहति वाञ्छति स्थगयितुं तेजांसि तेजस्विना -
मुच्चैर्गर्जति पूरयत्यपि महीमम्भोभिरम्भोधरः ।
कांश्चिद् द्रागुपजीव्य तोयचुलुकान् सिन्धो ! भवत्सन्निधौ
पानीयप्रचयेषु सत्स्वपि न ते जातो विकारः क्वचित् ॥ ८

आदाय वारि परितः सरितां शतेभ्यः
किं नाम साधितमनेन महार्णवेन ।
क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरेषु निवेशितं च ॥ ९

## ( १३ ) सत्पुरुषाष्टकम्

शीतांशुस्ते केचिन् नम्रत्वे ये करे विपदि वाञ्छा ।
गर्वमिति चन्द्रवदने सत्पुरुषाष्टकमिदं गदितम् ॥ १

शीतांशुः किं सुधायामभवदुत सुधैवाभवच्छीतरश्मे-
राहोश्विद् द्वावपीमौ मृगदृशि घटितावेतयोः किं मृगाक्षी ।
एकैकं सज्जनाद्वा समजनि जनितः सज्जनो वा किमेभिः
सन्देहश्चाऽयमित्थं कथमपि मनसो जीवतां न प्रयातः ॥ २

ते केचिन्निजकान्तिसुन्दरतया चेतश्चमत्कारिणो
दृश्यन्ते परमोत्सवं नयनयोः सम्पादयन्तो जनाः ।
अन्तर्ये मनसः प्रविश्य सहसा तैस्तैः स्वकीयैर्गुणै-
राजन्मावधि नोत्तरन्ति हृदयादुत्कीर्णबिम्बा इव ॥ ३

नम्रत्वेनोन्नमन्तः परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः
पुष्णन्तः स्वीयमर्थं सततकृतमहारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्जनान् दुःखयन्तः ।
सन्तः स्वाश्चर्यचर्याः स्वयमिह मुनयो वन्दनीया भवन्ति ॥ ४

ये प्राप्ते व्यसनेऽप्यनाकुलधियः सम्पत्सु नैवोन्नताः
प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणोपभोगैरपि ।
ह्रीमन्तः स्वगुणप्रपञ्चनविधावन्यस्तुतावुत्सुका
धिग् धात्रा कृपणेन तेऽपि न कृताः कल्पान्तदीर्घायुषः ॥ ५

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयिभुजयोः पौरुषमलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमवितथं च श्रवणयो-
र्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ६

विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
असन्तो नाभ्यर्थ्याः सुहृदपि न वाच्यः कृशधनः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ७

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम् ।

भक्तिश्चाऽर्हति शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्मलगुणाः श्लाघ्यास्त एव क्षितौ ॥ ८

गर्वं नोद्वहते न निन्दति परं नो निष्ठुरं भाषते
प्रोक्तः केनचिदप्रियाणि सहते क्रोधं च नालम्बते ।
श्रुत्वा काव्यमलक्षणं परकृतं सन्तिष्ठते मूकवत्
दोषान् छादयति स्वयं न कुरुते चैतत् सतां लक्षणम् ॥ ९

## ( १४ ) गजाष्टकम्

चिन्तामन्तः कौपं रेवा दन्ते तथैव नो मन्ये ।
न चरति घासग्रासं गजाष्टकं विश्रुतं लोके ॥ १

चिन्तामिमां वहसि किं गजयूथनाथ !
योगीव योगमनुमीलितनेत्रयुग्मम् ।
पिण्डं गृहाण पिब वारि यथोपनीतं
दैवाद् भवन्ति विपदः खलु सम्पदो वा ॥ २

अन्तःसमुत्थविरहानलतीव्रताप-
सन्तापिताङ्ग ! करिपुङ्गव ! मुञ्च शोकम् ।
धात्रा स्वहस्तलिखितानि ललाटपट्टे
को वाऽक्षराणि परिमार्जयितुं समर्थः ? ॥ ३

कौपं वारि विलोक्य वारणपते ! किं विस्मितेनाऽऽस्यते
प्रायो भाजनमस्य सम्प्रति भवांस्तत् पीयतामादरात् ।
उन्मज्जच्छफरी-पुलिन्दललनापीनस्तनास्फालन-
स्फारीभूतमहोर्मिनिर्मलजला दूरेऽधुना नर्मदा ॥ ४

रेवापयः किशलयानि च सल्लकीनां
विन्ध्योपकण्ठगहनं स्वकुलं च हित्वा ।

किं ताम्यसि द्विप ! गतोऽसि वशं करिण्याः
स्नेहो हि कारणमनर्थपरम्परायाः ॥ ५

दन्ते न्यस्तकरः प्रलम्बितशिराः सम्मील्य नेत्रद्वयं
किं त्वं वारण ! खिद्यसे वनितया को नाम नो वञ्चितः ।
भूत्वा शान्तमना गृहाण कवलं स्नेहोऽधुना त्यज्यतां
ये मत्तास्त्वविवेकिनो विषयिणस्ते प्राप्नुवन्त्यापदम् ॥ ६

नो मन्ये दृढबन्धनं कृतमिदं नैवाङ्कुशोद्घातनं
स्कन्धारोहणताडनात् परिभवो नैवाऽन्यदेशागमः ।
चिन्तां मे जनयन्ति चेतसि यथा स्मृत्वा स्वयूथं वने
सिंहत्रासितभीतभीरुकलभा यास्यन्ति कस्याऽऽश्रयम् ? ॥७

न चरति वनराज्यां पल्लवान् शल्लकीनां
न पिबति गिरिकुञ्जे नैर्झरं वारि हारि ।
विततरदनकोटौ दत्तहस्तावलम्बो
वहति विरहखिन्नः शोकभारं करीन्द्रः ॥ ८

घासग्रासं गृहाण त्यज करिकलभ ! प्रीतिबन्धं करिण्याः
पाशग्रन्थिव्रणानामविरतमधुना देहि पङ्कानुलेपम् ।
दूरीभूतास्तवैते शबरवर(कुल)वधूविभ्रमोद्भ्रान्तिदृष्टा
रेवातीरोपकण्ठद्रुम(च्युत)कुसुमरजोधूसरा विन्ध्यपादाः ॥९

## ( १५ ) वृक्षाष्टकम्

किं जातोऽस्थ जातोऽसि, भुक्तं मूलं तथैव किं ते ।
न्यग्रोधपान्थाश्च हंहो ! भ्राम्यद् वृक्षाष्टकं शृणु(त) ॥ १

किं जातोऽसि चतुःपथे घनतरं छन्नोऽसि किं छायया
छन्नश्चेत् फलितोऽसि किं यदि फलैः पूर्णोऽसि किं सन्नतः ।

हे सद्वृक्ष ! सहस्व सम्प्रति चिरं शाखाशिखाकर्षणं
क्षोभामोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः ॥ २

जातो मार्गे सुरभिकुसुमः सत्फलो नम्रशाखः
स्फीताभोगो बहलविटपः स्वादुतोयोपगूढः ।
नैवात्मार्थं वहसि महतीं पादपेन्द्र ! श्रियं ता-
मापन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥ ३

भुक्तं स्वादुफलं कृतं च शयनं शाखाग्रजैः पल्लवैः
स्वच्छायापरिशीतलं च सलिलं पीतं व्यपेतक्लमैः ।
विश्रान्ताः सुचिरं परा मनसः प्रीतिः किमत्रोच्यते ।
त्वं सन्मार्गतरुर्वयं च पथिका यामः पुनर्दर्शनम् ॥ ४

मूलं योगिभिरुद्धृतं निवसितं वासोर्थिभिर्वल्कलं
भूषार्थी च जनश्चिनोति कुसुमं भुङ्क्ते क्षुधार्त्तः फलम् ।
छायामातपिनो विशन्ति विचिता निद्रालुभिः पल्लवाः
कल्पाख्यस्य तरोरिवेह भवतः सर्वाः परार्थाः श्रियः ॥ ५

किं ते नम्रतया किमुन्नततया किं वा घनच्छायया ।
किं वा पल्लवलीलया किमनया चाशोक ! पुष्पश्रिया ।
यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोमः स्तुवन्नन्वहं
न स्वादूनि मृदूनि खादति फलान्याकण्ठमुत्कण्ठितः ॥ ६

न्यग्रोधे फलशालिनि स्फुटरसं किञ्चित् फलं पच्यते
बीजान्यङ्कुरगोचराणि कतिचित् सिध्यन्ति तस्मिन्नपि ।
एकस्तेष्वपि कश्चिदङ्कुरवरो बध्नाति तामुन्नतिं
यामध्यास्य जनः स्वमातरमिव क्लान्तिच्छिदे धावति ॥ ७

पान्थाधार इति द्विजाश्रय इति श्लाघ्यस्तरूणामिति
स्निग्धच्छाय इति प्रियो दृश इति स्थानं गुणानामिति ।
यावत् तत्क्षणमाश्रयन्ति गुणिनः क्लान्तिच्छिदे पादपं
तावत् कोटरनिर्गतैरहिगणैर्दूरं समुत्सारिताः ॥ ८

हंहो पान्थ ! किमाकुलं श्रमवशादत्युद्धतं धावसि
प्रायेणाऽस्यमहाद्रुमस्य भवता वार्ताऽपि नाऽऽकर्णिता ।
मूलं सिंहसमाकुलं तु शिखरे प्रोच्चण्डतुण्डाः खगा
मध्ये कोटरभाजि भीषणफणाः पूत्कुर्वते पन्नगाः ॥ ९

भ्राम्यद्भृङ्गधराऽवनम्रकुसुमस्तोमोद्भवद्गन्धिषु
छायावत्सु तलेषु पान्थनिचया विश्रम्य गेहेष्विव ।
निर्यन्निर्झरवारिवारिततृषस्तृप्यन्ति येषां फलै-
स्ते नन्दन्तु फलन्तु यान्तु च परामभ्युन्नतिं पादपाः ॥ १०

## ( १६ ) बप्पीहाष्टकम् ( सारङ्गाष्टकम् )

बीजैरन्ये हा धिक् योऽयं किं नाम विरम चान्ये ते ।
हंहो चातकशब्दै-र्बप्पीहस्या(सारङ्गा)ष्टकं नाम ॥ १

बीजैरङ्कुरितं लताभिरुदितं वल्लीभिरुज्जृम्भितं
कन्दैः कन्दलितं जनैः प्रमुदितं धाराधरे वर्षति ।
भ्रातश्चातक ! पातकं किमपि ते सम्यग् न जानीमहे
येनास्मिन्न पतन्ति चञ्चुपुटके द्वित्राः पयोबिन्दवः ॥ २

अन्येऽपि सन्ति भुवि(नव)तामरसावतंसा
हंसावलीवलयिनो जलसन्निवेशाः ।
कोऽपि ग्रहो गुरुरयं हतचातकस्य
पौरन्दरीं यदभिवाञ्छति वारिधाराम् ॥ ३

हा धिक् ! पर(कथं)व्यसनदुर्ललितस्य(स्म)येन
केनापि रे सरलचातक ! वञ्चितोऽसि ।
येनाऽम्बुवाहमपि याचसि याचितस्य
यस्याऽस्य याचितुरिवाऽतिमलीमसत्वम् ॥ ४

योऽयं वारिधरो धराधरशिरस्यभ्युन्नतः केवलं
गर्जत्येव गभीरधीरनिनदैर्नाऽयं सखे ! वारिदः ।
तत्ते चातक ! पातकस्य कतमस्यैतत् फलं पच्यते
येनाऽसौ न ददाति याति च न ते चेतोऽपि निर्वाणताम ॥ ५

किं नाम दुष्कृतमिदं भवतश्चकास्ति
येनात्र दैन्यपिशुनं बत याचितोऽपि ।
एतेऽपि कामनिभृतोन्नतयोऽपि तृप्त्यै
मुञ्चन्ति चातक ! पयो न पयोमुचस्ते ॥ ६

विरम चातक ! दैन्यमपास्यतां,
बत चटूनि कियन्ति करिष्यसि ? ।
विधिविनिर्मितमम्बुकणद्वयं,
किमधिकं कलयाऽपि भविष्यति ? ॥ ७

अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ये
भ्रातश्चातक ! किं वृथाऽत्र रटितैः खिन्नोऽसि विश्रम्यताम् ।
मेघः शारद एष काशधवलः पानीयरिक्तोऽधरो
गर्जत्येव हि केवलं भृशमपां नो बिन्दुमप्युज्झति ॥ ८

## ( १७ ) रत्नाष्टकम्

पथि परिहृत कनक मनस्तमित विरम रत्न केन सन्त्यन्ये ।
एकस्मिन् वणिगधिपते पादै रत्नाष्टकं गदितम् ॥ १

पथि परिहृतं कैश्चिद् दृष्ट्वा न जातु परीक्षितं
विधृतमपरैः काचं मत्वा पुनः परिवर्जितम् ।
गवलगणनामन्यैः कृत्वाऽपघृष्टमपण्डितै-
र्मरकतमहो ! मार्गावस्थं कथं न विडम्बितम् ॥ २

कनकभूषणसङ्ग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते ।
न च विरौति न चापि स शोभते, भवति योजयितुर्वचनीयता॥३

अनस्तमितसारस्य, तेजसस्तद्विजृम्भितम् ।
येन पाषाणखण्डस्य मूल्यमल्पं वसुन्धरा ॥ ४

विरम रत्न ! मुधा तरलायसे,
तव न कश्चिदिहास्ति परीक्षकः ।
विधिवशेन परिच्युतमाकरात्,
त्वमपि काचमणिः कृतमीश्वरैः ॥ ५

केनानीतः सुखमकरुणेनाऽऽकरादुद्धृतस्त्वं
विक्रेतुं वा समभिलषितः केन देशान्तरेऽस्मिन् ।
यस्मिन् वित्तव्ययभरसहो ग्राहकस्तावदास्तां
नास्ति भ्रातर्मरकतमणे ! त्वत्परीक्षाक्षमोऽपि ॥ ६

सन्त्यन्ये झषकेतनस्य मणयः किं नो(वो)ल्लसत्कान्तयः
किं वा तेऽपि जने न भूषणपदं न्यस्ता न शोभाभृतः ।
अन्यः कोऽपि तथापि कौस्तुभमणिः स्फीतस्फुरद्दीधिति-
र्यः पूषेव नभः समुज्ज्वलयति स्फारं मुरारेरुरुः (रः) ॥ ७

एकस्मिन् दिवसे मया विचरता प्राप्तः कथञ्चिन्मणि-
र्मूल्यं यस्य न विद्यते भवति चेत् पृथ्वी समस्ता ततः ।

सोऽयं दैववशादभूदतितरां काचोपमः साम्प्रतं
किं कुर्मः किमुपास्महे क्व स सुहृद् यस्याऽयमावेद्यते ॥ ८

वणिगधिपते ! किञ्चित् ब्रूमः क्रुधामिह मा कृथाः
कथय निभृतं केयं नीतिः पुरे तव सम्प्रति ।
मरकतमणिः काचो वाऽयं भवेदिति संशये
लवणवणिजां यद्व्यापारः परीक्षितुमीक्ष्यते ॥ ९

## ( १८ ) देवाष्टकम्

जातस्त्वं भुवनाधिपो यदि ततः किं सिद्धमेतावता
प्राप्तो वा यदि निःस्वतां विधिवशात् तेनापि किं ते गतम् ।
तस्मात् तोष-विषादबन्धनमिदं व्याधूय सञ्चिन्त्यतां
ज्योतिर्यत्र लयं गते त्रिभुवनेऽप्यामा(भा?) समालोक्यते ॥१

भ्रातर्मोह ! विमुञ्च खेदमसमं ये राज्यवचा(?)र्गलां
भित्त्वा धा(सा?)रधियो वनाय चलितास्तेषां न मल्लो भवान् ।
प्रज्ञाभिर्दृढकर्मपाशवलये(यो)च्छेदाक्षमास्त(स्त्व)द्भयाद्
दाराद्यैर्बिसतन्तुभिर्निगडितास्तिष्ठन्ति ये ते वयम् ॥ २

त्रैलोक्यं सकलं त्रिकालविषयं मा लोकमालोकितं (?)
साक्षाद् येन यथा स्वयं करतले रेखात्रयं साङ्गुलि ।
रागद्वेषभयामयान्तकजरालोकत्वलोभादयो
नाऽलं यत्पदलङ्घनाय स महादेवो मया वन्द्यते ॥ ३

यो विश्वं वेद वेद्यं जननजलनिधेर्भङ्गिनः पारदृश्वा
पौर्वापर्याविरुद्धं वचनमनुपमं निष्कलङ्कं यदीयम् ।
तं वन्दे साधुवन्द्यं सकलगुणनिधिं ध्वस्तदोषद्विषन्तं
बुद्धं वा वर्धमानं शतदलनिलयं केशवं वा शिवं वा ॥ ४

माया नास्ति जटा न चापि मुकुटं चन्द्रो न मूर्धावली
खट्वाङ्गं न च वासुकिर्न च धनुः शूलं न चोग्रं मुखम् ।
कामो यस्य न कामिनी न च वृषो गीतं च नृत्यं पुनः
सोऽयं पातु निरञ्जनो जिनपतिः सर्वत्र सूक्ष्मः शिवः ॥ ५

दग्धं येन पुरत्रयं शरभुवा तीव्रार्चिषा वह्निना
यो वा नृत्यति मत्तवत् पितृवने यस्याऽऽत्मजो वा गुहः ।
योऽयं किं मम शङ्करो भयतृषारोषार्त्तिमोहक्षयं
कृत्वा यः स तु सर्ववित् तनुभृतां क्षेमङ्करः शङ्करः ॥ ६

पत्राद् (?) येन विदारितं कररुहैर्दैत्येन्द्रवक्षःस्थलं
सारथ्येन धनञ्जयस्य समरे योऽमारयत् कौरवान् ।
.................................................
..............................नासौ विष्णुर्विशिष्टो मम ॥ (?)७

एको नृत्यति विप्रसार्थ कु(क)कुभां चक्रे सहस्रं भुजा-
मेकः शेषभुजङ्गभोगशयने व्यादाय निद्रायते ।
दृष्ट्वा चारुतिलोत्तमासु(मु)खमगादेकश्चतुर्वक्त्रता -
मेते मुक्तिपदं वदन्ति विदुषामित्येतदत्यद्भुतम् ॥ ८

## ( १९ ) निन्दाष्टकम्

श्रुत्वा श्रद्धाय सम्यक् शुभगुरवचनं वेश्मवासं निरस्य
प्रव्रज्याऽथो पठित्वा बहुविधतपसा शोषयित्वा शरीरम् ।
धर्मध्यानाय यावत् प्रभवति समयस्तावदाकस्मिकीयं
प्राप्ता मोहस्य धाटी तडिदिव विषमा हा ! हताः कुत्र यामः ?॥१

एकेनाऽपि महाव्रतेन यतिनः खण्डेन भग्नेन वा
दुर्गत्यां पततो न सोऽपि भगवानीष्टे स्वयं रक्षितुम् ।
हत्वा तान्यखिलानि दुष्टमनसो वर्तामहे ये वयं
तेषां दण्डपदं भविष्यति कियज्जानाति तत् केवली ॥ २

कट्यां चोलपटं तनौ सितपटं कृत्वा शिरोलोचनं
स्कन्धे कम्बलिकां रजोहरणकं निक्षिप्य कक्षान्तरे ।
वक्त्रे वस्त्रमुखं विधाय ददतः श्रीधर्म्मलाभाशिषं
वेषाडम्बरिणः स्वजीवनकृते विद्मो गतिं नाऽऽत्मनः ॥ ३

भिक्षा पुस्तकवस्त्रपात्रवसतिप्रावारलुब्धा यथा
नित्यं मुग्धजनप्रतारणकृते कष्टेन खिद्यामहे ।
आत्मारामतया तथा क्षणमपि प्रोज्झ्य प्रमादद्विषां(षं)
स्वार्थाय प्रयतामहे यदि तदा सर्वार्थसिद्धिर्भवेत् ॥ ४

पाषण्डानि सहस्रशो न(ज)गृहिरे ग्रन्था भृशं पेठिरे
लोभाज्ञानवशात् तपांसि बहुधा मूढैश्चिरं तेपिरे ।
क्वापि क्वापि कथञ्चनापि गुरुभिर्भूत्वा मुदो भेजिरे
कर्मक्लेशविनाशसम्भवसुखान्यद्यापि नो लेभिरे ॥ ५

किं भावी नारकोऽहं किमुत बहुभवा(वी)दूरभव्यो नभव्यः ?
किं वाऽहं कृष्णपक्षी किमचरणगुणस्थानकी कर्मदोषात् ? ।
वह्निज्वालेव शिक्षा व्रतमपि विषवत् खड्गधारा तपस्या
स्वाध्यायः कर्णशूची यम इव विषमः संयमो यद्विभाति ॥६

वस्त्र पात्रमुपाश्रयं बहुविधं भैक्षं चतुर्द्धौषधं
शय्यापुस्तकपुस्तिकोपकरणं शिष्यं च कृष्या ?(शिक्षा)मपि ।

गृह्णीमः परकीयमेव नितरामाजन्मगृद्धा वयं
यास्यामः कथमीदृशेन तपसा तेषां हहा ! निःक्रयम् ॥ ७

अन्तर्मत्सरिणां बहिः शमवतां प्रच्छन्नपापात्मनां
नद्यम्भःकृतशुद्धिमद्यपवणिग्दुर्वासनाशालिनाम् ।
पाखण्डव्रतधारिणां बकदृशां मिथ्यादृशामीदृशां
बद्धोऽहं धुरि तावदेव चरितैस्तन्मे हहा ! का गतिः ? ॥ ८

रागो मे स्फुरति क्षणं क्षणमथो वैराग्यमुज्जृम्भते
द्वेषो मां भजति क्षणं क्षणमथो मैत्री समालिङ्गति ।
दैन्यं पीडयति क्षणं क्षणमथो हर्षोऽपि मां बाधते
कोपोऽयं कृपणः कृपापरिभृतैः कार्ये(र्यो) हहा ! कर्मभिः ॥९

येषां दर्शनवन्दनप्रणमनस्पर्शप्रशंसादिना
मुच्यन्ते तमसा निशा इव सिते पक्षे प्रजास्तत्क्षणात् ।
तादृक्षा अपि केऽपि केऽपि मुनयस्तेभ्यो नमः कुर्महे
संविज्ञा वयमात्मनिन्दनमिदं कुर्मः पुनर्बोधये ॥ १०

पू.आ.श्री तिलकसूरीश्वरविरचितम्

## ॥ श्रावकप्रायश्चित्तसामाचारीविधिः ॥

सिरिविरजिणं नमिउं पच्छित्तं सावयाण वुच्छामि ।
विमंसिउणं बहुसो सामायारिउं विविहाउं ॥ १

तणुमज्झुक्कोसासायणाए पडिम – पुत्थय – गुरूणं ।
मिच्छत्तेऽवि य तिविहे, लहु गुरु चाउलहुं जहासंखं ॥ २

पडिमादाहे भंगे पलीवणाइ सुपमायउ वावि ।
तह पुत्थपट्टियाईण तिनवकारावणा सुद्धी ॥ ३

संमत्ते संकाइसु चउलहु देसंमि चउगुरु सव्वे ।
गुरुदव्वभोगि भिन्न गुरुदेवाऽवंदणे य लहू ॥ ४

पुढवाईणमकारणसंघट्टा, गाढागाढा परियावे ।
उद्दवणे य कमेणं भिन्नाई, जाव चउलहुयं ॥ ५

तहऽणंतकाइयाण वि सहसाभोगा उ च विगलाण ।
पुरिमाई विवणंतं, पणिंदि गुरुगाइ कल्लंतं ॥ ६

संकप्पा दप्पा वा थूलवहाईसु पंचकल्लाणं ।
एगाइ दसंतेसु तं तं परउय दसगं तु ॥ ७

तणु मज्झिम उक्कोसे, मोसंमि परिगाहे य गुरुगाई ।
नियगेहंमि अदिन्ने, लहू जहन्ने गुरु मज्झे ॥ ८

नाए य चउलहूक्कोसए अनाए वि पंचकल्लाणं ।
नाए य जाय कलहे तं चिय सज्झाय लक्खजुयं ॥ ९

चउगुरु छलहु छगुरु सदार, इत्तरिय वेस वयभंगे ।
मूलं तु कुलवहूए, मउपइए पंचकल्लाणं ॥ १०

नाए लक्खमनाए पणकल्लाणं तु हीणपरदारे ।
असिईलक्खमनाए, नाए पुण उत्तमे मूलं ॥ ११

सीलस्स बला भंगे, लक्खं इत्थीइ सपणकल्लाणं ।
पंचुंबरि महुभोगे, खवणमनाए छगुरु नाण ॥ १२

चउलहु परपरिवायऽभक्खाणाऽसभ्यराडि पेसुन्ने ।
संडविवाहे कन्नाहले य लहुग ठिउल्लीण ॥ १३

दिसिवय-अणत्थभंगे, सामाइय-संविभाग-अविहाणे ।
अनिमित्तं निसिभुत्ते, अणंत असणे य चउगुरुयं ॥ १४

पत्तेयभंगे चउलहु, तह देसवगास - पोसहाऽकरणे ।
कम्मादाणे छलहु सुरामंसे खवण पंचकल्लाणं ॥ १५

कोहे पक्खायईए पगाढमायामएसु चउगुरुगं ।
विम्हरियऽन्नायकए, पइवरिसं पंचकल्लाणं ॥ १६

चउगुरु चउलहु अ पमायाऽपडिकमणे बइट्ठपडिकमणे ।
एवं वंदणगस्स वि दाणादाणेसु लहुगुरूगे ॥ १७

खवणमऽपच्चक्खाणे, अकारणे पुरिमचरिमगाऽकरणे ।
लहुगं दव्वसचित्ते, अहिगेऽहिग विगइए पणगं ॥ १८

गंठिसहियस्स भंगे, अट्ठसयं सेस पच्चक्खाणस्स ।
भंगे तं चेव तवो छम्मासं बहुय पावेऽवि ॥ १९

सिरिचक्कसूरीस-पट्टाहिव-सिरिसिंहसूरि-सीसलेसेहिं ।
एसा सामायारी रइय, सिरि तिलयसूरीहिं ॥ २०

## ॥ नवपदाराधनविधिः ॥
मयाऽयं स्वाचारो भवति वहनीयो जिन ! कदा ? ॥ १७

अदूष्यं चेद् भैक्ष्यं भवति न तथापि व्रतभृतः
स्वभोगायाऽदत्वा स्वकुलगणसाम्भोगिकमुनीन् ।
अदत्तं चाऽदानादिदमपि मुनीन्द्रेण गदितं
ततस्तन्नेच्छेयं सममसमयः स्ताच्छुभतमः ॥ १८

यतेर्भक्तिस्थानं स्वकुलगणसङ्घाज्जिनगृहं
गणी वा ग्लानो वा गुरुरथ च शैक्ष्योऽप्यभिहितम् ।
अभक्त्या चैतेषां निजजठरदत्तं यदशनं
भवेत् तच्चाऽदत्तं मम मुनिप ! मा भूदघमदः ॥ १९

जनेऽस्मिन् प्रत्यक्षा यदनु जनिता जीवितहृतः
कियत्यः कीर्त्यन्ते कलहहननाद्यादिविपदः ।
तदब्रह्मोपास्तिं कथमृषिजनः काङ्क्षितुमलं
ततो मामेतस्मात् कुरु विरतिमन्तं शमनिधे ! ॥ २०

पशुस्त्रीपण्डानां ननु विविधचेष्टाः स्मरकृता
निरीक्ष्याऽधीरः स्यात् स्मरजिदपि योगी विकृतिभाक् ।
ततस्तैः संवासो वृजिनजनको विष्टपपते !
वृषेच्छोर्भूयान्मे मदनविजिगीषोरविषयः ॥ २१

गतीर्जातीर्वेषान् रतविलसितानि प्रियगिरो
मृगाक्षीणां हावान् जनसदसि संश(शंस)न्निह जनः ।

तदर्थस्मृत्या तु स्मरविकृतिमृच्छत्यथ न किं
ततस्तासां कीर्तिरि(र्तीर)पि परम ! माऽचीकथमहम् ॥ २२

इयं रामा श्यामा कृशकटितटीयं शशिमुखी
सुनेत्रेयं गौरी गुरुतरनितम्बा घनकुची ।
स्त्रियं पश्यन् साधुर्विकृतिजविकल्पानिति वहेत्
ततोऽङ्गानि स्त्रीणां मम कथमपेयानि न दृशा ? ॥ २३

स्मरेत् कामान् भोगान् प्रथमपरिभुक्तान् यदि यती
तदा ब्रह्मोपास्तेः परिपतनमेति प्रचलितः ।
ततोऽनर्थः कोऽपि प्रभवति महांस्तेन नियमे
स्थितस्यातीचारो मम मुनिपतेऽयं भवतु मा ॥ २४

यतः पुष्णत् कायं तदुपगतधातूनधिसृजद्
ददत् तानुन्मादं मदनमथ चित्ते प्रमदयत् ।
सतत्त्वं हन्त्येवं सरसमशनं संयमिपते !
ततोऽहं मा भूवं रसयुगतिमात्राशनरुचिः ॥ २५

अनन्तं कालं यज्जगति लुठितः स्थावरतया
मुहुर्जातश्चैवं जडतरमतिर्जङ्गमतया ।
परिग्रह्येवाहं नवनवभवानस्पृशमतो
महीयो देया मे सकलपरसंयोगविरतिम् ॥ २६

मनोज्ञेष्वर्थेषु श्रवणविषयेषु प्रलुभितः
क्रियाभ्यः पापाभ्यो न विरमति मूढः स्वमनने ।
द्विषन् दुःशब्दानामनवरतमेवं दुरितकृत् ।
ततो गार्ध्यं नादग्रहकरणगं मे हर विभो ! ॥ २७

विधाप्याथो रूपे ध्रुवमभिमते रागविवशं
तथाऽनिष्टे द्विष्टं सततविकलं मां स्वकलने ।
विनाऽन्तर्नेत्राभ्यामिह परिगृहीतोऽहमभवं
प्रभूताशातस्तन्मम भुवि कदा स्यात् स्ववशता ? ॥ २८

जिघृक्षन्निर्यासं सुरभितरसारं सुमनसां
पशून् हिंसन् वस्कन्यपि(?) मृगमदाद्ये त्वभिमते ।
अहो ! प्राणी घ्राणेन्द्रियपरिगृहीतोऽघनिचयं
न कं कुर्यान्नाथ ! प्रतिदिश ततो मेऽस्य विजयम् ॥ २९

न हन्तव्या जीवा इति मनसि जानन्नपि जनो
निहत्यैतान् भुङ्क्ते तदनु जगति भ्राम्यति भृशम् ।
कथं नो मूढः स्याद् बत परिगृहीतो रसनया
ततो मामेतस्याश्चरितविजयायाऽऽदिश विभो ! ॥ ३०

सुखान् स्पर्शानिच्छन्ननुदिनमनिच्छन्नसुखदान्
महारम्भं मूढो महयति भवाब्धौ भ्रमति तत् ।
इति श्रद्धायेश ! स्वसहजसमाधाननिरतः
कदा रागद्वेषापनयनपटुः स्यामहमिह ॥ ३१

तमोरूपेऽप्काये प्रसरति भृशं लोककुहरे
सचित्तं स्यात् सर्वं न च किमपि दृश्यं जनदृशा ।
कथङ्कारं साधुः प्रभवति तदा भोक्तुमशनं
विहर्त्तुं वा भूमौ तदिह मम मा भूदिदमघम् ॥ ३२

अयं साधुः शान्तो मृदुरयमृजुर्निस्पृहतम-
स्तपस्वी संयन्ता हितमधुरवादी शुचिरयम् ।

अकिञ्चित्को ब्रह्मव्रतभृदिति यत्र क्षितितले
भविष्यामि ख्यातो मम जिन ! कदा भावि तदहः ? ॥ ३३

स्थितिं छिन्दन् भिन्दन् रसमखिलकर्मस्वविरलं
स्वमात्मानं शुद्ध्याऽगणितगुणवृद्ध्या विमलयन् ।
तथा किट्टीकृत्योत्कटमपि किरन् पुद्गलमलं
स्वयं स्वं पश्येयं स्थिरतरमनाः पारग ! कदा ? ॥ ३४

भवाभ्यासं हित्वा प्रबलमपि जित्वा रिपुबलं
स्वसंवेदी भूत्वा सममपि विदित्वा वसुचयम् ।
तनोर्योगं मुक्त्वा शिवपदमुषित्वा त्रिजगतां
यथाहं नाथ ! स्यां मम भव सहायोऽनघ ! तथा ॥ ३५

इत्थं मोक्षाध्वगानामभिलषितसुखोत्तानदाने वदान्यो
देवेन्द्रवातवन्द्योऽद्भुतमहिमरमः श्रीमहावीरनेता ।
संसाराम्भोधिपारं प्रतिजिगमिषुणा रूपचन्द्रेण सान्द्रा-
नन्दार्थं प्रार्थ्यमानो निखिलतनुभृतां भूयसे श्रेयसे स्तात् ॥ ३६

पू.आ. श्री जयशेखरसूरिकृतम्

## ॥ आराधनाप्रकरणम् ॥

परमं परमेष्ठिपञ्चकं प्रणिपत्यात्मपरोपकारकम् ।
विदधामि समासतः स्फुटं, दशधाराधनसूत्रसङ्ग्रहम् ॥ १

क्षपकः प्रणिपातपूर्वकं, गुरुसंवेगतरङ्गरङ्गितः ।
वदतीति विभोऽधुनोचितं, कुरु निस्तारय मां भवार्णवात् ॥२

मधुरैर्मृदुभिर्मनोहरै-र्जिनसिद्धान्तगतैर्वचोभरैः ।
सुभटानिव बन्दिनो रणे, गुरुरुत्साहयतीति रीतिवित् ॥ ३

अयि धीर विवेकवानसि, स्मृतकृत्योऽसि गुणाग्रणीरसि ।
परलोकहितावहोऽधुना, यदि भो धर्ममतिस्तवास्त्यहो ॥ ४

सुकृतस्य कृतस्य कर्मणः, शुभमृत्युः कलशाधिरोपणम् ।
नवहस्तमतस्य शस्यते, वरकुम्भस्य हि कोटिसारता ॥ ५

जननं यदि जातमङ्गिनां, मरणं तन्नियतं भविष्यति ।
इति निश्चयतः प्रमोदभाक्, तदिमं पण्डितमृत्युमाचर ॥ ६

अतिचारविशोधनं व्रतो-च्चरणं क्षामणमागसां कुरु ।
त्यज पातककारणानि वै, श्रय चत्वारि निनिन्द दुःकृतम् ॥७

सुकृतान्यनुमोदयात्मनः, शुभभावं कुरु चाशनं त्यज ।
स्मरं पञ्चनमस्कृतीर्मुदा शिवसौख्यानि लभस्व भो यथा ॥ ८

ज्ञानादिकाचारकपञ्चके वा-तिचार आगान्मम योऽपि सूक्ष्मः ।
आलोचयेऽहं तमशेषमद्य, त्रिधा विशुद्ध्या गुरुदेवसाक्षिम् ॥९

यदकालमुखाष्टके मया, पठितं ज्ञानमपाठि चापरैः ।
विधिना पठतां च विघ्नीतं, यदवज्ञातमधीत्य गर्वितम् ॥ १०

वसनैरशनैश्च पुस्तकै-र्न च साहाय्यमकारि शक्तितः ।
पुटसम्पुटपट्टिकादि य-न्मयकाशातितमस्तु तद् वृथा ॥ ११

मलिनं फलशङ्कनादिभिः, शुभसम्यक्त्वमकारि कारणैः ।
न कृतं जिनपूजनं मुदा, जिनपाज्ञापि न चारु पालिता ॥ १२

गुरुदेवधनं क्वचिल्लले, सति सामर्थ्ये उपेक्षितं चिरम् ।
निखिलं दुरितं वृथास्तु मे, कृतमाशातनया कयापि यत् ॥१३

समितियुतगुप्तिभिः समं, चरणं सम्यगिदं न पालितम् ।
अथ भूदगवह्निवाय्वगा-दय एकेन्द्रियजन्तवो हताः ॥ १४

कृमिपूतरशङ्खशुक्तिका-प्रमुखा द्वीन्द्रियकास्तथैव ये ।
घुणमत्कुणकुन्थकीटिका-प्रभवास्त्रीन्द्रियजन्तुजातयः ॥ १५

चतुरिन्द्रियभृङ्गकृत्तिका-सरघावृश्चिककोलिकादयः ।
खजलस्थलवारिदेहिनः, किल पञ्चेन्द्रियकास्त्रिधा पुनः ॥१६

इति संसृतिसंश्रिता हता, अभिघातादिदशप्रकारकैः ।
तनुबादरजन्तवो मया, मम मिथ्यास्तु तदद्य दुःकृतम् ॥ १७

अनृतं जगदे क्रुधादिभि-र्यददत्तं जगृहे स्वमस्वकम् ।
नरदेवतिरश्चिसम्भवं, त्रिविधं मैथुनमत्र सेवितम् ॥ १८

नवधा धनधान्यकादिके, ममताकारि च यत्परिग्रहे ।
नियमेन निशाशनादिषु, यदतीचारितमस्तु तद् वृथा ॥ १९

सति शक्तिभरेऽपि यत्तपो, न कृतं द्वादशधा जिनोदितम् ।
शिवसाधनधर्मकर्मसू-द्यमितं नैव तदद्य निन्दये ॥ २०

प्राणातिपातविरतिप्रमुखव्रतानि,
पूर्वं यथाविधि सुधीर्भवतादृतानि ।
भावेन सम्प्रति पुनर्भण धारितानि,
यत्पालये निरतिचारमतो हि तानि ॥ २१

सह सम्प्रति सर्वदेहिना-मपराधं च क्षमस्व तन्निजम् ।
भज मैत्र्यमतिं त्यज क्रुधं, शमसंवेगसुधारसं पिब ॥ २२

हिंसासूनृतचौर्यमैथुनधनाकाङ्क्षा क्रुधं मानकं,
माया लोभकली च रत्यरतिमभ्याख्यानपैशून्यकैः ।

द्वेषप्रेमपरापवादवदनं मायामृषाभाषणं,
मिथ्यादर्शनशल्यपातकपदं चाष्टादशापि त्यज ॥ २३

इह ये कथिताश्चतुर्विधा, अभिधास्थापनद्रव्यभेदतः ।
शरणं चरणास्तदर्हतां, व्रज मृत्योरवनं वितन्वताम् ॥ २४

भुवनाधिपवानमन्तर-मनुजज्योतिरमर्त्यभूमिषु ।
नमः शाश्वतचैत्यसंस्थिता-र्हतबिम्बान्यमितानि भावतः ॥ २५

विमलार्बुदरैवताचल-कनकाष्टापदपर्वतादिषु ।
अपरास्वपि तीर्थभूमिका-स्वभिवन्दे जिनजन्मभूमिषु ॥ २६

घनकर्ममलं विदह्य ये, तपसापुः परमात्मरूपताम् ।
दश पञ्च च बिभ्रतो भिदो, मम सिद्धाः शरणं भवन्तु ते ॥२७

शिवसाधकयोगसाधकाः, विषयग्रामनियोगबाधकाः ।
शरणं मम सर्वसाधवो, मनुजक्षेत्रगताः क्षमाभुवः ॥ २८

भवसागरतारणक्षमः, सकलप्राणिहितः शमोत्तमः ।
शरणं दशधा जिनोदितो, मम धर्मः शिवशर्मसाधनम् ॥ २९

कुमतं यदिह प्ररूपितं, जिनधर्मो यदपह्नुतो मया ।
गुणिनां गुणमत्सरः कृतः, कुकुटुम्बं पुपुषे ममत्वतः ॥ ३०

प्रकृता सुकृतान्तरायता, जनता पातककर्मणीरिता ।
विकथाः कथिताः प्रमादतः, परिगर्हे तदशेषदुःकृतम् ॥ ३१

जिनमन्दिरबिम्बपुस्तके-ष्वपि सङ्घे धनमुप्तमञ्जसा ।
प्रतिमादितपः समर्थितं, यदलं धर्मविधौ सहायताम् ॥ ३२

विदधे विधिदेशना मया, पठितः पाठित आगमोऽपि यत् ।
समयानुजमन्यदप्यहं, निजपुण्यं त्वनुमोदयाम्यलम् ॥ ३३

भवपञ्जरभञ्जनोद्धुताः, परिशुद्धात्मगुणाः सदा यया ।
परिभावय भव्यभावना, मनसि द्वादशसङ्ख्ययाऽधुना ॥ ३४

स्वगतेऽन्यमतेऽपि सर्वदा, महिमा यस्य महान्निगद्यते ।
विधिनानशनं गृहाण तत्, निखिलाहारमतिर्विमुच्यताम् ॥ ३५

कलमङ्गलकेलिमन्दिरं, सुरसम्पद्वशहेत्वनुत्तरम् ।
अघसङ्घनिघातसत्वरं, स्मर मन्त्रं परमेष्ठिविष्टरम् ॥ ३६

आराधनास्तबक एष कृतः क्रमेण,
साम्यस्थितेन गुरुणा जयशेखरेण ।
एतां विभाव्य निशि यः शयनं विधत्ते,
तस्मै महोदयपदं नियतं प्रदत्ते ॥ ३७

पू.आ.श्री उदयप्रभसूरिविरचिता

## ॥ नंदनऋषि आराधना ॥

(उपदेशमाला कर्णिका अर्न्तगता)

मूलतोऽप्यकलङ्कात्मश्रामण्यमभिपाल्य सः ।
इत्थमाराधनावर्यं पर्यन्तसमयं व्यधात् ॥ १

अर्हद्भट्टारकं देवं धर्माचारगुरुं गुरुम् ।
अभेदबुद्धयाऽनुध्यायाऽऽतनोम्याराधनामहम् ॥ २

व्रतान्यालोचना पापगर्हा श्रेयोऽनुमोदनम् ।
क्षामणानशनं पापस्थानोत्सर्गः सुभावनाः ॥ ३

चतुः शरणसम्प्राप्तिः परमेष्ठिनमस्कृतिः ।
महोदयकरी सेति दशधाराधनाऽस्तु मे ॥ (यु.)४

विघ्नान् विजित्य वीरत्वं धीरत्वं मनसाऽऽश्रय ।
आत्मन् ! साध्योऽवधानेन चन्द्रवेध्यक्षणोऽधुना ॥ ५

देहो गृहं कुटुम्बं श्रीः प्रतिष्ठा सर्वमाप्यते ।
अर्हदुक्तस्तु धर्मोऽयं सुकृतैर्यदि लभ्यते ॥ ६

सम्यग्दर्शनमूलानि श्रीगुरूणां पुरः पुरा ।
स्वीकृतान्यपि भूयोऽपि व्रतानि स्वीकरोम्यहम् ॥ ७

पञ्च ज्ञानानि कालादिज्ञानाचारश्च योऽष्टधा ।
ज्ञानपात्राण्यथ ज्ञानोपस्करास्तेषु यन्मया ॥ ८

अश्रद्धानान्यथाव्याख्यागर्होपहसितादिभिः ।
कुन्यासाद्यैरवज्ञातं यत्तदालोचयाम्यहम् ॥ (यु.) ९

अष्टधा दर्शनाचारे मया निःशङ्कितादिके ।
सम्यक्त्वमतिचीर्णं यत्तदप्यालोच्यतेऽधुना ॥ १०

गुरौ गच्छे गणे सङ्घे शासने परमेष्ठिषु ।
अर्हच्चैत्यरथार्चादौ द्वेषाद्यालोचये त्रिधा ॥ ११

चारित्रस्यापि चाचारे मूलोत्तरगुणोत्तरे ।
यन्नैवाचरितं चारु सर्वमालोचयामि तत् ॥ १२

या रागाद् द्वेषतो मोहाच्चक्रे सूक्ष्माथ बादरा ।
हिंसा षड्विधजीवानां तां गुरुभ्यो निवेदये ॥ १३

उपरोधभयक्रोधलोभक्षोभकुतूहलैः ।
यन्मिथ्यागदितं तन्मे मिथ्याऽस्त्वालोचनादितः ॥ १४

प्रणयोन्मेषविद्वेषविशेषविषयार्त्तिभिः ।
आत्तं वित्तमदत्तं यत्तत्प्रायश्चित्तमस्तु मे ॥ १५

मैथुनं मानवं दिव्यं तैरश्चं यत्पुरा मया ।
विदधे व्युत्सृजाम्येष त्रिविधं त्रिविधेन तत् ॥ १६

पशुधान्यधनादीनां परिग्रहमहं बहुम् ।
यं प्राग् लोभविकारेण चकारालोचयामि तत् ॥ १७

द्रव्ये क्षेत्रे च काले वा भावे वा मोहदोषतः ।
अकारि ममकारो यस्तत्प्रतिक्रान्तिरस्तु मे ॥ १८

त्रेधा त्रिधा मूढमना घनाऽघसदनं निशि ।
यं चतुर्विधमाहारं भेजिवानुत्सृजामि तम् ॥ १९

अथोत्तरगुणेष्वीर्यामुखे समितिपञ्चके ।
योगगुप्तित्रिके चापि पापमालोचयाम्यहम् ॥ २०

बाह्यमाभ्यन्तरं चापि मया द्वादशधा तपः ।
शक्तेनापि विराद्धं यत्तदप्यालोचये गुरोः ॥ २१

धर्मकर्माणि कर्तुं च प्रतिकर्तुं च तद्द्विषः ।
यद्वीर्यं शाठ्यतोऽगोपि तस्याप्यालोचनास्त्विति ॥ २२

रक्तो द्विष्टोऽथ मूढोऽहं यदकार्षं त्रिधा त्रिधा ।
स्मृतं वाऽप्यस्मृतं वा तत्सर्वं मिथ्याऽस्तु दुष्कृतम् ॥ २३

दुष्कृतं यत्कृतं चात्र भवे पूर्वभवेषु वा ।
तच्च तस्य च कर्त्तारं निन्दाम्यात्मानमात्मना ॥ २४

प्राप्यापि भगवद्बोधिमबुद्धिर्यदहारयम् ।
हहा महाप्रमादेन गर्हामि तदहं त्रिधा ॥ २५

तथा देवे गुरौ धर्मे सम्यग् नाचरितं च यत् ।
विपरीतेऽन्यथा यच्च सर्वं गर्हामि तत् त्रिधा ॥ २६

तीर्थे मार्गे तथोत्सूत्रं वृत्तं दिष्टं च यन्मया ।
तत्त्वेषु निह्नुतं वा यत्तन्मिथ्या मेऽस्तु दुष्कृतम् ॥ २७

परमेष्ठिषु सङ्घेऽथ जिनचैत्ये जिनागमे ।
न भक्तिं चकाराऽभक्तिं चक्रे च व्युत्सृजामि तत् ॥ २८

जिनगुर्वागमार्थेषु यद्रक्षितमुपेक्षितम् ।
उदासितं च धर्मार्थे तद् गर्हामि त्रिधा त्रिधा ॥ २९

देहोपकरणाऽस्त्रादि यदिहामुत्र वा मम ।
पापाधिकरणं जज्ञे गर्हामि तदहं त्रिधा ॥ ३०

मिथ्यात्वेनाविरत्याथ प्रमादैरखिलैश्च मे ।
कृतं कषायैर्योगैश्च सर्वं मिथ्यास्तु दुष्कृतम् ॥ ३१

रागाद् द्वेषात्तथामोहात्कर्मबन्धस्य हेतुताम् ।
यदन्यस्य जगामाऽहं तद् गर्हाम्यात्मनोऽखिलम् ॥ द्वारम् ३२

रत्नत्रयात्मके धर्मे मया मार्गानुसारि यत् ।
कृतं च सुकृतं किञ्चित्तत्सर्वमनुमोदये ॥ ३३

यन्मम ज्ञातमज्ञातं धनं धर्म्येषु कर्मसु ।
परेण स्वेन वा नीतमनुमन्येऽखिलं च तत् ॥ ३४

आर्हन्त्यमर्हतामर्हं सिद्धानां सिद्धताश्रियम् ।
आचार्याणां सदा चारुसमाचारप्ररूपणाम् ॥ ३५

अध्यापकानां स्वाध्यायं साधूनां धर्मसाधनाम् ।
श्राद्धानामपि सद्धर्मं प्रमोदेनानुमोदये ॥ (यु.) द्वारम् ३६

यन्मयाऽऽशातितं किञ्चिन्मनोवचनकर्मभिः ।
श्रीसङ्घं क्षमयाम्येष तन्मौलितुलिताञ्जलिः ॥ ३७

धर्माचार्यः पिता माता स्वामी स्वोऽन्यः सखा द्विषन् ।
सधर्माथ विधर्मा यत् खेदितः क्षमयामि तत् ॥ ३८

हतो दुरुक्तोऽपकृतः सुकृतं कुन्तता मया ।
यः कोऽपि क्वापि स मयि क्षाम्यतु क्षमयामि तम् ॥ ३९

चतुर्गतौ भवेऽभूवन् सुहृदोऽसुहृदोऽपि वा ।
मयि क्षाम्यन्तु ते सर्वे तेषु सर्वेष्वहं समः ॥ ४०

स्वजना नोपकाराय नापकाराय दुर्जनाः ।
स्वं कर्म्मैव तयोः कर्तृ तोषरोषौ तदेषु कौ ॥ (द्वारम्) ४१

यो यं षड्विधजीवानां विनाऽऽरम्भं न जायते ।
तं चतुर्विधमाहारं यावज्जीवं त्यजाम्यहम् ॥ ४२

अनादाविह संसारे कुलाचलकुलातुलैः ।
तुप्तो न जातु यैरन्नैस्तेषु मे का स्पृहाऽधुना ॥ ४३

भावितानशनः प्राणी मुक्तिं न लभते यदि ।
दुर्लभा नाऽस्य जम्भारिलक्ष्मीस्तेन श्रयामि तत् ॥(द्वारम्)४४

पञ्चाश्रवान्निशाभक्तं क्रोधादींश्चतुरस्तथा ।
रागं मायामृषां द्वेषं कलिं पिशुनतां तथा ॥ ४५

अभ्याख्यानं परीवादं मिथ्यादृग्शल्यमित्यपि ।
व्युत्सृजामीत्यहं पापस्थानानि जिनसाक्षिकम् ॥ ४६

सावद्यमान्तरं योगं सर्वं बाह्यं तथोपधिम् ।
व्युत्सृजामि समुच्छ्वासे चरमे वपुरप्यदः ॥ (द्वारम्) ४७

नवां नवां तनुकुटीं कारं कारं क्षणं क्षणम् ।
क्वापि क्वापि भवारण्ये जन्तुपान्थो वसत्यसौ ॥ ४८

लोके कालादसङ्ख्येयप्रदेशात्मनि जन्मिनाम् ।
अनन्ताः पुद्गलावर्त्ताः पूरिता जन्ममृत्युभिः ॥ ४९

देहेन्द्रियादितोप्यात्मा यः परः परमार्थतः ।
तस्यान्यबन्धुसम्बन्धो बन्धुरत्वं कथं भजेत् ॥ ५०

एको जन्मजराव्याधिमृत्युभिः परिभूयते ।
तदर्जितानां वित्तानां भोक्तारस्तु परःशताः ॥ ५१

सर्वाशुचिसमाविष्टं वपुर्भूषकदूषकम् ।
पुनःसङ्गनिरुत्साहो मोक्तुमुत्कण्ठते सुधीः ॥ ५२

जीवितं चारुता भूतिर्यौवनं प्रियसङ्गतम् ।
चलत्वेनाम्बुधेर्वीचीरपि नीचीकरोत्यहो ॥ ५३

मृत्यु-जन्म-जरा-व्याधिबाधाविधुरितात्मनाम् ।
जिनादिष्टं विना धर्मं कः शरण्यः शरीरिणाम् ॥ ५४

पापाश्रवनिरुद्धान्तःकरणः पुण्यमाश्रवम् ।
कदाचित्काकतालीयन्यायेन लभते भवी ॥ ५५

संवरासंवृताशेषाश्रवद्वारो भवार्णवे ।
अनस्ताघोऽयमस्ताघे जीवपोतो निमज्जति ॥ ५६

क्षान्त्याद्यैर्दशधा धर्ममुपपन्नं जगुर्जिनाः ।
तमप्येते प्रमाद्यन्तो जन्तवो हारयन्ति हा ॥ ५७

सकामनिर्जराहेतुर्द्वादशात्मतपोबलात् ।
शोषायाश्रवपङ्कस्य कस्यापि क्षमते मतिः ॥ ५८

अपायपात्रं कायादि सर्वमन्यद् वियुज्यताम् ।
चिन्तारत्नमिवैकं मे बोधिरत्नं तु मा स्म गात् ॥ ५९

भवो लोकोऽन्यतैकत्वाशौचानित्याशरण्यता ।
आश्रवः संवरो धर्मो निर्जरा बोधिरित्यमूः ॥ ६०

भावयन् भावनाः श्रित्वा जिनजैनजिनागमान् ।
अवस्करममुं जाने शेषं संसारविस्तरम् ॥ (यु.) ६१

अहो पृथक् पृथग् देहकुटीषु क्षणवासिभिः ।
पृथक्कर्मवशैरात्मा रागद्वेषपरोऽस्तु कैः ॥ ६२

सहचारिणि नित्योपकारिणि श्रेयसि सुधीः ।
आरज्येत विरज्येत पापे नित्यापकारिणि ॥ ६३

साधवः सोदराः साधर्मिकाः सर्वेऽपि बन्धवः ।
गुरुः पिताऽऽगमार्थोक्तिर्माता मेऽन्यन्न किञ्चन ॥(द्वारम्) ६४

अर्हन्तो मङ्गलं सर्वे सर्वे सिद्धाश्च मङ्गलम् ।
मङ्गलं साधवः सर्वे जैनो धर्मश्च मङ्गलम् ॥ ६५

जिनान् सिद्धान् मुनीन् धर्ममहं लोकोत्तमानमून् ।
शरण्यान् शरणं भक्तिचतुरश्चतुरः श्रये ॥ (द्वारम्) ६६

अर्हद्भ्यो भवभङ्गैकभासुरेभ्यः प्रतिक्षणम् ।
भवद्भूतभविष्यद्भ्यः शाश्वतेभ्यश्च मे नमः ॥ ६७

मुहुर्नश्वरदेहौकः कारिकर्म निरस्य तत् ।
सिद्धिसौधं प्रयातेभ्यः सिद्धेभ्योऽस्तु नमो नमः ॥ ६८

ये च पञ्चविधाचारनिरता निर्वृत्तौ रताः ।
तेभ्यः सिद्धान्तसिद्धेभ्य आचार्येभ्यो नमो नमः ॥ ६९

धर्माध्वगेषु शिष्येषु ज्ञानामृतनदाश्चये ।
निष्पङ्का भान्त्युपाध्यायास्तेभ्यः कुर्वे नमस्क्रियाम् ॥ ७०

तपःश्रीणां परिमलै रोचमानान् विलोकते ।
यान्मुक्तिः कौतुकात् तेभ्यः साधुभ्योऽस्तु नमो नमः ॥ ७१

एष पञ्चनमस्कारः सर्वपापप्रणाशनः ।
मङ्गलानां च सर्वेषां प्रथम मेऽस्तु मङ्गलम् ॥ ७२

पञ्चाननवधूः पञ्चपरमेष्ठिनमस्कृतिः ।
विपद्द्विपान्निपात्योच्चैरत्रामुत्रापि त्रायते ॥ ७३

अवसाने मुनीशानां सर्वपूर्वविदामपि ।
समग्रमंहः संहर्तुं नमस्कारः परं क्षमः ॥ ७४

तीक्ष्णदात्री विपद्वल्लेः सम्प्रदात्री च सम्पदाम् ।
सा हि पुण्यश्रियां धात्री परमेष्ठिनमस्कृतिः ॥ ७५

भावतः स्मरतः पञ्चपरमेष्ठिनमस्कृतिम् ।
यस्य प्राणाः प्रतिष्ठन्ते मृतोऽपि हि स जीवति ॥ ७६

व्रतोच्चारादिकाः पञ्चनमस्कारावसानिकाः ।
दशधाऽऽराधनास्त्वेषा महोदयकरी मम ॥ ७७

विधाय नन्दनः सैष दशधाऽऽराधनामिति ।
धर्माचार्यान् सुधीः साधून् साध्वीश्चाक्षमयत् क्षमी ॥ ७८

लुङ्कागच्छस्थ पू.मु.श्री यशस्विगणिशिष्यविरचिता

## ॥ प्रज्ञाप्रकाशषट्त्रिंशिका ॥

प्रज्ञाप्रकाशाय नवीनपाठी श्रीमारुदेव्यं वृषभं प्रणम्य ।
काव्यानि चाहं कथयामि यानि
तज्ज्ञैर्विशुद्धानि समानीतानि ॥ (इन्द्रवज्रा) १

देवेषु देवोऽस्तु निरञ्जनो मे गुरुर्गुरुष्वस्तु दमी शमि(मी) मे ।
धर्मेषु धर्मोऽस्तु दयापरो मे
त्रीण्येव तत्त्वानि भवे भवे मे ॥ (उपजाति) २

येऽनादिमुक्तौ विलसन्ति सिद्धा मायाविमुक्ता गतकर्मबन्धाः ।
एकस्वरूपाः कथिताः कवीन्द्रैः
सिद्धान्तशास्त्रेषु निरञ्जनास्ते ॥ (इन्द्रवज्रा) ३

तेषां न कायो न मनो न रूपं महाकवीनामकलस्वरूपम् ।
नेच्छा न मोहः पुनरागमो न
द्वेषो न वेषो न मदो न मानम् ॥ (उपजाति) ४

सिद्धा न नार्यो न नरा न क्लीबाः
वक्तृत्वावक्तृत्वयोगा न चला न सन्ति ।
न शिष्टसंहारकृदो(तो) न दृश्या
भोगार्थिनो नाकृतिधारका न ॥ (उपजाति) ५

यथाऽग्नितापं सुखदो जनानां शीतं सदा हन्ति न संशयोऽस्ति ।
श्रीसिद्धजापो हि तथा च ज्ञेयं
पापं प्रकृष्टं च किमत्र चित्रम् ? ॥ (उपजाति) ६

सर्वज्ञदेवस्य च नामजापात् प्राप्नोति किं नाऽग्निभयं क्षयं च ?
प्राप्नोति किं राजभयं न नाशं ?
प्राप्नोति किं चौरभयं न नाशम् ? ॥ (इन्द्रवज्रा) ७

गुरुं विना को न हि मुक्तिदाता गुरुं विना को न हि मार्गगन्ता ।
गुरुं विना को न हि जाड्यहन्ता
गुरुं विना को न हि सौख्यकर्ता ॥ (उपेन्द्रवज्रा) ८

सर्वेषु जीवेषु दयालवो मे ते साधवो मे गुरवो न चान्ये ।
पाखण्डिनस्तूदरपूरकाश्च
प्राणातिपातेन वदन्ति धर्मम् ॥ (इन्द्रवज्रा) ९

त्यक्त्वा कुटुम्बं च धनं समस्तमादाय वेषं श्रमणस्य पुंसा ।
नारक्षितो येन निजश्च धर्मो
हा हारितं तेन मनुष्यजन्म ॥ (इन्द्रवज्रा) १०

संसारिकं येन सुखं सकष्टं ज्ञात्वेति वैराग्यबलेन मुक्तम् ।
पश्चान्न देया खलु तेन दृष्टिः
संसारसिन्धौ प्रतिपूर्णकष्टे ॥ (इन्द्रवज्रा) ११

काष्ठे च काष्ठान्तरता यथास्ति दुग्धे च दुग्धान्तरता यथास्ति ।
जले जलत्वान्तरता यथास्ति
गुरौ गुरुत्वान्तरता तथास्ति ॥ (उपजाति) १२

यतेर्जराऽलङ्करकारिकाऽस्ति चापल्यतारुण्यवयो भयौकः ।
किं तर्हि कार्यं तरुणर्षिणा च ?
भूयोऽपि भूयोऽपि तपो विधेयम् ॥ (उपजाति) १३

काष्ठे च काष्ठे च (कष्टे त्वकष्टे) समचेतसो
ये ते भिक्षवस्तारयितुं समर्थाः ।
गुप्तेन्द्रिया आत्मविचाररक्ता
लाभे त्वलाभे समभावनाश्च ॥ (इन्द्रवज्रा) १४

सुखायते तीर्थकरस्य वाणी भव्यस्य जीवस्य न चेतरस्य ।
सुखायते सर्ववनस्य मेघो
जवासकस्यैव सुखायते न ॥ (उपजाति) १५

न चाऽस्ति धर्मादधिकं च रत्नं
न चाऽस्ति धर्मादधिकं च यन्त्रम् ।
न चाऽस्ति धर्मादधिकं च तन्त्रं
न चाऽस्ति धर्मादधिकं च मन्त्रम् ॥ (उपेन्द्रवज्रा) १६

पापेन जीवो नरकेषु याति सम्पूर्णकष्टं खलु तस्य तत्र ।
सम्भाव्य चैवं विदुषा विधेयो
धर्मः सदा दुर्गतिवारकश्च ॥ (इन्द्रवज्रा) १७

गन्धेन हीनं कुसुमं न भाति दन्तेन हीनं वदनं न भाति ।
सत्येन हीनं वचनं न भाति
पुण्येन हीनो पुरुषो न भाति ॥ (इन्द्रवज्रा) १८

एकं जितं येन मनः स्वकीयं पञ्चेन्द्रियाणीति जितानि तेन ।
नैकं जितं येन मनः स्वकीयं
पञ्चेन्द्रियाणि त्वजितानि तेन ॥ (इन्द्रवज्रा) १९

शिक्षाक्षरैः किं प्रकरोति मूढो ? धर्माक्षरैः किं प्रकरोत्यधर्मी ?।
करोति किं वै जनकः कुपुत्रैः ?
करोति किं सौम्यगुरुः कुशिष्यैः ? ॥ (उपजाति) २०

कृष्णस्य पक्षस्य निशाकरस्य क्षयं कला याति यथा तथैव ।
दिने दिने यौवनता जनस्य
काऽऽशा मनुष्यस्य हि यौवनस्य ? ॥ (उपजाति) २१

एधेत पुण्यात्प्रचुरं च पुण्यं एधेत पापात्प्रचुरं च पापम् ।
तस्मान्नरेणेह विचक्षणेन
पुण्यं विधेयं सुखवर्धकं च ॥ (इन्द्रवज्रा) २२

पुण्येन रूपं किल चारुवाक्यं पुण्येन सर्वं सफलं च वाक्यम् ।
पुण्येन च स्यात् प्रतिपूर्णसौख्यं
पुण्यं विनाऽर्तिस्तु पदे पदे च ॥ (इन्द्रवज्रा) २३

व्रते व्रतं चाऽनशनं प्रकृष्टं दानेषु दानं त्वभयं प्रकृष्टम् ।
रूपेषु रूपं च जिनस्य सारं
वाक्येषु वाक्यं समयस्य सारम् ॥ (उपजाति) २४

सन्तोषतो हि प्रबलं च सौख्यं सौख्येन कृत्वा भवतीति धर्मः ।
धर्मेण कृत्वा भवतीति मोक्षः
मोक्षे जिनैरुक्तमनन्तसौख्यम् ॥ (इन्द्रवज्रा) २५

(भुजङ्गप्रयात)

गतिर्यादृशी स्यान्मतिस्तादृशी स्याद्
धृतिर्यादृशी स्यात् क्रिया तादृशी स्यात् ।
तपो यादृशं स्यात् फलं तादृशं स्यात्
विधिर्यादृशी स्यात् सुखं तादृशं स्यात् ॥ २६

न मात्रा न पित्रा न मित्रेण राज्ञा न मन्त्रैर्न तन्त्रैर्न यन्त्रैर्न देवैः ।
न दारैर्न पुत्रैर्न भृत्यैस्तु लक्षैर्गतं
चाऽर्ज्यते जीवतव्यं न पुंसाम् ॥ २७

गृहीतं व्रतं येन पुंसा च भग्नं वृथा तस्य जन्म स्वकीयं च जातम्।
गृहीतं व्रतं येन पुसा न भग्नं
वृथा तस्य जन्म स्वकीयं न जातम् ॥ २८

कृतं रूप्यवेत्रा च रूप्यस्य मौल्यं
कृतं हेमवेत्रा हि हेम्नश्च मौल्यम् ।
कृतं रत्नवेत्रा तु रत्नस्य मौल्यम्
कृतं धर्मवेत्रा न धर्मस्य मौल्यम् ॥ २९

गृहावासमध्ये वसद्देहभाजां सदा द्रव्यचिन्ता सदा पुत्रचिन्ता ।
सदा दारचिन्ता सदा बन्धुचिन्ता
सुखं नास्ति चिन्तापरस्येति किञ्चित् ॥ ३०

गिरीणां यथा राजते रत्नसानुः सुराणां सुरेन्द्रो नराणां नरेन्द्रः ।
जिनानां जिनेन्द्रो ग्रहाणां च चन्द्रो
व्रतानां तथा राजते ब्रह्मचर्यम् ॥ ३१

परस्त्रीप्रसङ्गादनेकोऽस्ति दोषो व्रतस्य प्रणाशो गुणस्य प्रणाशः।
नरेन्द्रस्य दण्डो जनानां च दण्डो
विषाऽऽभो न कार्यः परस्त्रीप्रसङ्गः ॥ ३२

यथा याति सूर्याऽवलोकेऽक्षितेजो
तथा याति रामाऽवलोके जनानाम् ।
महाब्रह्मचर्याऽक्षितेजो हि केचित् (?)
न सूर्ये न नार्यां च दृष्टिस्तु देया ॥ ३३

अनङ्गाग्निधूमाऽन्धकारेण कामी
न जानाति मार्गं कुमार्गं च किञ्चित् ।
न जानाति कार्यं कुकार्यं च किञ्चि-
न्न जानाति साधु कुसाधु च किञ्चित् ॥ ३४

गृहे यत्र नारी निवासं करोति
प्रशस्तो न तत्राऽस्ति वासो मुनीनाम् ।
गुहायां हरिर्यत्र वाशं(सं)करोति
प्रशस्तो न तत्रास्ति वासो मृगाणाम् ॥ ३५

शीलेन प्राप्यते सौख्यं शीलेन विमलं यशः ।
शीलेन लभ्यते मोक्षः तस्मात्शीलं वरं व्रतम् ॥ ३६

लुङ्काऽऽख्यगच्छाऽम्बरमित्रतुल्यं यशस्विनामा गणिनां गरिष्ठः ।
तस्य प्रसादाच्च सुभाषितानां
षट्त्रिंशिकेयं मयका प्रणीता ॥ ३७

पू.आ.श्री हरिभद्रसूरिविरचितम्

# ॥ ज्ञानपञ्चकविवरणम् ॥

मइनाणं सुअनाणं ओही मणनाणं केवलनाणं ।
पढम दुनाण परोक्खा, नाणतिगं जीवपच्चक्खं ॥ १

सामण्णे छदव्वा मइसुअनाणी अ दोवि जाणंति ।
ओहिनाणी पुग्गलदव्वं जाणेइ नो अन्नं ॥ २

मणपज्जवनाणी पुण मणचिंतिअपज्जवे वियाणेइ ।
केवलनाणी छदव्वा जाणइ पासइ सपज्जाया ॥ ३

उग्गह इह अवाओ अ धारणा एव हुंति चत्तारि ।
मइनाणे एआइं भेआ(अ)वत्थू समासेणं ॥ ४

उग्गह एक्कं समयं ईहावाओ मुहुत्तमेगं तु ।
कालमसंखं संखं च धारणा होइ नायव्वा ॥ ५

पंचहि वि इंदिएहि मणसा अत्थूग्गहो मुणेअव्वो ।
चक्खिदिअमणरहिअं वंजणमीहाइअं छद्धा ॥ ६

उप्पत्तिआ वेणइआ कम्मईआ पार(परि)णामिआ ।
बुद्धि चउव्विहा वुत्ता पंचमी नोवलब्भइ ॥ ७

मइनाणस्स ई(य) भेआ उग्गहमाई चउव्विहं तं तु ।
इंदियनोइंदि पुणो नवरं वंजण चउब्भेय ॥ ८

छचउक्काण चोव्वीसं वंजणचउक्केण अट्ठविसं तु ।
सुअनिस्सिअं तु एअं बुद्धिचउक्केण बत्तीसं ॥ ९

(बहु) बहुविह-खिप्प-अणिस्सिअं
(अ)संदिद्धधुवाण सेअराणं च ।
बारसगुणट्ठवीसा चउबुद्धिजुआ बि(ति)सयचाला ॥ १०

अक्खर सण्णी सम्मं साईअं खलु सपज्जवसी(सि)अं च ।
गमिअं अंगपविट्ठं सत्तवि हे(ए)ए सपडिवक्खा ॥ ११

अक्खरसुअमिह तिविहं घडसरिसो सण्णिअक्खरो होइ ।
वंजण भासासद्दो लद्धक्खरमत्थपडिबोहो ॥ १२

उस्ससिअनीससिअं निच्छुढं खासिअं च छीअं च ।
निस्सिंघयमणुसारं अणक्खर छेलिआईअं ॥ १३

सन्ना मणविन्नाणं जेसिं सा अत्थि ते उ सण्णि त्ति ।
मणविण्णाणविमुक्का असण्णिणो मुंडकाइआ ॥ १४

हेऊवाउवएसा जह कीडीअ दीहकालउवएसा ।
तक्कालकरणचिंता सम्मजुए दिट्ठिवाया य ॥ १५

मिच्छो समो पत्तो साइसुअं होइ सम्मदिट्ठिस्स ।
भविअजीवे य पुणो अणाइअं सुअअनाणं तु ॥ १६

पज्जवसाणेण जुयं केवलनाणस्स होइ सुअनाणं ।
सुअमण्णाणमभव्वे अपज्ज(व)सिअं मुणेअव्वं ॥ १७

अंगपविट्ठं गमिअ सुगमं पडिवक्खसंजुअं सम्मं ।
इअ चउदसभेअजुअं सुअनाणं विवरिअं नेअं ॥ १८

अणुगामि अणणुगामि अवट्ठिअमणट्ठिअं च विन्नेअं ।
तह हीयमाणयं वड्ढमाणयं ओहि छब्भेयं ॥ १९

तप्पागारे-पल्लग-पडहग-झल्लरि-मुयंग-पुप्फजवे ।
तिरिअमणुएसु ओहि नाणाविहसंठिओ भणिओ ॥ २०

नेरइअ-भवण-वणयर-जोइसकपा(प्पा)लयाणमोहिस्स ।
गेविज्जणुत्तराण य हुंति गारा जहसंखं ॥ २१

अहवा अणुप्पयारं असंखलोअपएसपरिमाणं ।
लोगगयरुविदव्वाणं तत्ताओ अणंतविहे ॥ २२

रिउमइ विउलमइहि य मणपज्जवनाणवन्नणं समए ।
अढाइअंगुलुणं पढमं बीयं तु नरखेत्तं ॥ २३

केवलमिगमसहायं असाहारणमणंतमप्परिसेसं च ।
केवलसद्दस्स इमे अत्था स(छ)च्चेव नायव्वा ॥ २४

आइतिनाणं तुरिआ मणनाणं छट्ठुट्ठुयाउ खीणंत ।
केवलमंतदुगंमी मिस्से मिस्सं तु आइतिगं ॥ २५

पंचण्हं नाणाणं वक्खाणमिणं समासओ भणिअं ।
छव्विसगाहाहिं रइअं हरिभद्दसूरिहिं ॥ २६

## ॥ विचारस्तोत्रम् ॥

पहिलउं पणमीय देव परमेसर सेतुंजधणीय,
पयपंकयरयसेव रंगिहिं विरचिसु तसु तणीय ।
जिणवर महु न हु ठाणनाणझाणविन्नाणजुय,
बालकपरि विन्नत्ति बहु भोलि महउं करिसुत्तओ ॥ १

दिणयर जिम तुम्ह देव निम्मलकेवलकिरणधर,
त्रिहुं भवणि त्रिहुं कालि सयलपयत्थपयासकर ।
पंचसयां तीयसट्ठि मिच्छाई पगई पमुह,
जोयणलक्खकुलकोडि तह वि हु जंपिसु दीणदुह ॥ २

सामिय सासोसासि भव सड्ढा सतरहसहिय,
संपूरंति निगोदि हुं अणंत पुग्गल रहिय ।

जिणवर हिव विवहारे रासिइं वासिइं आविइ ए,
कम्म अणंतउ काल अणंतकालि कुल ठाविउ ए ॥ ३

दुविह पुढवि दग तेय वाय विणस्सइ विगलतीय,
जलचर पमुह दुभेय पज्जत्तापज्जत्त ठिय ।
इय अडयाल पयास तिरियतणी गइ संकमिओ,
तुह दंसण विण देव हुं असंखभव परिभमिउ ॥ ४

संकड कुंभीय पाय असिवण वेयरणीरिसिहिं,
सामलपत्तविवित्तच्छेयणपहरण सइ वसहिं ॥ ५

सत्त य नरयनिवासि जिणवर मइं तूअ आण विण,
दुसह सहीय दुहरासि पज्जत्तापज्जत्तट्ठिय ॥ ६

भरहेरवयविदेहए य तिन्नि पंचय गुणीय ।
अड्ढाईदीवेसु कम्मभूमि पनरह भणीय ।
हेमवयहरिवास तह रम्मइ एरन्नवए,
चउ पणगुणीया वीस, तीस हवइ दस कुरुसहिया ॥ ७

सत्त सत्त इगपासि सत्त सत्त बीजइ गमए,
हिमगिरिदाढचउक्कि तिम सिहरीसेलइं हवए ।
छप्पन्नंतरि दीवई य भणियइं जिण सासणिहिं,
लवणसमुद्दमझारि निवसय सासइ आसणहि ॥ ८

कम्मअकम्मह भूमी छप्पन्नंतरदीवज्जुय
पज्जत्तापज्जत्तां भेदिइं बिहुं आगलि बिसए ।
इगसउ मुच्छिय भेया मिलिय तिहुत्तर तिन्नि सय,
ईय मणुयत्तण नाह हउं हीडिओ तू पयरहिय ॥ ९

भास–

परमाहम्मीय पन्नरसा भवणेसर दस जाणि,
सोलह विंतर जोइसीय चर थिर दस इ वखाणि ।
नव लोगंतीय किव्वसीय तिन्निय कप्पय बार,
जंभय दस गेविज्ज नव पंचाणुत्तर सार ॥ १०

ए पज्जत्तापज्जत्त विण अट्ठाणूसउ भेउ,
देवतणी गइ हुं फिरिउ लद्ध न तुह मय भेय ।
अभिग्गह अणभिग्गहिय अभिनिवेस संपत्त,
संसइ अन्नाणइ जणीय पंच भेय मिच्छत्त ॥ ११

पुढविदगागिणिपवणवणतस छज्जीवनिकाय,
इगदुतिचउपंचन्नमणु अविरइ बारस जा य ।
कोहाई सोलहइ हवइ ए हासाई य छसु भेय ।
तिन्निवेय पणवीसहीय सयल कसायहां भेय ॥ १२

सच्च असच्चामीस तु(त)ह तुरिय असच्चासच्च,
मण जण परतणु परवयण चउ चउ जोग पवव्वं (?) ।
उरल उरालिय मीस पुण वेय वेय तस मिस्स,
आहारग तसमिस्सजुय कम्मण सत्त तणस्स ॥ १३

नाणावरणी पंच नव दंसण दुन्निय वेय,
अट्ठवीस पुणि मोहिणीय आउतणा चउभेय ।
नाम तिहुत्तर इग्गसय गुत्तह दुन्निय वेय,
अंतराय पंच य सहिय अट्ठावनसउ एय ॥ १४

सागरसंखा मोहिणीय सत्तरि कोडाकोडि,
नामह गोय बिहुं तणीय वीस वीस ते जोडि ।

तीस तीस नाणावरण पमुह चिहुं तिहिं हुंति,
तित्तीसं सागर ठिईय आऊय कम्म कहंति ॥ १५

भास-

महुरिहिं ए महुरतरेण अइमहुरिइं सोहणरिसए,
कडुयइए कडूयतरेण अइकडूयहिं कसमलकसइं ।
सामलए मीससरूव अइउज्जल पुग्गलदलइए,
लहुडलउए अइलहुरूव गरूयइं अइगरूयहिं बलइंहिं ॥ १६

ए चिहुंए कारणि जोगि पगई पमुह चउभेय इम,
बंधवीए अट्ठय कम्म हुं भमीयओ भवि चक्क जिम ।
इणि भवी ए आवीए देवा पुन्नंवसइं तुह पयसरणि,
तिम करीए सासइ सेव तुम्ह जिम हुयइ भवजल तरणि ॥१७

जोणहिं ए लक्ख सत सत्ति पुढवीयपय पावइ पवणि,
चऊदह ए दह लक्खाणि अणंतकायपत्तेयवणि ।
विगलह ए दो दो लक्ख, चउ चउ नारयतिरियसुरे,
मणुयह ए चउदह मेलि फिरीओ चुलसीय लक्खपुरे ॥ १८

पुढवीय ए आऊय तेया वाय वणस्सइ विगलतीय,
बारह ए सत्ततियसत्तअडवीसासत्तट्ठनव ।
जलचर ए नहथलचारि उरगभूयंगहअहिजुयल,
साढा ए बारह बारदसदसभवलक्खा कोडिकुल ॥ १९

देवह ए नारय लक्ख छविसा पुणवीस पुण,
मणुयह ए बारहलक्ख कुलकोडिय सेतुज्जजिण ।
एक ज ए कोडाकोडि साढा लक्ख सत्ताणवइ,
ए एतीय ए हुं कुलकोडि प्रभु भमीयउ भव नवनवइए ॥ २०

रागलउ ए दोसलउ बेउ आरवेला जिम जिहिं वहए,
च्यारी ए चउ चउ भेय कोहाई कुलगिरि रहइ ए।
पंचई ए विसयला चोर माछलडा मइ उछलए,
इणि भवी ए जलह पडंति तुह प्रभु प्रवहण लद्धु मइं ॥ २१

ईय रिसह जिणवर सिद्धिसइंवरसुंदरीवरसुंदरो ।
सिरिविमलभूधरधवलसिंधुरस्कंधवासपुरंदरो ।
सेवइं सुभा(रा?)सुर थुणीयभासुरगुरुभवासुरगंजणो ।
मह सुविहवासण देउ सासण विजयतिलओ निरंजणो ॥ २२

पू.आ.श्री प्रतिप्रभुसूरिविरचिता

# ॥ दुःषमगण्डिका ॥

अवसप्पिणि-उसप्पिणिभेएण होइ दुविहा कालो ।
सागरकोडाकोडीवीसाए सो समप्पेइ ॥ १

दसकोडाकोडीओ सागरमाणेण हुंति पुन्नाओ ।
उसप्पिणीपमाणं चेव अवसप्पिणीए वि ॥ २

छच्चेव कालसमया हवंति उ(अव)सप्पिणीइ भरहंमि ।
ता(ते)सिं नामविभत्तिं अहक्कमं कित्तइस्सामि ॥ ३

सुसमसुसमा इ(य) सुसमा सुसमदुसमा य दुसमसुसमा य ।
पंचमिया पुण दुसमा तह दुसमदुसमा छट्ठो ॥ ४

एए चेव विभागा हवंति अ(उ)वसप्पिणीय एमेव ।
पडिलोमा परिवाडी नवर विभासा मुणेयव्वा ॥ ५

सुसमासुसमा य कालो चत्तारि हवंति कोडिकोडीओ ।
तिन्नि सुसमा य कालो दुन्नि भवे सुसमदुसमाए ॥ ६

एगा कोडाकोडी बायालीसाए जा सहस्साए ।
वासाण होइ ऊणा दुसमसुसमाइ सो कासी(लो) ॥ ७

अह दुसमाई कालो वासं सहस्साइं एगवीसं तु ।
तावइओ चेव भवे कालो अइदुसमाए वि ॥ ८

इह नेअव्वा तिदुइगपलिआऊ अरतिगंमि कमा ।
तूंअरि-बोरामलमाणभोअणा तिदुइगदिणेहिं ॥ ९

चउरासीपुव्वेहिं ऊणेहिं तइअअरयअंतेसु ।
उप्पन्नो तह सिद्धो रिसहजिणो पढमतित्थयरो ॥ १०

तेवीसा तित्थयरा अजिआइआ चउत्थअरयंमि ।
तह इक्कारसचक्की-हरि-बल पडिवासुदेवा य ॥ ११

इत्थारयधुरि पणसयधणुहसया(हुसिया) पूव्वकोडीवरिसाउ ।
अंते उ सत्तहत्थी वीससयाउ नरा हुंति ॥ १२

एगुणणवइपक्खसेसे चउत्थअरयंमि निव्वुओ वीरो ।
एगुणणवइपक्खे गए तिअरए पउमजम्मो ॥ १३

चुलसीअं च सहस्सा वासा सत्तेव पंच मासा य ।
वीर-महापउमाणं अंतरमेअं मुणेअव्वं ॥ १४

वीरजिणे सिद्धिगए बारसवरिसेहिं गोअमो सिद्धो ।
तह वीराओ सुहमो वीसइवरिसेहिं सिद्धिं गओ ॥ १५

सिद्धिगए वीरजिणे चउसट्ठिवरिसेहिं जंबुनामंमि ।
केवलनाणेण समं वुच्छिण्णा दस इमे ठाणा ॥ १६

मण-परमोहि-पुलाए-आहारग-खवग-उवसमे ।
कप्पे संजमतिअ-केवल-सिज्झणा य जंबुमि विच्छिन्ना ॥१७

संघाइअंमि कज्जे चुन्निज्जा चक्कवट्टिसिन्नंपि ।
तीए सत्तीजुत्तो पुलाइलद्धी मुणेअव्वो ॥ १८

चउदसपुव्वी उप्पन्ने कारणे कुणइ देहमाहारं ।
रयणिप्पमाणमित्तो अंतमुहुत्तं अपडिघाई ॥ १९

सिज्जंभवेण विहिअं दसयालिअ अट्ठनवइवरिसेहिं ।
सत्तरिसए अ थक्का चउपुव्वी भद्दबाहुंमि ॥ २०

तुट्टं स(च) थूलभद्दो(द्दे) दोसयपनरेहिं पुव्वअणुओगो ।
सुहुममहापाणाणि अ आइमसंघयणसंठाणा ॥ यतः- २१

चउपुव्वविवच्छेओ वरिससए सत्तरीए ।
अहिअंमि भद्दबाहुंमि जाओ वीरजिणंदे सिवं पत्ते ॥ २२

पुव्वाणं अणुओगो संघयणपढमयं च संठाणं ।
सुहुममहापाणाणि अ वुच्छिन्ना थूलभद्दंमि ॥ २३

पंचसएसु वरिसाण अइगएसुं जिणाओ वीराओ ।
वयरो सोहग्गनिही सुनंदगब्भे समुपन्नो ॥ २४

दसपुव्वविवच्छेउ वयरे तह
अद्धकीलि(अद्धनाराय) संघयणे ।
पंचहिं वाससएहिं चउसीएसमहिएहिं ॥ २५

पंचसए गुणसीए सूरिसिरिअज्जरक्खिआ जाया ।
जाव य सामी वि यासी दसपुव्वधरो तइयकालो(ले) ॥ २६

बलबुद्धीमेहाणां हाणिं नाऊण विविहसंघस्स ।
उवस्सयस्स वासो तओ कओ अज्जरक्खीहिं ॥ २७

आलोअण-वयदाण छेअसुअं संजईण वारेइ ।
तह अज्जरक्खिअ गुरु साहूणं सिक्खयं देइ ॥ २८

तह अज्जरक्खिएहिं विच्छिन्ना इत्थ दसमनवपुव्वी ।
सुन्नमुणिवेअजुत्तो विक्कमकालाउ जिणकालो ॥ २९

सिरिवीरजिणंदाओ तिण्णिसए वीसवरिस वोलीणे ।
कालयसूरी जाओ सक्को पडिबोहिओ जेण ॥ ३०

सच्चउरे जिणभवणं संभूअं वीरतिगसए काले।
दससयइक्कासीए तुरकेहिं न चालिओ वीरो ॥ ३१

छव्वाससएहिं नवुत्तरेहिं सिद्धिं गयस्स वीरस्स।
तो बोडियाण साहा रहवीरपुरे समुप्पन्ना ॥ ३२

सिरिवीराओ गएसु पणतीसहिएसु तिवरिससएसु।
पढमो कालिगसूरि जाओ सामज्जनामुत्ति ॥ ३३

चउसयतिपन्नवरिसे कालिगसूरी सरस्सइ गहिया।
छेइत्तु गद्दभिल्लं जवणा सगखाइआ जाया ॥ ३४

चउसयसत्तरिवासे तत्वं(व्वं)सं छेइऊण पुण काले।
जाओ विक्कमराया पुहवी जेणूरणी विहिया ॥ ३५

तत्तो पुण पणतीसे, वाससए नरवइ सगो आसी।
जेणं सागो उ कओ, ततो पासंगिओ इणमो ॥ ३६

तेणउअनवसएहिं, समइक्कंतेहिं वद्धमाणाओ।
पज्जोसवणचउत्थी कालयसूरीहि तो ठविया ॥ ३७

वीसहिदिणेहि कप्पो, पंचगहाणी य कप्पठवणा य।
नवसयतेणऊएहिं वुच्छिन्ना संघआणाए ॥ ३८

सालाहाणेण रन्ना संघाएसेण कारिओ भयवं।
पज्जोसवणचउत्थी चाउमासं चउदसीए ॥ ३९

चउमासगपडिकमणं पक्खियदिवसंमि चउव्विहो संघो।
नवसयतेणउएहिं आयरणं तं पमाणंति ॥ ४०

वीराओ पुव्वगयं सव्वंगगयं सहस्सवरिसेण।
कालकमेण य हाणी दूसमसमयाणुभावेण ॥ ४१

वीरा वयरो वासाण पणसय दसमएहिं हरिभद्दो ।
तेरसय बप्पभट्टो अडसय पणयाल वलहिखओ ॥ ४२

अट्ठसए पणयाले सिरिवीराओ गयंमि कालंमि ।
वलहीनयरसातो संजाओ मिच्छसंजणिओ ॥ ४३

पणपण्णुवाससमहिवाससहस्से जिणाओ वीराओ ।
हरिभद्दसूरिसूरो अत्थमिओ दिसउ सिवसुक्खं ॥ ४४

तह य पंचसए पणसीए विक्कमकालाओ झत्ति अत्थमिओ ।
हरिभद्दसूरिसूरो तिव्व (धम्म)रओ सिवसुक्खं ॥ ४५

सिरिवीराओ तेरससएसु तह बारवरिसअहिएसु ।
सिरिबप्पभट्टिसूरि निवपुज्जो कालकुज्जंमि ॥ ४६

एगुणहुत्तरेसु तेरसएसु जिणस्स वीरस्स ।
सावणसिअट्ठमीए अत्थमणं आमरायस्स ॥ ४७

तेरसए वीराओ हुंति अणेगा मइविभंगा ।
बंधंति जेण जीवा बहुआ कंखाइमोहणियं ॥ ४८

पंचसयाचउआला तइया सिद्धिं गयस्स वीरस्स ।
तओ अंतरंजिआए तेरासीअदिट्ठि उप्पत्ती ॥ ४९

बारसवाससएहिं अट्ठेहिं निव्वुअस्स वीरस्स ।
जिणघरमट्ठावासो पकप्पिओ सायसूरिहिं ॥ ५०

इक्कारसगुणसट्ठइ पुन्निम चंदप्पहो य रोसेणं ।
मुणिचंदायरियाओ कुप्पहपहेण सो लग्गो ॥ ५१

बारसवासगसएसु विक्कमकालाओ जलहिअहिएसु ।
जिणवल्लहकोहाओ कुच्च-उरगणाओ खरयरया ॥ ५२

पढमं चिअ संजाओ इगारगुणसट्ठि पुन्निमापक्खो ।
बारह चरुत्तरए खरतरपक्खो समुपन्नो ॥ ५३

बारहचउदहुतरए मत हुअं अंचलिआह ।
छत्तीसइ पुण फडसूअं (?)तिहा धी आगमिआंह ॥ ५४

विक्कमकालस्स गए अउणत्तीसुतरे सहस्संमि (१०२९)।
धणपालेण विरइआ देसीसद्दाण माल त्ति ॥ ५५

दुब्भिक्खंमि पणट्ठे पुणरवि मेलित्तु समणसंघाओ ।
महुराए अणुओगो पवत्तिओ खंदिलेण तया ॥ ५६

वलहीपुरंमि नयरे देवड्ढिअपमुहसयलसंघेण ।
पुत्थय आगम लिहिओ नवसय असीइ तह वीरा ॥ ५७

एगुणवीससएहि चउदसवरिसहि वीरनिव्वाणा ।
छासिवरिसाउ होही कक्की समणाण पडिकूलो ॥ ५८

पाडलिपुरंमि कक्की चंडालकुलंमि चित्तमासंमि ।
अट्ठमि विट्ठी जाओ चउम्मुहो बीयनामे वि ॥ ५९

कक्की हणिउं दत्तं तप्पुत्तं सिक्खिउं करवि(?)इंदो ।
रज्जे ठविही सो पुण पुरे पुरे चेइउं(यं) काही ॥ ६०

पंचमअरस्स अंते दोहत्थतणुअ वीसवरिसाऊ ।
कयछट्ठतवोकम्मं अट्ठंमिअं दोकरावेइ ॥ ६१

दुप्पसहो फग्गुसिरी नाइलसड्ढो अ सच्चसिरिसड्ढी ।
तह विमलवाहणनिवो सुमुहो तह पच्छिमो मंती ॥ ६२

वीसाउ दुप्पसहो एगवयारी दसालियधरो अ ।
सोहम्मे सायरओ चइउं तह सिज्झही भरहे ॥ ६३

पच्चुसे जिणधम्मो मज्झण्हे नासई अ नयधम्मो ।
अग्गी अ पच्छिमण्हे दुसमाए अंतदिवसंमि ॥ ६४

घोरमुह मच्छभक्खा किसणा वियडा मणू निरयगामी ।
छट्ठंते इगहत्था बिलवासी वीसवरिसाऊ ॥ ६५

वासाण वीससहस्स नवसय तिगमास पंचदिण पहरा ।
इक्का घडिआ दो पल अक्खर अडयाल जिणधम्मो ॥ ६६

दुसम दसमच्छरिअं भसमग्ग छेवट्ठ दाहिणं खेत्तं ।
विसमविसपंचगेहिं नरतिरिया ते जए विरला ॥ ६७

नव नव दुतडसन्ने रहचक्कवहिण गंगसिंधूणं ।
सव्वे वि बिल बहुत्तरि वेअट्टे आरओ परओ ॥ ६८

छवरिसे गब्भधरा इत्थी छसत्तअरएसु तह ।
अट्ठमए नीर-खीर-घय-अमिअ-रस-सममेहा ॥ ६९

इक्किक्को सत्तदिणे वरिसीही तत्थ निच्छुवइ पुढवी ।
पढमो बीओ धन्नो मे(ने)हो तइओ चउत्थो अ ॥ ७०

पोसेइ ओसहीओ तह रसदव्वाइ पंचमो मेहो ।
अणवंमि इरिअंमिय सिलागपुरिसाण तेवट्ठा ॥ ७१

अबुहजणजाणणत्थं सरणत्थं अप्पणो समासेण ।
कालचक्कस्स गाहा पइपहुसूरीहिं उद्धरिया ॥ ७२

# ॥ अल्पबहुत्वविचारगर्भित-महादण्डकस्तोत्रम् ॥

भीमे भवम्मि भमिओ जिणिंदआणाइवज्जिओ जाइं ।
जिअअप्पबहुट्ठाणाइं विन्नविस्सामि ताइं अहं ॥ १

गब्भयमणुया थोवा संखगुणा थी असंखगुण दुण्णि ।
बायरपज्जग्गि अणुत्तरा सुरा सत्त संख इमे ॥ २

उवरिम मज्झिम हिट्ठिम अचुयारण-पाणयाणय सुराय ।
चउदस असंख माघवइ मघा सहसार महसुक्का ॥ ३

रिट्ठा लंतक अंजण बंभय वालुय महिंद सणकुमरा ।
सक्करपह मुच्छिमनर ईसाणसुरा य अह तिण्णि ॥ ४

ईसाणदेवि सोहंमजुअल संखा असंख भवणवई ।
तद्देवी संखगुणा असंख रयणपह खगपुरिसा ॥ ५

संखा खयरी थल जलयर वंतर जोइसाण चउ जुअलं ।
कीवा नह थल जलयर पजत्त चउरिंदिया तेर ॥ ६

पज्ज पण बिय तिइंदिय अहिआ अस्संखऽपज्ज पंचिंदी ।
अहिया अपज्ज चउ तिय बिइंदि बारस असंखइमे ॥ ७

बायरपज्जपरित्ता निगोअ भू दग समीर तह अपजा ।
थूलग्गि परित्त निगोअ पुढवि जल पवण सुहुमग्गी ॥ ८

सुहुमा अपज्जभू वारि वाउ अहिआ पजग्गि संखगुणा ।
भू जल निल अहिअ निगोअ अपज्ज असंख पज संखा ॥ ९

अभविय परिवडिया सिद्ध पज्जबायरवणा अणंतगुणा ।
बायरपज्जत्तहिया अपज्जबायरवण असंखा ॥ १०

बायर अपज्ज बायर अहिया अस्संख सुहुम अपज वणा ।
सुहुम अपजत्त अहिया संखा सुहुमवणपज्जत्ता ॥ ११

अहिआ पजसुहुमा सुहुम भविय णंत वणि गिंदि तिरि मिच्छा।
अविरय कसाय छउमा सजोगि संसारि सव्वजिया ॥ १२

गुणतीसअंकतुल्ला मणुआ तेसि नरअट्ठवीसंसे ।
इगरूवूण जहन्ना सेसा इत्थी उ गब्भभवा ॥ १३

किंचूणावलिघणसमयरासितुल्ला उ बायरपजग्गी ।
णुत्तरसुराइ अट्ठ उ खित्तपलोवम असंखंसे ॥ १४

माघवयाई तेरस कमसो सेढी असंखभागेणं ।
सतरस ईसाणाई असंखसेढिप्पएससमा ॥ १५

तिगुणा तिरूवअहिआ सगवीसगुणा उ सत्तवीसहिया ।
बत्तीसगुणा बत्तीस अहिअ तिरिनरसुरत्थि कमा ॥ १६

कीवखयराइसत्तसु अंगुलसंखं सपयरसेढिहरे ।
अपजपणिंदादट्ठसु अंगुलअस्संखभागो अ ॥ १७

अस्संखपयरतुल्ला बायरपज्जत्तवाउकाया य ।
बायरअपज्जजलणाइ सोल अस्संखलोगसमा ॥ १८

अभवियचउत्थणंते पंचमि सम्माइ परिवडिय सिद्धा ।
सेसा अट्ठमणंते पजथूलवणाइ बावीसं ॥ १९

इय महदंडमसइं भमिओणुत्तरपयत्थसिद्धि विणा ।
संपइ तुह आणठिओ सामि अणुत्तरपयं देसु ॥ २०

# ॥ सारसमुच्चयकुलकम् ॥

नरनरवइदेवाणं जं सोक्खं सव्वमुत्तमं लोए ।
तं धम्मेण विढप्पइ तम्हा धम्मं सया कुणह ॥ १

उच्छन्ना किं च जरा नट्ठा रोगा य किं मयं मरणं ।
ठइयं च नरयदारं जेण जणो कुणइ न य धम्मं ॥ २

जाणइ जणो मरिज्जइ पेच्छइ लोओ मरंतयं अन्नं ।
न य कोइ जए अमरो कह तह वि अणायरो धम्मे ? ॥ ३

जो धम्मं कुणइ नरो पूइज्जइ सामिउ व्व लोएण ।
दासो पेसो व्व जहा परिभूओ अत्थतल्लिच्छो ॥ ४

इय जाणिऊण एयं वीसंसह अत्तणो पयत्तेण ।
जो धम्मओ चुक्को सो चुक्को सव्वसुक्खाणं ॥ ५

धम्मं करेह तुरियं धम्मेण य हुंति सव्वसुक्खाइं ।
सो अभयपयाणेणं पंचेन्दियनिग्गहेणं च ॥ ६

मा कीरउ पाणिवहो मा जंपह मूढ अलियवयणाइं ।
मा हरह परधणाइं मा परदारे मइं कुणह ॥ ७

धम्मो अत्थो कामो अन्ने जे एवमाइया भावा ।
हरइ हरंतो जीयं अभयं दिंतो नरो देई ॥ ८

न य किंचि इहं लोए जीयाहिंतो जियाण दइययरं ।
तो अभयपयाणाओ न य अन्नं उत्तमं दाणं ॥ ९

सो दाया सो तवसी सो य सुही पंडिओ य सो चेव ।
जो सव्वसुक्खबीयं जीवदयं कुणइ खंतिं च ॥ १०

किं पढिएण सुएण व वक्खाणिएण काइं किर तेण ।
जत्थ न नज्जइ एयं परस्स पीडा न कायव्वा ॥ ११

जो पहरइ जीवाणं पहरइ सो अत्तणो सरीरंमि ।
अप्पाण वेरिओ सो दुक्खसहस्साण आभागी ॥ १२

जं काणा खुज्जा वामणा य तह चेव रुवपरिहीणा ।
उप्पज्जंति अहन्ना भोगेहिं विवज्जिया पुरिसा ॥ १३

इय जं पाविंति य दुहसयाइं जणहियसोगजणयाइं ।
तं जीवदयाए विणा पावाण वियंभियं एयं ॥ १४

जं नाम किंचि दुक्खं नारयतिरियाण तह य मणुयाणं ।
तं सव्वं पावेणं तम्हा पावं विवज्जेह ॥ १५

सयणे धणे य तह परियणे य जो कुणइ सासया बुद्धी ।
अणुधावंति कुढेणं रोगा य जरा य मच्चू य ॥ १६

नरए जिय ! दुस्सहवेयणाउ पत्ताउ जाओ पइं मूढ ! ।
जइ ताओ सरसि इन्हि भत्तं पि न रुच्चए तुज्झ ॥ १७

अच्छंतु ताव निरया जं दुक्खं गब्भवासमज्झंमि ।
पत्तं तु वेयणिज्जं तं संपइ तुज्झ वीसरियं ॥ १८

भमिऊण भवग्गहणे दुक्खाणि य पाविऊण विविहाइं ।
लब्भइ माणुसजम्मं अणेगभवकोडिदुल्लंभं ॥ १९

तत्थ वि य केइ गब्भे मरंति बालत्तणंमि तारुन्ने ।
अन्ने पुण अंधलया जावज्जीवं दुहं तेसिं ॥ २०

अन्ने पुण कोढियया खयवाहीसहियपंगुभूया य ।
दारिद्देणऽभिभूया परकम्मकरा नरा बहवे ॥ २१

ते चेव जोणिलक्खा भमियव्वा पुण वि जीव ! संसारे ।
लहिऊण माणुसत्तं जं कुणसि न उज्जमं धम्मे ॥ २२

इय जाव न चुक्कसि एरिसस्स खणभंगुरस्स देहस्स ।
जीवदयाउवउत्तो ता कुण जिणदेसियं धम्मं ॥ २३

कम्मं दुक्खसरुवं दुक्खाणुहवं च दुक्खहेउं च ।
कम्मायत्तो जीवो न सुक्खलेसं पि पाउणइ ॥ २४

जह वा एसो देहो वाहीहिं अहिट्ठिओ दुहं लहइ ।
तह कम्मवाहिघत्थो जीवो वि भवे दुहं लहइ ॥ २५

जायंति अपच्छाओ वाहिओ जहा अपच्छनिरयस्स ।
संभवइ कम्मवुड्ढी तह पावा पच्छनिरयस्स ॥ २६

अइगरुओ कम्मरिऊ कयावयारो य नियसरीरत्थो ।
एस उविक्खिज्जंतो वाहि व्व विणासए अप्पं ॥ २७

मा कुणह गयनिमोलं कम्मविघायंमि किं न उज्जमह ।
लद्धूण मणुयजम्मं मा हारह अलियमोहहया ॥ २८

अच्चंतविवज्जासियमइणो परमत्थदक्खरुवेसु ।
संसारसुहलवेसुं मा कुणह खणं पि पडिबंधं ॥ २९

किं सुमिणदिट्ठपरमत्थसुन्नवत्थुस्स करहु पडिबंधं ।
सव्वं पि खणियमेयं विहडिस्सइ पेच्छमाणाण ॥ ३०

संतंमि जिणुद्दिट्ठे कम्मक्खयकारणे उवायंमि ।
अप्पायत्तंमि न किं तद्दिट्ठभया समुज्जेह ॥ ३१

जह रोगी कोई नरो अइदुसहवाहिवेयणादुहिओ ।

तद्दुहनिव्विन्नमणो रोगहरं वेज्जमन्निसइ ॥ ३२

तो पडिवज्जइ किरियं सुवेज्जभणियं विवज्जइ अपच्छं ।
तुच्छन्नपच्छभोइ इसी सुवसंतवाहिदुहो ॥ ३३

ववगयरोगायंको संपत्ताऽऽरोग्गसोक्खसंतुट्ठो ।
बहु मन्नेइ सुवेज्जं अहिणं देइ वेज्जकिरियं च ॥ ३४

तहु कम्मवाहिगहिओ जम्मणमरणाउइन्नबहुदुक्खो ।
तत्तो निव्विन्नमणो परमगुरुं तयणु अन्निसइ ॥ ३५

लद्धंमि गुरुंमि तओ तव्वयणविसेसकयअणुट्ठाणो ।
पडिवज्जइ पव्वज्जं पमायपरिवज्जणविसुद्धं ॥ ३६

नाणाविहतवनिरओ सुविसुद्धासारभिक्खभोई य ।
सव्वत्थ अप्पडिबद्धो सयणाइसु मुक्कवामोहो ॥ ३७

एमाई गुरुवईट्ठं अणुट्ठमाणो विसुद्धमुणिकिरियं ।
मुच्चइ नीसंदिद्धं चिरसंचियकम्मवाहीहिं ॥ ३८

पू.महोपाध्यायश्री यशोविजयगणिविरचितः

## ॥ चक्षुरप्राप्यकारितावादः ॥

ऐँकारकलितं ज्योतिर्ध्यायन्न्यायविशारदः ।
चक्षुरप्राप्यकारित्व-साधनायोपतिष्ठते ॥ १

चक्षुषः प्राप्यकारित्वे शाखाचन्द्रमसोर्ग्रहः ।
तुल्यकालः कथं नु स्यान्निकटस्थदवीयसोः ॥ २

निःसरन्तोऽक्षि विस्तीर्णं नयनान्नायनांशवः ।
आरभन्ते ततस्तुल्यकालः स इति शालिकः ॥ ३

तन्त्रालोकं समासाद्या – सम्भवात् तस्य जन्मनः ।
पृष्ठस्थितग्रहापत्तेरपीत्येवं परे जगुः ॥ ४

शीघ्रप्राप्त्याभिमानोऽक्ष्णो वेगातिशयतो द्वयोः ।
यौगपद्ये परिच्छित्योरित्यत्रोदयनो जगौ ॥ ५

तदप्यसत् यतो नैवमनुव्यवसितिर्द्वयोः ।
घटेत क्षणिकत्वेन ज्ञानयोस्तव दर्शने ॥ ६

आरोप्यानुभवत्वं तत् समूहालम्बनस्मृतौ ।
तथाऽनुव्यवसायश्चेदिदं किञ्चिदलौकिकम् ॥ ७

अग्रावच्छिन्नसंयोगात् तिर्यग्भागस्थयोर्द्वयोः ।
तुल्यकालं परिच्छेदं वर्धमानस्तु मन्यते ॥ ८

तेन प्रसारिताक्षेण प्रत्युदीचीं महीयसि ।
चान्द्रे महसि सौरे वा प्रेक्षे(क्ष्ये)त कनकाचलः ॥ ९

तद्गतेर्नियतत्वेन न दोष इति चेन्मतम् ।
तत्तद्धेतोरिति न्यायाज्-ज्ञापकं स्तान्नियामकम् ॥ १०

अनन्तचक्षुःसंयोगकल्पनागौरवादिकम् ।
इत्थं खलु परित्यक्तं वैलक्षण्यं च तेजसः ॥ ११

एतेन गृह्णदप्राप्तं गृह्णीयाद् व्यवधानभाक् ।
अप्राप्तत्वाविशेषेण वस्तुचक्षुरसंशयम् ॥ १२

स्थैर्ये च योग्यता सैवाऽस्थैर्येऽपि सहकारिणः ।
नार्थेतिशयमप्रत्यासीदन्तः कर्तुमीशते ॥ १३

कुर्वद्रूपक्षणात्मायं संयोगोऽस्माभिरत्र च ।
बौद्धैर्निरन्तरोत्पादः प्रत्यासत्तिश्च भण्यते ॥ १४

तदेतदुभयं कृष्णसारस्यार्थेन नोचितम् ।
गतिक्रमेण किन्त्वक्षणस्तद् युज्येतेत्यपाकृतम् ॥ १५

योग्यता तद्गतौ या वः सहकारिसमुच्चयात् ।
स्वरूपयोग्यताध्रौव्येऽप्यस्माकं न क्षतिस्तया ॥ १६

ग्राह्याधिपरिमाणं हि ग्राह्य-ग्राहकमध्यगम् ।
चाक्षुष्के वक्तुमुचितं, भित्त्यादिप्रतिबन्धकम् ॥ १७

यत्त्वेवं खलु भित्त्यादि स्वप्राचीस्थस्य चाक्षुषे ।
स्वप्रतीचीगतत्वेन वक्तव्यं प्रतिबन्धकम् ॥ १८

तथा च गौरवात्क्लृप्ते चक्षुषो द्रव्यचाक्षुषे ।
संयोगेनैव हेतुत्वे नार्तिः फलमुखात्ततः ॥ १९

विचार्यमप्यदो भट्टाचार्याणां वचनं बुधैः ।
सर्वत्रानुगता यस्मात् सम्बन्धो योग्यतैव हि ॥ २०

अप्याकर्षत्यनाश्लिष्टं लोहं लोहोत्पलो यथा ।
योग्यत्वेन तथाऽप्राप्तं गृह्णीयाच्चक्षुरप्यहो ॥ २१

योग्यत्वं च स्वभावः स्यादनादिः पारिणामिकः ।
अन्ये त्वागन्तुकं तत्त्वं नैयत्याख्यं प्रचक्षते ॥ २२

स्वभावस्य परावृत्तिस्तत् तद् ज्ञात्राद्यपेक्षया ।
एकस्वभावानुगता त्रैलक्षण्यं न बाधते ॥ २३

आवृत्तानावृत्तत्वाभ्यां योग्यायोग्यत्वभेदभाक् ।
इत्थमेवोपपन्नः स्याद् व्यवहारोऽपि तात्त्विकः ॥ २४

आवृतत्त्वं च संयोगो महारजनरक्तवत् ।
वक्तुमत्र न शक्येतान्यत्र चातिप्रसङ्गतः ॥ २५

भावभङ्ग्याऽविरोधार्थमभावस्य प्रजल्पनम् ।
नद्यां निमज्जतां काश-कुशालम्बनमेव हि ॥ २६

शङ्करस्वामिमुख्याणामस्माभिर्दूषणेष्वदः ।
व्याख्यातवद्भिराख्यातं शास्त्रवार्तासमुच्चयम् ॥ २७

अस्तु वा वस्तुवादोऽयं योऽयं व्यवहिताग्रहः ।
स तदावरणाह्रासान्नचातो योगिनामिति ॥ २८

आपत्तिर्जगति व्यक्तिस्थानीया तु न विद्यते ।
विद्यते चेत् तदत्रापि तत्स्वाभाव्यं सदुत्तरम् ॥ २९

धनादि हि व्यवहितं संस्कृतेनाञ्जनादिना ।
नयनेन न किं नाम लोकेनाऽपि न दृश्यते ॥ ३०

द्रव्यं क्षेत्रं च कालं च भवं भावं च जन्मिनां ।
प्रतीत्य कर्मणां चित्रः क्षयोपशम इष्यते ॥ ३१

यदवच्छिन्नसंयोगं चक्षुर्ननु करोति हि ।
तदवच्छिन्न आलोक-संयोगो द्रव्यचाक्षुषम् ॥ ३२

इत्थं च प्राप्यकारित्वमिति चेन्नात्र यन्मता ।
अनुषक्तावयविका देशापेक्षैव योग्यता ॥ ३३

देश-देशिषु सम्बन्धभेदकल्पनकष्टतः ।
मोचयेत् त्वामिहान्यः को विना स्याद्वादबान्धवम् ॥ ३४

इत्थं पृथुतरज्ञानं त्वग्दृष्टान्तेन चक्षुषः ।
समर्थितं स्वमानेन वर्धमानेन नार्थवत् ॥ ३५

स्यादेतद्यदि नेत्रस्य पृथ्वग्रत्वेन दीपवत् ।
तद्वदेव तदा भायात् भाग्रं तत्प्रतिसम्प्लुतम् ॥ ३६

निमीलनेन नष्टं चोत्पन्नं चोन्मीलनादिना ।
कः श्रद्दधीत नयनं विना नैयायिकं पशुम् ॥ ३७

एतेन गोलकाश्लिष्टासन्निकर्षान्निमीलने ।
चक्षुषार्थ-ग्रहापत्तिपरिहारो निराकृतः ॥ ३८

अप्राप्यकार्यधिष्ठानासम्बन्धार्थग्रहादपि ।
चक्षुर्यदीदृशी व्याप्तिरिन्द्रियेषु न बाधिता ॥ ३९

काचाद्यन्तरितार्थानामुपलब्धेरपि स्फुटम् ।
इत्थमेतन्न चात्रापि प्रभावत् सुसमर्थनम् ॥ ४०

काचादिकं हि निर्भिद्य गच्छेयुर्यदि रश्मयः ।
तदा ते कमलादिनां भेदेऽपि स्युः प्रभूष्णवः ॥ ४१

संसर्गिद्रव्यसच्छाये परिणामे प्रसारिणि ।
प्रसत्तिरुपयुक्ता स्यान्न तु स्वाश्रयभेदने ॥ ४२

सर्व्वतो हि प्रसन्नस्य तथा परिणतिर्ध्रुवा ।
परभागे तु विषमे पुरस्थप्रतिबिम्बनम् ॥ ४३

काचादिनां तु भिन्नानामुत्पन्नानां च तादृशाम् ।
आश्रयेद् बौद्धसिद्धान्तं प्रत्यभिज्ञादिसङ्गतिः ॥ ४४

तस्मात् काचादिभिन्नानां व्यवधायकता स्थितौ ।
सर्वमेवोपपन्नं स्यात् योग्यतामेव भेजुषां ॥ ४५

अल्पाल्पतरभेदेन प्रचितावरणस्य च ।
मन्दातिशयितज्ञान-भेदोऽत्र न विरुध्यते ॥ ४६

ननु स्वव्याप्तसङ्ख्याकाऽवयवेष्वेव चक्षुषः ।
हस्तद्वयग्रहो न स्यान्नूनं संयोगमन्तरा ॥ ४७

नैवं यदन्यथाप्यस्य वितस्तिद्वैत रूपिणः ।
ग्रहोऽपीति तथाज्ञाने योग्यतैव नियामिका ॥ ४८

नो चेद्धस्तद्वयमिति द्विकपालघटे तव ।
उपायस्तत् ग्रहापत्तेः शान्तये कोंऽशदर्शने ॥ ४९

अनुग्रहोपघातौ चाभिष्टानिष्टार्थयोगतः ।
स्यातां देह इवावश्यं चक्षुषि प्राप्यकारिणि ॥ ५०

इष्टापत्तिश्च नेन्द्वर्क-किरणाभ्यामिहोचिता ।
त्वग्वत् प्राप्तेन मूर्तेन यतः प्राप्तस्य तौ न तु ॥ ५१

अनुग्रहोपघातौ चेत् सुखदुःखात्मकौ ननु ।
तदा तौ कथमापाद्यौ नयनस्यार्थयोगिनः ॥ ५२

अवच्छेद्यौ शरीरेणेन्द्रियेण तु न तौ यतः ।
नेत्रावच्छिन्नतत्प्राप्तिस्ततो न विषयस्थले ॥ ५३

अर्थप्राप्तिनिमित्तौ च तावधिष्ठानसङ्गतौ ।
सूक्ष्मेन्द्रियाश्रयौ नैव पुष्टिहान्यादिलक्षणौ ॥ ५४

अत्र ब्रूमोऽनयोर्हेतुरिन्द्रियप्राप्तिरेव हि ।
शरीरेणानवच्छिन्ने कार्ये तु तदकारणम् ॥ ५५

उक्तापत्तिस्ततो युक्ता सौक्ष्म्येऽपि च विरोधिनाम् ।
नादृष्टमौषधादीनां सामर्थ्यं तद् विभेदने ॥ ५६

रूपं पश्यति चास्पृष्टमिति सूत्रं व्यवस्थितम् ।
चक्षुरप्राप्यकारित्वसाधनायेति शोभनम् ॥ ५७

श्रीमन्नयादि-विजयाभिधानां सुधियां शिशुः ।
चक्रे वादममुं प्रीत्या यशोविजय-पण्डितः ॥ ५८

कर्णेजपानां कुधियां परं कर्णज्वरं तथा ।
करोत्वयं सकर्णानां कर्णपीयूष-पारणम् ॥ ५९

पू.उपाध्यायश्री चारित्रनन्दिविरचिता

## ॥ स्याद्वादपुष्पकलिका ॥

नत्वा संयमवामेयं गुरुं नौनिधिवाचकम् ।
स्याद्वादपुष्पकलिकां दर्शयामि जिनागमात् ॥ १

धर्माधर्मव्योमजीवपुद्गलाद्धा भवन्ति च ।
रसोन्मितानि द्रव्याणि लोको द्रव्यात्मकः स्मृतः ॥ २

अथैकादशद्वारकारिका-
लक्षणगुणपर्यायस्वभावास्तिनयानि च ।
भावजीवानुयोगाश्च द्रव्येषु वितनोम्यहम् ॥ ३

यत्सत्तल्लक्षणं द्रव्यं व्ययोत्पादध्रुवान्वितम् ।
त्रयोदशः स्युर्धृतिकः सामान्येतरतो गुणाः ॥ ४

अथ सामान्यगुणकारिका-
द्रव्यत्वास्तित्ववस्तुत्वप्रदेशत्वप्रमेयकम् ।
सत्त्वं चागुरुलघुत्वं चेतनाचेतनस्तथा ॥ ५

मूर्तामूर्तक्रियान्यानि सामान्याः स्युस्त्रयोदश ।
अथ विशेषगुणा :
दर्शनज्ञानसौख्यं च वीर्यं षट् चेतनादयः ॥ ६

वर्णगन्धरसस्पर्शगतिस्थित्यवगाहना ।
वर्तनाहेतुचत्वारोऽष्टादश स्युर्विशेषिकाः ॥ ७

अथ पर्यायाः-
द्रव्यगुणविकारा ये पर्यायाः प्रवदन्ति ते ।
निजभावविभावाभ्यां द्विविधाः स्युर्जिनागमे ॥ ८

वा द्रव्ये रसपर्यायाः स्युर्द्रव्ये द्रव्यव्यञ्जनः ।
गुणगुणव्यञ्जनकः स्वभावान्ये भवन्ति च ॥ ९

अथ सामान्यस्वभावाः
नित्यैकास्तिभेदभव्यवक्तव्येतरकोत्कटाः ।
सामान्यानि स्वभावाः स्युः त्रयोदशमितानि च ॥ १०

अथ विशेषस्वभावाः
मूर्तचेतनशुद्धैकप्रदेशप्रतिपक्षिकाः ।
विभावाश्चोपचरितस्वभावाः स्युर्विशेषिकाः ॥ ११

अथास्तिकायः-
जीवाजीवप्रभेदाभ्यां स्याद् द्विविधोऽस्तिकायिकः ।
नूनं जीवस्त्वेकविधोऽपरो धर्मादिकाम्बुधिः ॥ १२

अथ नयाभिधानानि-
द्रव्यपर्यायार्थिकाभ्यां मूलतोऽस्ति नयद्विधा ।
अथ द्रव्यार्थिकभेदाः
शुद्धसत्तैकद्रव्यार्थाशुद्धनित्यस्वरूपकाः ॥ १३

सद्वक्तव्यान्वयोत्कृष्टपरमभावकास्तथा ।
द्रव्यार्थिको दशविधो भवेत्तीर्थङ्करागमे ॥ १४

अथ पर्यायार्थिकभेदाः
पर्यायार्थिकभेदाश्च पूर्वोक्ता द्रव्यकादयः ।
वानादिसादितो नित्यौ नित्यशुद्धेतरौ भवेत् ॥ १५

नित्याशुद्धेतरौ ज्ञेयौ भवन्ति षड्विधानि च ।
इमेऽपि भेदाः सिद्धान्ते वदन्ति पूर्वसूरयः ॥ १६

द्रव्यपर्याययोर्भेदा नयैः सन्ति महीधराः ।
नैगमसङ्ग्रहव्यवहारर्जुसूत्रकानि च ॥ १७

द्रव्यार्थिकोऽस्ति चत्वारः सत्पर्यायार्थिकस्त्रिधा ।
शब्दसमभिरुढैवम्भूतभेदेन विद्यते ॥ १८

आरोपसङ्कल्पांशैश्च नैगमस्त्रिविधो भवेत् ।
उपचारकमादृत्य महाभाष्ये चतुर्विधः ॥ १९

द्रव्यकालगुणारोपो हेत्वाद्यारोपभेदतः ।
नैगमोदधिभेदः स्यात्सङ्कल्पो द्विविधो भवेत् ॥ २०

प्रथमः स्वपरिणामः कार्यान्तर(रो)द्वितीयकः ।
भिन्नाभिन्नस्वरूपाभ्यामंशोऽपि द्विविधो भवेत् ॥ २१

इति नैगमोत्तरभेदाः ।
सङ्ग्रहो द्विविधः प्रोक्तः सामान्यसुविशेषतः ।
मूलोत्तरप्रभेदाभ्यां सामान्यो द्विविधः स्मृतः ॥ २२

आद्योऽस्तित्वादिषड्भेदोऽस्त्युत्तरो विविधः स्मृतः ।
स्वसमुदायभावेन भिन्नरूपकजातितः ॥ २३

वा व्यतिरेकानुगमसङ्गृहीतसुपिण्डताः ।
सङ्ग्रहः स्याच्चतुर्भेदो विशेषावश्यकागमात् ॥ २४

इति सङ्ग्रहः ।
शुद्धाशुद्धप्रभेदाभ्यां व्यवहारो युगः स्मृतः ।
वस्तुगतसाधनाभ्यां शुद्धः स्याद् द्विविधः श्रुतौ ॥ २५

सद्भूतकेतराभ्यां च अशुद्धोऽपि भवेद् द्विधा ।
असद्भूतोऽपि द्विविधः स्यात्संश्लिष्टेतरेण च ॥ २६

व्यवहारो युगं स्याद्वा विभजनप्रवृत्तितः ।
प्रवृत्तिस्त्रिविधा ज्ञेया वस्तुसाधनलौकिकात् ॥ २७

लोकोत्तरा लौकिका च कुप्रावचनिका तथा ।
साधना त्रिविधा प्रोक्ता विशेषावश्यकागमे ॥ २८

ग्रन्थान्यस्मिन् शुद्धशुभोपचरितेतरैस्तथा ।
व्यवहारो रसविधो भवेत्तज्ज्ञानुसारतः ॥ २९

इति व्यवहारोत्तरभेदाः ।

प्रवृत्तिकालमादृत्य ऋजुसूत्रनयो भवेत् ।
नामाद्यब्धिप्रकारेण मत्या द्रव्येषु योजयेत् ॥ ३०

इति ऋजुसूत्रः ।

सुवाच्यार्थग्राहकेन तत्समः स्वक्रियान्वितः ।
भावनिक्षेपमादृत्य द्रव्ये शब्दनयो भवेत् ॥ ३१

आविर्भावतिरोभावैरनेकधर्मसंयुतः ।
सप्तभङ्ग्यनुयोगेन वदेच्छब्दनयः श्रुतौ ॥ ३२

प्रत्येकमेकभेदोऽस्ति श्रुतौ शब्दनयादयः ।
पर्यायार्थिकमन्येऽत्र वदन्ति ऋजुसूत्रकम् ॥ ३३

इति शब्दः ।

सञ्ज्ञान्तरार्थविमुखो भवेत्समभिरूढकः ।
सर्वभावेषु या सञ्ज्ञा तां तामेव वदेद् ध्रुवम् ॥ ३४

इति समभिरूढः ।

एवं यथा शब्दभावः शब्दार्थेषु व्यवस्थितः ।
यत्प्रवृत्तिस्तत्तथैव सैवम्भूतो निगद्यते ॥ ३५

इत्येवम्भूतः ।

परोक्षप्रत्यक्षाभ्यां च प्रमाणं द्विविधं स्मृतम् ।
परोक्षमिन्द्रियज्ञानं प्रत्यक्षं स्यादनिन्द्रियम् ॥ ३६

इति प्रमाणम् ।

क्षायिकोपशममिश्रपरिणामोदयस्तथा ।
षष्ठमः सन्निपातश्च भावाः सन्ति जिनागमे ॥ ३७

कैवल्यदर्शनज्ञानं तथा क्षायिकदर्शनम् ।
क्षयान्तरायचारित्रखगाः सन्त्युत्तराणि च ॥ ३८

शमदर्शनचारित्रौ युगलोपशमो भवेत् ।
ज्ञानाम्बुनिध्यज्ञानानि त्रिदर्शन-गृहस्थकाः ॥ ३९

संयमी मिश्रसम्यक्त्वदानादिशरलब्धयः ।
मिश्रभावोत्तराः भेदाः भवन्त्यष्टादश श्रुतौ ॥ ४०

कषायसंयमज्ञानलेश्यासिद्धचतुर्गतिः ।
वेदमिथ्यात्वोत्तराः स्युरेकविंशतिधोदयः ॥ ४१

जीवभव्याभव्यभेदैः परिणामस्त्रिधा भवेत् ।
इमान्युत्तरभेदानि भावानां प्रविनिर्ममे ॥ ४२

इति भावः ।

भवेज्जीवस्त्वेकविधः स्वनुयोगश्चतुर्विधः ।
द्रव्यचारित्रगणितसुधर्माः स्युर्जिनागमे ॥ ४३

देशगः सर्वगश्चैव क्षेत्रोभयविधः स्मृतः ।
शिवोन्मितानि द्वाराणि लेशेनेत्थमचीकथन् ॥ ४४

इति द्वारोत्तरभेदाः ।

जीवाजीवस्वरूपश्च लोके राशिद्विकः स्मृतः ।
धर्माधर्मा अस्तिकायाः भवन्ति पुद्गलास्तथा ॥ ४५

सिद्धसंसारिभेदाभ्यां जीवस्तु द्विविधः स्मृतः ।
निजभावविभावाभ्यां भवेत्पर्यायभेदतः ॥ ४६

जीवादिवस्तुनो भावः स्वरूपं तत्त्वमेव हि ।
यत्सर्वथाविरोधेन व्याप्यव्यापकभावतः ॥ ४७

यं लक्ष्यते यथार्थेन वस्तु सद्रूपलक्षणम् ।
क्षेत्रकालभावकानामेकपिण्डस्वरूपकम् ॥ ४८

कार्यभेदेन भावानां द्रव्ये भेदा भवन्ति च ।
तज्ज्ञागमानुसारेण ज्ञातव्या जिनशासने ॥ ४९

व्ययोत्पादध्रुवयुतं यत्सत्तद् द्रव्यलक्षणम् ।
भवेत्समग्रद्रव्येषु योज्यं मेधानुसारतः ॥ ५०

द्रव्यपर्याययुगलनयमाश्रित्य लक्षणम् । इति ।
गुणपर्यायवद् द्रव्यमेतत्पर्यायमादृतः ॥ ५१

अर्थक्रियाकारि द्रव्यं स्वस्वधर्मसमादृतैः ।
इत्यादयो रसगुणाः परिणामादिभावतः ॥ ५२

द्रव्याद् द्रव्यपृथग्भावो यैस्ते प्रक्रियते गुणाः ।
द्रव्येषु ये गुणाः सन्ति वच्म्यहं तान् जिनागमात् ॥ ५३

द्रव्यैकस्मिन्प्रदेशे च शक्याः स्वकार्यहेतवो ।
सन्त्यनन्ताविभागा ये पर्यायसञ्ज्ञया गुणाः ॥ ५४

धर्माधर्माभ्रद्रव्येषु मूर्तचेतनसक्रियम् ।
विहाय दिग्गुणाः सन्ति सामान्यानि बुधोदिताः ॥ ५५

जीवाक्रियामूर्तकत्वं मूर्तत्वचेतनाक्रियम् ।
विमुच्य पुद्गले जीवे सामान्याः प्रभवन्ति ते ॥ ५६

अचैतन्यामूर्तगत्यक्रिया धर्मे द्वयोत्कटाः ।
गतिं मुक्त्वा स्थितिक्षेपादधर्मे सन्ति वारिधिः ॥ ५७

तथावगाहनक्षेपात्परावर्तनकस्य च ।
विशेषाब्धिगुणाः सन्ति क्रमादम्बरकालयोः ॥ ५८

वीर्यदृष्टिज्ञानसुखचैतन्यमूर्तकानि च ।
विशेषाः षड् गुणाः ज्ञेया जीवद्रव्ये भवन्ति च ॥ ५९

वर्णगन्धरसस्पर्शाचैतन्यरूपकास्तथा ।
गुणास्ते पुद्गले सन्ति गुणद्वारं प्ररूपितम् ॥ ६०

इति गुणद्वारम् ।
प्रदेशासङ्ख्यकैकत्वस्थितिर्द्रव्यं निगद्यते ।
गुणोत्कटान्यद्रव्याणां प्रोच्यते द्रव्यव्यञ्जनः ॥ ६१

गुणाविभागानन्ताः पर्यायव्यूहका गुणाः ।
ज्ञानादयः कार्यरूपाश्चतुर्थो गुणव्यञ्जनः ॥ ६२

द्रव्येषु ये स्वपर्यायाः प्रोच्यन्ते ते स्वभावजाः ।
ये द्रव्येष्वन्यपर्यायास्ते विभावा निगद्यते(न्ते) ॥ ६३

प्रदेशासङ्ख्यपिण्डत्वस्थितिद्रव्येषु द्रव्यकः ।
गत्यादयो विशेषाश्च धर्मोऽस्ति द्रव्यव्यञ्जनः ॥ ६४

तथा स्थित्यादयोऽधर्मेऽवगाहप्रमुखा अम्बरे ।
चैतन्यत्वादयो जीवे पुद्‍गले वर्णकादयः ॥ ६५

परावृत्त्यादयः काले गदितो द्रव्यव्यञ्जनः ।
गुणाविभागानन्तानि द्रव्येषु तृतीयो भवेत् ॥ ६६

धर्माधर्माभ्रकालेष्वरूपावर्णादयो गुणाः ।
जीवे ज्ञानादिकानां च ज्ञानं स्याद् गुणव्यञ्जनः ॥ ६७

पुद्‍गले रूपमादृत्य वर्णगन्धरसादयः ।
गुणव्यञ्जनपर्यायाः द्रव्येषु गदिता मया ॥ ६८

स्वपर्याया (अ)गुरुलघुविकारास्ते स्वभावजाः ।
षड्‍गुणाः वृद्धिहानिभ्यां सर्वद्रव्येषु विद्यन्ते ॥ ६९

जीवे विभावपर्यायाश्चत्वारो गतयः स्मृताः ।
द्व्यणुकादयः पुद्‍गले स्कन्धा भवन्त्यनन्तकाः ॥ ७०

अनादिनित्यपर्यायैः भूधराः सन्ति भूतले ।
एवं द्रव्येषु पर्यायद्वारं निगदितं मया ॥ ७१

इति पर्यायद्वारम् ॥

शुद्धाशुद्धमूर्तजीवविभावेषुस्वभावकान् ।
विमुच्य धर्मादित्रिषु दिग्गजाः स्युः स्वभावजाः (काः) ॥७२

बहुप्रदेशमुक्तेन काले दिग्भूधराधिकाः ।
जीवपुद्‍गलयोरेकविंशतिः स्युः स्वभावकाः ॥ ७३

नित्यावस्थितान्यरूपाणि तत्त्वार्थे प्रवदन्ति च ।
लोके समग्रद्रव्येषु गुणपर्यायकेषु च ॥ ७४

तद्भावाव्ययभावेन नित्यमिति प्रवक्ष्यते ।
पञ्चत्वभूतार्थत्वाभ्यां द्वितीयोऽव्यभिचारतः ॥ ७५

स्पर्शादिमूर्त्यभावेन अरूपीति निगद्यते ।
सामान्यान्यविशेषानि सूत्रोक्तानि भवन्ति ते ॥ ७६

मूर्तत्वगुणमादृत्य पुद्गला एव रूपिणः ।
विशेषगुणसंयुक्ता मूर्ताः सन्ति रसादयः ॥ ७७

आकाशादेकद्रव्याणि धर्मादीनि भवन्ति च ।
तथैवानेकद्रव्याणि विद्यन्ते जीवपुद्गलाः ॥ ७८

धर्मादयो निःक्रियाणि जीवपुद्गलसक्रिये ।
प्रदेशावयवव्यूहैः प्रोच्यन्ते कायसञ्ज्ञका ॥ ७९

परमाणून्यवयवा सुस्कन्धानां निरन्तरम् ।
स्कन्धाणुघातभेदेभ्यः प्रदेशाः सन्त्युत्पत्तितः ॥ ८०

तत्र धर्माधर्मयोश्च प्रदेशाः सन्त्यसङ्ख्यकाः ।
क्षेत्रे समग्रसूक्ष्मः स्यात्परमाणो(र)वगाहकः ॥ ८१

जीवैकं द्रव्यमादृत्य प्रदेशाः सन्त्यसङ्ख्यकाः ।
तथैव लोकाकाशस्य गगनस्य त्वनन्तकाः ॥ ८२

सङ्ख्यासङ्ख्यानन्तकाश्च पुद्गलानां प्रदेशकाः ।
भवन्त्यणुरप्रदेशो मध्याद्यभावतः खलु ॥ ८३

परिणामसप्रदेशनित्यकर्तृत्वकारणम् ।
क्रियसर्वगताश्चैव भवन्ति निश्चयेतरात् ॥ ८४

द्रव्येषु मूलसामान्यस्वभावामी (वा अ) भवन्ति षट् ।
अस्तित्वं वस्तु द्रव्यत्वं प्रमेयत्वं चतुर्थकम् ॥ ८५

सत्त्वं चागुरुलघुत्वं द्रव्येष्वेते निरन्तरम् ।
परिणामिकभावेन स्वतः परिणमन्ति च ॥ ८६

आधारभूतधर्मत्वमस्तित्वं च द्वितीयकम् ।
अर्थक्रियायाः कारित्वं द्रव्यत्वं स्याज्जिनागमे ॥ ८७

वोत्पादव्यययोर्मध्ये पर्यायोत्पादकानि च ।
जनकं प्रसवत्वं वाविर्भावलक्षणं भवेत् ॥ ८८

व्ययपर्यायकाणां च यस्तिरोभावको भवेत् ।
अभावरूपाया शक्तेराधारं द्रव्यलक्षणम् ॥ ८९

स्वान्यात्मकं बोधरूपं यज्ज्ञानं स्यात्प्रमाणकम् ।
तेन प्रमातुं यद्योग्यं प्रमेयत्वं तदुच्यते ॥ ९०

ध्रौव्योत्पादव्यययुतं तत्सत्त्वं प्रविनिर्दिशेत् ।
षट्गुणवृद्धिहानिभ्यां स्वभावोऽस्त्यगुरुलघुः ॥ ९१

द्रव्यगुणप्रदेशाश्च भेत्तुं शक्या भवन्ति ये ।
सर्वद्रव्याधारभूतो (तम)गुरुलघुत्वमुच्यते ॥ ९२

एते रसस्वभावाश्च सर्वद्रव्येषु सर्वदा ।
पारिणामिकयोगेन सामान्यानि (श्च) गदन्ति ते ॥ ९३

वस्तुष्वनन्तकाः सन्ति प्रोक्ताः सामान्यका जिनैः ।
त्रयोदशापि पश्यन्ति अनेकान्तजयादिषु ॥ ९४

पारम्पर्याप्रच्युतिभ्यां नित्यो युगविधः स्मृतः ।
कूटस्थपरिणामी द्वौ ग्रन्थान्ये विद्य(द्ये)तेऽथवा ॥ ९५

कार्यान्वयकारणाभ्यां युक्तो नित्यस्वभावकः ।
द्रव्याणां गुण बोधायानित्योऽप्यस्ति द्वितीयकः ॥ ९६

सर्वस्वभावपर्यायाधारभूतप्रदेशकान् ।
स्वक्षेत्रभिन्नरूपाणामेकोऽस्त्येकत्वपिण्डतः ॥ ९७

क्षेत्रकालसुभावानां गुणविभागयोगतः ।
भिन्नकार्यप्रवृत्तीनां भवेद्भिन्नप्रवाहकः ॥ ९८

द्रव्यैकभावाभावेन सामान्यविरहो भवेत् ।
तेष्वनेकाभावयोगाद्विशेषाभावकस्तथा ॥ ९९

स्वद्रव्यादिचतुष्केन व्याप्यव्यापकसंस्थितान् ।
भावाद्भावान्तरो हेतुस्तद्रूपो वस्तुनो भवेत् ॥ १००

द्रव्याद्यपरजातीनां स्वद्रव्यादिचतुष्टये ।
सदा व्यवस्थितानां च द्रव्याद्यन्यविवक्षिते ॥ १०१

सर्वदैवाविच्छिन्नानामन्यधर्मसमुच्चयाः ।
व्यावृत्तिरूपो यो भावः प्रोच्यते नास्तिरूपकः ॥ (यु.) १०२

यथा जीवे गुणव्यूहाः सज्ज्ञानदर्शनादयः ।
तेषामस्तिस्वभावोऽस्ति नास्तिकोऽन्यगुणादिकान् ॥ १०३

घटे घटधर्मास्तित्वं नास्तित्वं परधर्मतः ।
एवं समग्रद्रव्येषु अस्तिनास्त्युभको भवेत् ॥ १०४

स्वपरोभयपर्यायैः सद्भावेतरकोद्भवैः ।
कुम्भः कुम्भाकुम्भकौ द्वाववक्तव्योभयाद्भवेत् ॥ १०५

एतेऽस्त्यादिस्त्रयो भङ्गाः पूर्णवस्तुसमादरात् ।
भवन्ति सकलादेशा विकलादेशकाः परे ॥ १०६

निजान्यसत्त्वासत्त्वेन सदसच्च घटोऽघट: ।
जीवोऽपि स्वान्यपर्यायै: सदसद्विद्यते खलु ॥ १०७

विवक्षित: स्वै: सद्भावोऽन्यदेशे स्वपरोभयै: ।
युगपत्सत्त्वासत्त्वाभ्यामवक्तव्योऽस्ति पञ्चम: ॥ १०८

वस्त्वैकदेशे परकैरसद्भावसमर्पित: ।
भावान्यसत्त्वान्याभ्यां स्वान्यैरवक्तव्यको भवेत् ॥ १०९

वस्तुदेशे स्वपर्यायै: सद्भावेन समर्पित: ।
तथा देशेऽन्यपर्यायैरसद्भावसमर्पित: ॥ ११०

स्वपरोभयपर्यायैर्देशेऽन्यस्मिन्विवक्षित: ।
युगपदेकशब्देन भवेद्वक्तुं त्रियोगक: ॥ (यु.) १११

ज्ञानादिनिजधर्मेषु अस्तित्वेन प्रवर्त्तनात् ।
जीवस्य प्रथमो भङ्‌ग: अस्तिरूपो भवेत्खलु ॥ ११२

स्वान्यजात्यन्यद्रव्याणां तद्धर्माणां च सर्वथा ।
जीवे नास्तित्वभावेन भङ्ग: स्यान्नास्तिको भवेत् ॥ ११३

द्रव्ये च केचिद्धर्माणां वाग्गोचरनिषेधत: ।
तृतीय: स्यादवक्तव्य: स्याद्धर्मापेक्षया भवेत् ॥ ११४

समकालप्रवृत्तिन: अस्तिनास्तिस्वभावयो: ।
वस्तुन्येकसमये स्यात्तुर्य: स्यादस्तिनास्तिक: ॥ ११५

अस्तिनास्तिस्वभावाश्च वक्तव्या: सन्ति वस्तुषु ।
अवक्तव्याभावशङ्काभावाय स्यादुभौ क्रमात् ॥ ११६

द्रव्यादिश्चैकसमये समकालप्रवृत्तित: ।
वक्तव्यान्यास्तिनास्तिश्च भावानां सप्तमो भवेत् ॥ ११७

अत्रास्तित्वेऽस्ति धर्मोऽस्ति नास्तित्वे नास्तिधर्मकः ।
युगपद्युगभावेनावक्तव्यं स्यादवाक्पदम् ॥ ११८

अस्त्यादयस्त्रयो भङ्गाः सर्वादेशा भवन्ति च ।
चत्वारो विकलादेशाः पूर्णैकदेशभावतः ॥ ११९

एवं द्रव्येषु नित्यैकादिषु सन्त्यद्विभङ्गिकाः ।
सामान्येतरधर्माणां गुणानां च भवेदिमाः ॥ १२०

ज्ञानत्वेन ज्ञानमस्ति नास्तित्वोऽपि निजेतरैः ।
इत्थं पञ्चास्तिकायेषु भवन्ति सप्तभङ्गिकाः ॥ १२१

अस्त्यभावे गुणाभावस्तेन स्याद्वस्तुशून्यता ।
नास्त्यभावेऽन्यभावेन मिश्रः स्यात्पारिणामिकैः ॥ १२२

पुनर्व्यञ्जकयोगेन सत्तासत्ता स्फुरेत्तथा ।
पदार्थो नियतापत्तिर्दोषो भूयादतोचितौ ॥ १२३

स्वभावस्वकार्यगुरुलघुपर्यायभेदतः ।
भेदस्वभावोऽवस्थानाधारभूतोऽस्त्यभेदकः ॥ १२४

भेदाभावे गुणानां च द्रव्येषु सङ्करो भवेत् ।
अभेदाभावयोगेन स्थानविध्वंसकस्तथा ॥ १२५

पारिणामिकभावत्वे ये पर्यायोत्तरोत्तराः ।
तेषां परिणमत्वेन भवेद्द्रव्यस्वभावकः ॥ १२६

द्रव्येष्वस्त्यादयो मूलावस्थानामविमुक्तितः ।
कालत्रिके च तद्रूपः स्यादभव्यस्वभावकः ॥ १२७

भव्याभावे विशेषाणां द्रव्ये स्यादप्रवृत्तिकः ।
द्रव्यान्तरवियोगाय वक्तुं योग्योऽस्त्यभव्यकः ॥ १२८

वाग्गोचरापन्नधर्मास्ते वक्तव्याः भवन्ति च ।
तत्प्रतिपक्षिकाः भावा अवक्तव्यास्तथैव स्युः ॥ १२९

वक्तव्याभावयोगेन सिद्धान्तविरहो भवेत् ।
अवक्तव्यवियोगेन पर्यायविगमस्तदा ॥ १३०

ये समग्रपदार्थानां भवन्ति परमेतरे ।
गुणास्तेषां वृत्तिहेतुः स्यात्परमस्वभावकः ॥ १३१

तथैवास्तित्वनास्तित्वकर्तृभोक्तृगुणत्वकः ।
प्रदेशत्वासर्वगतेत्याद्यनेका भवन्ति च ॥ १३२

द्रव्यं प्रति सर्वधर्मा अनन्तधर्मवत्त्वतः ।
न शक्याः सन्ति गदितुं
छद्मस्थज्ञायकोऽपि हि (ज्ञायकैरपि) ॥ १३३

पर्यायपरिणामाश्च स्वप्रवृत्तिनिमित्तकाः ।
पारिणामिककर्तृत्वज्ञायकग्राहकास्तथा ॥ १३४

भोक्तृत्वरक्षणाधाराधेयताव्याप्यव्यापकाः ।
विभुकरणता जन्यजनकः कारकः प्रभुः ॥ १३५

स्वकार्यत्वसप्रदेशभावकाभावका अपि ।
गतिस्थित्यवगाहश्चागुरुलघ्वचलाक्रियः ॥ १३६

सक्रियाखण्डनिस्सङ्गा इत्यनेके भवन्ति च ।
निजकार्योपकरणसुप्रवृत्तिनिमित्तकाः ॥ (च.कु.) १३७

इति स्वभावद्वारम् ।
लोके पञ्चास्तिकायास्ति प्रदेशानां समुच्चयात् ।
कालः प्रदेशाभावेन अस्त्यभावो निगद्यते ॥ १३८

इत्यस्तिकायद्वारम् ॥

सर्वद्रव्येषु विज्ञेयाः सुनिक्षेपाश्चतुर्विधाः ।
स्युर्नामस्थापनाद्रव्यभावभेदैर्जघन्यतः ॥ १३९

सङ्केतसहजाभ्यां च नामस्तु द्विविधः स्मृतः ।
सहजारोपजाभ्यां च स्थापना द्विविधा भवेत् ॥ १४०

आगमनोआगमाभ्यां द्रव्यनिक्षेपको द्विधा ।
आगमतस्तदर्थज्ञोऽनुपयुक्तो भवेद्यदा ॥ १४१

ज्ञभव्यव्यतिरिक्तैः स्याद् द्रव्यो नोआगमस्त्रिधा ।
त्रयो नामादिनिक्षेपाः सन्ति कारणरूपकाः ॥ १४२

भावनिक्षेपको भावकार्यरूपोऽस्ति सर्वदा ।
कार्यप्रवृत्त्यभावेन निष्फलास्ते भवन्ति च ॥ १४३

भावानां बोधभावेन सन्ति ज्ञानांशका नयाः ।
धर्मानन्तात्मभावेऽस्य धर्मैकस्थापनं नयः ॥ १४४

तत्र व्याससमासाभ्यां नयौ युगविधो भवेत् ।
व्यासतोऽनेकभेदः स्याद् युगभेदः समासतः ॥ १४५

कालत्रिकैकैव द्रव्यः प्रयोजनसमागते ।
द्रव्यार्थिकोऽस्ति पर्यायोत्पादव्ययध्रुवान्वितः ॥ १४६

पञ्चास्तिकायिकानां च परावर्तनधर्मतः ।
कालस्य द्रव्यकथनं द्रव्यारोपोऽस्ति तद्गुणे ॥ १४७

ज्ञानादिगुणमादृत्य तद्द्रव्यमनपेक्ष्य च ।
ज्ञानमेव यथा जीवस्तद्गुणारोप उच्यते ॥ १४८

अतीतकालभावानां करोत्यारोपकं यदा ।
तदा सम्प्रतिकाले च भूतारोपः स प्रोच्यते ॥ १४९

वीरनिर्वाणयोगेन यथाद्य दीपमालिका ।
एवमनागतारोपो यथास्ति पद्मवासरः ॥ १५०

उपादानसुनैमित्तासामान्यापेक्षकादिकः ।
कार्यारोपः कारणेऽस्ति द्रव्यार्हन्तारको यथा ॥ १५१

आरोपसर्जनारोपसङ्कल्पांशादिभेदतः ।
नैकगमग्राहरूपः सच्चैतन्यं च नैगमात् ॥ १५२

अंशग्राही नैगमश्च सत्तासिद्धिसमानकः ।
यथा सूक्ष्मः सिद्धसमो भवेत्संसारिको जिनः ॥ १५३

एवं पञ्चास्तिकायेषु प्रोक्तोऽयं नैगमो नयः ।
जिनागमाच्च बुद्ध्या च सर्वभावेषु योजयेत् ॥ १५४

सङ्ग्रहज्ञानयोगेन एते पञ्चास्तिकायिकाः ।
सामान्यान्यधर्मरूपौ वदन्ति सङ्ग्रहान्विताः ॥ १५५

द्रव्येषु व्याप्यभावस्थे गुणपर्यायव्यापकात् ।
परिणामिलक्षणस्थः सामान्यः प्रोच्यते तदा ॥ १५६

निरवयवैकनित्याक्रियसर्वगतान्वितः ।
सामान्योऽस्ति पिण्डरूपो गुणपर्यायसंयुतः ॥ १५७

नित्यानित्यसावयवनिरवयवसक्रियः ।
देशगः सर्वगश्चास्ति विशेषो गुणहेतुकः ॥ १५८

मूलसामान्यभेदामी वस्तुत्वास्तिप्रमेयकम् ।
द्रव्यसत्त्वागुरुलघुः रसोन्माना भवन्ति च ॥ १५९

नित्याद्युत्तरसामान्येतरे परिणमादयः ।
प्रोच्यन्ते गुणपर्यायाधारत्वं वस्तुकं बुधाः ॥ १६०

सङ्ग्रहज्ञानयोगेन द्रव्यं सामान्यतो वदेत् ।
विशेषसङ्ग्रहतया जीवेति प्रवदन्ति ते ॥ १६१

नित्यादयश्च सामान्या विपरीता विशेषकाः ।
निजमेधानुयोगेन द्रव्येषु सङ्ग्रहो वदेत् ॥ १६२

सामान्याभिमुखेन ग्रहणं यत्सङ्गृहीतकः ।
ज्ञात्वैकमेकजातीनामेकेन सङ्ग्रहात्मकः ॥ १६३

सर्वभावेष्वनुगमसामान्यप्रतिपादनम् ।
सोऽनुगमसङ्ग्रहः स्याद् व्यतिरेकोऽन्य इति ग्रहात् ॥(यु.)१६४

वा महदवान्तराभ्यां सङ्ग्रहो द्विविधो भवेत् ।
सत्तारूपोऽस्ति प्रथमः पिण्डितार्थो द्वितीयकः ॥ १६५

भेदान्तरविभजनैर्व्यवहारप्रवर्तनम् ।
भवेद् व्यवहारनयः पूर्वप्रोक्तानुसारतः ॥ १६६

सर्वद्रव्यस्वरूपाणां शुद्धप्रवृत्तिलक्षणैः ।
चलनादिसहायैश्च स द्रव्यज्ञायको भवेत् ॥ १६७

लोकालोकज्ञानरूपो जीवस्य साधना तथा ।
स्यात्सम्पूर्णपरमात्मभावसाधनरूपकः ॥ १६८

गुणानां साधकावस्थारूपः शुद्धप्रवृत्तिकः ।
गुणश्रेण्यारोहकादिः सा भवेत्साधना वरा ॥ १६९

गुणज्ञानाद्यभिन्नेन सद्भूतव्यवहारकः ।
व्यवहारोऽसद्भूतः स्याद्यद्गुणान्यसमन्वितः ॥ १७०

संश्लेषितोऽशुद्धरूपोऽहं शरीरीति प्रोच्यते ।
पुत्राद्यसंश्लिष्टरूपोऽसद्भूतः स्याद्भवे खलु ॥ १७१

एवं पञ्चास्तिकायेषु योज्यो मेधानुसारतः ।
व्यवहारस्वरूपश्च(ञ्च)समासेन विनिर्ममे ॥ १७२

सुज्ञानबोधरूपो यः प्रवदेदृजुसूत्रकः ।
सम्प्रतिकालमाश्रित्य गदेद्भावनयो ह्ययम् ॥ १७३

भूतहेतुं समादृत्य कार्यमागामिकं तथा ।
वर्तते जन्यजनकै ऋजुसूत्रः स उच्यते ॥ १७४

वर्तमानग्राहकः स्यात्स नामादिश्चतुर्विधः ।
पूर्वोक्तयुक्त्या संयोज्यः पञ्चास्तिकायिकेषु च ॥ १७५

शब्दस्य योऽस्ति वाच्यार्थः प्रधानस्तत्परिग्रहः ।
वस्तु त्वाहूयतेऽनेन स शब्दः प्रोच्यतेऽधुना ॥ १७६

शब्दस्य यो नयो व्यक्तः स शब्दनयबोधकः ।
प्रत्युत्पन्नं वर्तमानं शब्दः पूर्ववदिच्छति ॥ १७७

पृथुबुध्नाकारयुतं सुलिप्तं मृन्मयादिना ।
पाथोर्णाद्याकृष्टशक्यं स भावघटमिच्छति ॥ १७८

नामाद्यनिलकुम्भानि तद्भावेच्छुः स नेच्छति ।
तच्छब्दार्थप्रधानोऽयं चेष्टालक्षणमिच्छति ॥ १७९

निक्षेपोदधिमादृत्य गौणेन घटमिच्छति ।
ऋजुसूत्रो वर्तमानसमयग्राहको भवेत् ॥ १८०

शब्दार्थग्राहकः शब्दो भावनिक्षेपग्राहकः ।
सद्भावासद्भावतः स्याद्धर्मानेकसमन्वितः ॥ १८१

द्रव्यादिषु स्वभावैश्च नित्यानित्यादिभेदतः ।
सप्तभङ्ग्यः प्रयोज्याश्च पूर्वोक्तास्ते भवन्ति च ॥ १८२

एकैकैस्त्रिविकल्पाश्च युगयोगैस्त्रयस्तथा ।
त्रिकसंयोगतस्त्वैको भङ्गाः सन्ति महीधराः ॥ १८३

एवं समग्रभावेषु गुणपर्यायद्रव्यकैः ।
भवन्त्यनेकाद्रिभङ्ग्यो ज्ञातव्या मतियोगतः ॥ १८४

इति शब्दनयः ।

या या सञ्ज्ञा द्रव्यकाणां लक्षणेन निगद्यते ।
सञ्ज्ञान्तरार्थविमुखः सैव पश्यति षष्ठमः (?) ॥ १८५

नरः समभिरूढज्ञः पर्यायैकमपेक्ष्य च ।
न भवेत्सर्वपर्यायवाचको मिश्रदोषतः ॥ १८६

वाच्यार्थस्य वाचको यः स तथैव प्रवर्तते ।
विशिनष्ट्यैवम्भूतज्ञो वदेदतिशयैर्जिनः ॥ १८७

कुम्भाकृतियुतः कुम्भः शुचिपाथोर्णविभृतः ।
नारीशिरः स्थितश्चेष्टां कुर्वन्स कुम्भमिच्छति ॥ १८८

इत्येवम्भूतनयः ॥

प्राधान्यार्थेन प्रथमे चत्वारोऽर्थनयाः स्मृताः ।
शब्दादयः शब्दमुख्याच्छब्दाः सन्ति जिनागमे ॥ १८९

नैगमाद्याश्च चत्वारः सामान्यार्थसमादरात् ।
अविशुद्धा भवन्त्यत्र त्रयः शुद्धा विशेषतः ॥ १९०

इति सप्तनयाः ॥

यः पर्यायप्रतिक्षेपी द्रव्यमात्रसमादृतः ।
द्रव्यार्थिकाभासरूपः प्रोच्यते श्रुतिसागरे ॥ १९१

तथा द्रव्यप्रतिक्षेपी पर्यायमात्रग्राहकः ।
तत्पर्यायार्थिकाभासो विज्ञेयोऽस्ति द्वितीयकः ॥ १९२

धर्मधर्मिकादीनामेकान्तिपार्थिक्ययोगतः ।
प्रोच्यते नैगमाभासो नैगमस्यावभासतः ॥ १९३

सत्त्वं चैतन्यभिन्नेऽपि सामान्यमात्रग्राहकः ।
सत्तापरामर्शरूपः प्रोच्यते सङ्ग्रहो बुधैः ॥ १९४

स परापरभेदाभ्यां युगभेदः समादृतः ।
सन्मात्रग्राहको द्रव्यं भाषते परसङ्ग्रहः ॥ १९५

चैतन्यलक्षणो जीवो गद्यतेऽपरसङ्ग्रहः ।
सत्ताद्वैतं स्वीकुर्वाणो द्रव्यान्यं यो न मन्यते ॥ १९६

स्वमत्याद्वैतभावेन साङ्ख्यनैयायिकादयः ।
प्रोच्यन्ते सङ्ग्रहाभासः स्याद्वादपक्षिका बुधाः ॥ १९७

अत्रावान्तरसामान्यं स्वीकुर्वाणा बलाज्जनाः ।
विशेषं नावमन्यन्ते पारिणामिकतादयः ॥ १९८

सङ्ग्रहादृतभावानां परमार्थमजानतः ।
द्रव्यपर्यायभागं च योऽभिप्रैति स पञ्चमः ॥ १९९

वर्तमानक्षणस्थायिपर्यायमात्रमादृतः ।
ऋजुसूत्रनयग्राही विपरीतं वदेद्यदा ॥ २००

दृष्टिज्ञानकषायाणामुपयुक्तो यदा भवेत् ।
ऋजुसूत्राभासकः स्यात्कालस्थोऽन्योक्तिसौगताः ॥ २०१

पर्यायैकस्य प्राग्भावस्तिरोभावान्यग्राहकः ।
काललिङ्गादिभेदेन शब्दार्थः शब्दको भवेत् ॥ २०२

लिङ्गत्रिवाक्प्रत्ययाद्यैः संयुक्तार्थमुपैति यः ।
तद्भेदेऽपि तमेवार्थं शब्दाभासस्तमादरात् ॥ २०३

यः पर्यायध्वनीनां च यावन्माना (अ)भिधेयकाः ।
तन्नानात्वं स्वीकुर्वाणो रूढाभासः स उच्यते ॥ २०४

पदार्थानां नामभेदं प्रेक्ष्य भिन्नार्थको वदेत् ।
एवम्भूताभासकः स प्रोच्यते जिनशासने ॥ २०५

शब्दक्षेप्यर्थाभिधायी वदेदर्थनयस्तथा ।
शब्दाभिधाय्यर्थक्षेपी शब्दाभासः स उच्यते ॥ २०६

अर्पितानर्पिताभासावन्योन्यं प्रतिक्षेपतः ।
तत्त्वव्यवहारयोः क्षेपात्स्युर्व्यवहारविनिश्चयौ ॥ २०७

ज्ञानं गृह्णन्क्रियाक्षेपाज्ज्ञानाभासो निगद्यते ।
ज्ञानक्षेपात्क्रियां गच्छन्क्रियाभासो वदेद् बुधः ॥ २०८

नैगमादिसप्तनयाः पूर्वानुपूर्वयोगतः ।
पूर्वः प्रभूतविषयः परोऽल्पविषयो भवेत् ॥ २०९

अंशग्राही नैगमोऽस्ति सत्ताग्राहकः सङ्ग्रहः ।
गुणलोकप्रवृत्त्योर्यो ग्राही स्याद् व्यवहारकः ॥ २१०

ऋजुसूत्रो भवेद्धेतुपरिणामसमादृतः ।
व्यक्तकार्यग्राहकः स्याच्छब्दो भावप्रवृत्तिकः ॥ २११

पर्यायान्तरको भिन्नकार्यग्राही च षष्ठमः ।
तद्गतमुख्यकार्यस्य ग्राह्येवम्भूतको भवेत् ॥ २१२

इत्याद्यनेकसद्रूपो नयवादो जिनागमे ।
विधानप्रतिषेधाभ्यां सप्तभङ्ग्यो भवन्ति च ॥ २१३

इत्थं नयविचारश्च समासेन प्ररूपितः ।
लोके समग्रभावेषु भवेत्स्याद्वादशासने ॥ २१४

इति नयाः ॥

तत्प्रत्यक्षपरोक्षाभ्यां प्रमाणं द्विविधं स्मृतम् ।
अतीन्द्रियं च प्रत्यक्षमक्षजन्यं परं भवेत् ॥ २१५

तत्र देशसमग्राभ्यां प्रत्यक्षं द्विविधं श्रुतौ ।
देशाववधिपर्यायौ समग्रं केवलं भवेत् ॥ २१६

मतिश्रुताभिधानेन परोक्षं द्विविधं स्मृतम् ।
अनुमानोपमानागमार्थापत्त्यब्धयो भवेत् ॥ २१७

लिङ्गपरामर्शकं स्यादनुमानप्रमाणकम् ।
गिरौ धूमाङ्कमादृत्य साध्यतेऽसौ कृशानुमान् ॥ २१८

गोसादृश्यत्वभावेन अदृष्टगवयाकृतिः ।
ज्ञानं स्याद्गवयं प्रेक्ष्य भवेत्तदुपमानकम् ॥ २१९

यथार्थवस्तुभावज्ञो वीतरागो जिनेश्वरः ।
तदुक्ताः सकला वाचः स्यादागमप्रमाणकम् ॥ २२०

यथा पीनो देवदत्तो वासरे तु न भुज्यते ।
अर्थान्नक्ताशनो ज्ञातस्तदर्थापत्तिकं भवेत् ॥ २२१

नयप्रमाणकादीनां परिपाटीमुपेत्य यत् ।
जीवाजीवादिभावज्ञः तज्ज्ञैस्तज्ज्ञानमुच्यते ॥ २२२

जिनोक्ततत्त्वश्रद्धानं तत् सम्यग्दर्शनं वदेत् ।
यथार्थहेयोपादेयैः स्वरूपरमणात्मकम् ॥ २२३

परसङ्गत्यागपूर्वं निजात्मरमणात्मकम् ।
संयमं साधनादेतत् सिद्धिर्भवति नान्यथा ॥ २२४

स्वपरव्यवसायि ज्ञानं प्रमाणं वदेच्छ्रुतौ ।
इष्टान्यवस्तुविज्ञानस्वीकारान्यक्षमं तथा ॥ २२५

सर्वनयस्वरूपस्य ग्राहकं यत्प्रमाणकम् ।
पारिणामिकभावेन प्रमाता चेतनो भवेत् ॥ २२६

स्वदेहमानमात्रोऽस्ति क्षेत्रं प्रति विभिन्नतः ।
रत्नत्रयसाधनेन जीवः सिद्धिं समश्नुते ॥ २२७

इति प्रमाणद्वारम् ॥

धर्माधर्माभ्रकालेषु भावोऽस्ति पारिणामिकः ।
भावोदयपरिणामौ नयनौ पुद्गले भवेत् ॥ २२८

पुद्गले च परिणामः स्कन्धेष्वादिस्वभावतः ।
तथाविहायोपशमं भावाः स्युर्विघ्नावरणेऽब्धयः ॥ २२९

नामगोत्रायुर्वेदेषु त्यक्तोपशममिश्रकम् ।
त्रयो भावाः पञ्च मोहे भवन्ति जिनशासने ॥ २३०

गतिष्वपि पञ्च पञ्च भावाः सन्ति शिवालये ।
परिणामक्षायिकौ स्तो भावद्वारं निरूपितम् ॥ २३१

गतिस्थितेषु जीवेषु सर्वे भावा भवन्ति च ।
परिणामक्षायिकौ स्तो जीवेषु मोक्षपत्तने ॥ २३२

इति मूलभावाः ॥

मिथ्यासास्वादनमिश्राव्रतदेशव्रताभिधाः ।
प्रमत्तान्यौ निवृत्त्यन्यौ सूक्ष्मोपशमक्षीणकाः ॥ २३३

गुणाः सयोग्ययोगी च भवन्ति जिनशासने ।
लोके भवस्थजीवस्य परिणामविशेषकाः ॥ (यु.) २३४

मिश्रोदयपरिणामा भावाः सन्ति गुणत्रिके ।
तथा व्रतादीभगुणे पञ्च भावा भवन्ति च ॥ २३५

क्षीणे भवन्ति चत्वारो विमुच्योपशमं तथा ।
विहाय मिश्रोपशमं त्रयो भावान्त्यके द्विके ॥ २३६

मिथ्यासास्वादने सन्ति दिग्भेदा मिश्रकस्य च ।
चक्ष्वचक्ष्वज्ञानत्रिकं दानादिशरलब्धयः ॥ २३७

मिश्रे स्युर्मिश्रसम्यक्त्वं दर्शनज्ञानगुप्तिकम् ।
दानादिलब्धयः पञ्च तूर्येऽपि द्वादशस्तथा ॥ २३८

व्रतद्वादशक्षेपेण पञ्चमे स्युस्त्रयोदश ।
चतुर्दश पर्ययेन षष्ठमे सप्तमे गुणे ॥ २३९

निवृत्त्यादित्रिकगुणे क्षायोपशमकं विना ।
संयमाभावयोगेन द्वादश स्युर्गुणद्विके ॥ २४०

नखाधिकैको मिथ्यात्वे औदयिकस्य विंशतिः ।
भेदा भवन्ति द्वितीये मिथ्यात्वाभावयोगतः ॥ २४१

तृतीयाब्ध्योर्दशखगा मुक्त्वाज्ञानं च पञ्चमे ।
नारकामरभावेन भवन्त्यद्रिदशोदयाः ॥ २४२

सुतिर्यक्संयमाभावात्षष्ठमेषुदशो भवेत् ।
निकृष्टलेश्याभावेन सप्तमे सन्ति द्वादशः ॥ २४३

तेजःपद्मविहीनेन मातङ्गनवमे दश ।
वेदादिमकषायाग्निहीनाः स्युर्दशमेऽब्धयः ॥ २४४

लोभाभावात्त्रयो भेदा भवन्त्युपरिमत्रिके ।
शुक्लाभावेन चरमे भेदौ द्वौ भवतः खलु ॥ २४५

तूर्याद्युपशमान्तेषु भावश्चोपशमो भवेत् ।
नवमैकादशान्ते स्यात्संयमोपशमं नरान् ॥ २४६

तूर्याद्यष्टगुणस्थाने क्षायिकदर्शनं भवेत् ।
क्षीणे क्षायिकयोगेन क्षायिकसंयमोऽपि हि ॥ २४७

दानादिलब्धयः पञ्च सम्यक्त्वं केवलद्विकम् ।
संयमं च सन्ति भेदाः क्षायिकस्यान्त्यके द्विके ॥ २४८

जीवभव्याभव्यभेदा मिथ्यात्वे च त्रयं भवेत् ।
द्वितीयात्क्षीणमोहान्तं मुक्त्वाभव्यमुभौ तथा ॥ २४९

विहाय भव्यं जीवोऽस्ति गुणस्थानेऽन्त्यके द्विके ।
इत्थमेते पञ्च भावा गुणस्थानेषु निर्ममे ॥ २५०

इति परिणामिकभेदाः ।

गुप्त्यम्बरादब्धियुगगुप्तिपञ्चाब्धिपावकयोगेन ।
सप्तमे त्रिंशन्नखाददद्रिगजाधिकाः ॥ २५१

नखाद्युगाधिकनखा दिशो खेटानलाधिकः ।
द्वादशान्त्ये गुणे भेदा भवन्ति सन्निपातिकाः ॥ २५२

इति भावद्वारम् ॥

जीवो भवेज्जीवद्रव्यः शेषाः पञ्चाप्यजीवकाः ।
सर्वे द्रव्याधिकारेण व्याख्या द्रव्यानुयोगकाः ॥ २५३

धर्मादिष्वम्बरं द्रव्यं लोकालोकप्रमाणकम् ।
क्षेत्ररूपमस्ति शेषाः सन्ति निःक्षेत्रलक्षणाः ॥ २५४

रुद्रद्वारानुसारेण सद्भावार्थमुपेत्य च ।
विमुच्य पुद्गलानन्दं निजभावं समाचर ॥ २५५

जीवा दुर्नययोगेन मिथ्याशासनसङ्गताः ।
बोधिबीजं परित्यज्य भ्रमन्ति भवकानने ॥ २५६

ततः श्रुतगुरुं लब्ध्वा विनयैर्गुरुभक्तितः ।
द्रव्यभावार्थमालम्ब्य श्रुतबोधमुपार्जय ॥ २५७

जीवाजीवस्वरूपं च विज्ञाय ज्ञपरिज्ञया ।
निजात्मगुणवित्तेन भजध्वं श्रेय(यो)मन्दिरम् ॥ २५८

स्याद्वादपुष्पकलिका प्रवचनाद्विनिर्ममे ।
बालबोधाय लेशेन तत्त्वार्थावगमाय च ॥ २५९

कोटकेन्दुकुले रम्ये श्रीवंशोत्तमवाचके ।
निध्युपाध्यायस्य शिष्यश्चक्रे वाचकसंयमः ॥ २६०

पू.उपा. श्री समयसुन्दरविजयविरचितम्

# ॥ उद्गच्छत्सूर्यबिम्बाष्टकम् ॥

चतुर्यामेषु शीतार्त्तायामिनी कामिनी किमु ।
तापाय तपनोद्गच्छद्बिम्बमङ्गेष्टिकां व्यधात् ॥ १

दिनश्रीधिक्कृता यान्ती रुष्टा रात्रिनिशाचरी ।
वह्निज्वालावलीर्मुञ्चतीव भानुप्रकाशतः ॥ २

प्राचीदिग्प्रमदा चक्रे विशाले भालपट्टके ।
बालारुणरवेर्बिम्बं चारुसिन्दूरचन्द्रकम् ॥ ३

पश्यन्त्यां वदनं प्राचीपद्मिन्यां दर्पणेऽरुणः ।
प्रवालाधररागेण रविबिम्बमिव प्रगे ॥ ४

प्रतीच्याऽभिमुखं क्रीडोच्छालनाय नवाऽरुणः ।
प्राचीकन्याकरस्थः किं रक्तद्युत्रत्नकन्दुकः ॥ ५

जगद्ग्रसित्वा पापिष्ठः क्व गतो ध्वान्तराक्षसः ।
तं द्रष्टुमिति बालार्को दीपिका दिनभूभुजः ॥ ६

प्राचीदिङ्नर्त्तकी व्योमवंशाग्रमधिरोहति ।
कृतरक्ताम्बरा शीर्षन्यस्तार्कस्वर्णकुम्भभृत् ॥ ७

त्वत्कीर्त्तिकान्तया दध्रे बालार्कस्तप्तगोलकः ।
दिव्याय स्वेच्छया भ्रान्त्या कुसतीत्वहृते नृप ॥ ८

रवेः प्रकाशं बिम्बं चारक्तं दृष्ट्वा प्रगे रयात् ।
कौतुकादष्टकं चक्रे गणिसमयसुन्दरः ॥ ९

पू.उपा. श्री समयसुन्दरविजयविरचितम्

## ॥ तृणाष्टकम् ॥

अच्छन्दकविवादे त्वं भज्यमानं तु नाऽभनक् ।
वीरोक्तिं कृतवान् सत्यां तद्धन्यं जन्म ते तृण ! ॥ १

साधुचक्षुर्व्यथोद्भूत-पापशुद्धिकृते तृणम् ।
पुनः पुनर्ज्वलत्याशु कृशानौ जनसाक्षिकम् ॥ २

राज्यर्द्धिं त्यक्तवान् सर्वां निःस्पृहः करकण्डुराट् ।
परं त्वां तृण नामोचद्वालभ्यं भुवि ते महत् ॥ ३

अहो ते तृण ! माहात्म्यं विवादे पतिते त्वयि ।
सत्याय मस्तके न्यस्ते तत्क्षणं भज्यते कलिः ॥ ४

कृते पञ्चामृते भोज्ये ताम्बूले भक्षिते तृण !।
वक्त्रशुद्धिकरं तु त्वं वराङ्गस्थिति तन्महत् ॥ ५

अहो ते तृण ! सौभाग्यं शर्कराभः समं ततः ।
अन्तरालिङ्ग्यसे स्त्रीभिर्यथा सौभाग्यवान् नरः ॥ ६

तृणशक्तिरहो दर्भ-तृणझाटेन मन्त्रतः ।
दुष्टस्फोटकभूतादि दोषा यान्ति यतः क्षयम् ॥ ७

छाया सद्मोपरिस्थस्त्वं दन्तस्थं युधि जीवनम् ।
गो-जग्ध-मसि दुग्धं तदुपकारि महत् तृण ! ॥ ८

विद्वद्गोष्टिविनोदेषु तृणाष्टकमचीकरत् ।
श्रीविक्रमपुरे रङ्गाद् गणिः समयसुन्दरः ॥ ९

पू.उपा. श्री समयसुन्दरविजयविरचितम्

# ॥ रजोष्टकम् ॥

देवगुर्वोरिव शेषां शीर्षे त्वां स्थापयन्त्यमी ।
हस्तेन हस्तिनो हर्षादहो ते धूलि मान्यता ॥ १

स्वस्ति श्रीमति लेखेपि यत्नतः प्रेषितेपि च ।
परं सिद्धिस्तवाधीना शक्तिस्ते रज इदृशी ॥ २

जगदाधारभूतेन जलदेन पुरस्कृताम् ।
वातेनोढां निरीक्ष्य त्वां घनाशा जायते नृणाम् ॥ ३

सर्वंसहा प्रश्रूतित्वात्मर्द्यमानं पदैरधः ।
न कुप्यसि कदापि त्वं रजस्ते क्षान्तिरुत्तमा ॥ ४

यस्या नाम पदाधस्थां त्वां लात्वा रविवासरे ।
मस्तके क्षिप्यते मन्त्रात् सा स्त्री वश्या रजो नृणाम् ॥ ५

गालिदाने न रुड् लज्जे यत्र स्वेच्छ कृतं सुखम् ।
रजः पर्व यतो जज्ञे तन्मान्यं कस्य नो रजः ॥ ६

रथ्यासु रममाणानां शिशूनां पांसुशालिनाम् ।
धूले त्वं स महार्घ्यापि शृङ्गारादतिरिच्यसे ॥ ७

अप्रार्थ्याप्यनभीष्टापि सुलभापि पदे पदे ।
अहो ते धूलि माहात्म्यं लक्ष्मीरित्यभिधीयसे ॥ ८

श्रीमद्विक्रम सद्रङ्गे विद्वद्गोष्ष्टिषु नोदितः ।
रजोष्टकमिदं चक्रे शीघ्रं समयसुन्दरः ॥ ९

# परिशिष्ट

# शास्त्रसन्देशमालाषड्विंशतिभागमध्ये ग्रथितानां ( ६१२ ) ग्रन्थानामकारादिक्रमः

(अङ्कैर्भागा विज्ञेयाः)


अ

अट्ठारसहसशीलंगाइरहा ( ५ )
अध्यात्मकल्पद्रुमः ( ९ )
अध्यात्मबिन्दुः ( १८ )
अध्यात्ममतपरीक्षा ( २१ )
अध्यात्मसारः ( ४ )
अध्यात्मोपनिषत् ( ४ )
अनङ्गदुजर्याष्टकम्( २५ )
अनुमानमातृका ( १६ )
अनेकान्तव्यवस्थाप्रकरणस्य
मङ्गलप्रशस्ती ( ५ )
अनेकार्थनाममाला ( २२ )
अनेकार्थ-निघण्टुः ( २२ )
अनेकार्थसंग्रहकोषः ( २४ )
अन्तिमाऽऽराधना ( १४ )
अन्नायउंछकुलयं ( ७ )
अन्ययोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अन्योक्तिशतकम् ( ६ )
अप्पविसोहिकुलयं ( ७ )
अभव्यकुलकम् ( ७ )
अभिधानचिन्तामणिनाममाला ( २४ )
अभिधानचिन्तामणिशेषनाममाला ( २४ )
अभिधानचिन्तामणिशिलोञ्छः ( २२ )
अ.ब.वि.ग.महादण्डकस्तोत्रम् ( २५ )
अयोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अष्टकानि ( ३ )
अष्टविधकर्मस्वरूपम् ( २३ )

आ

आउरपच्चक्खाणं-१ ( १५ )
आउरपच्चक्खाणं-२ ( १५ )
आख्यानकमणिकोशः ( ८ )
आगम अष्टोत्तरी ( २१ )
आचारोपदेशः ( ११ )
आत्मघोषः ( २५ )
आत्मतत्त्वचिन्ताभावनाचूलिका ( ९ )
आत्मनिन्दाष्टकम् ( १४ )
आत्मप्रतिबोधदोहा ( २५ )
आत्मप्रबोधः ( १७ )
आत्मबोधकुलकम् ( ७ )
आत्महितकुलकम् ( ७ )
आत्मानुशासनकुलकम् ( ७ )
आत्मोपदेशमाला ( २५ )
आत्मानुशासनम् ( १४ )
आत्मानुशास्तिसंज्ञिका
पञ्चविंशतिका ( १४ )
आत्मावबोधकुलकम् ( ७ )
आध्यात्मिकमतपरीक्षा ( ५ )
आप्तमीमांसा ( २२ )
आभाणशतकम् ( ६ )
आयुःसङ्ग्रहः( २६ )

आरात्रिक-वृत्तानि ( २२ )
आराधकविराधकचतुर्भङ्गी ( ४ )
आराधना ( १४ )
आराधनाप्रकरणम् ( २१ )
आराधनाप्रकरणम् ( २५ )
आराहणा ( १४ )
आराहणाकुलयं ( ७ )
आराहणापडागा-१ ( १४ )
आराहणापडागा-२ ( १४ )
आराहणापणगं ( १४ )
आराहणापयरणं ( १४ )
आर्षभीयचरितमहाकाव्यम् ( ५ )
आलोचनाग्रहणविधि
प्रकरणम् ( २२ )
आलोचनाविधान ( २२ )
आलोयणाकुलयं ( ७ )
आशाम्बरहित शिक्षा ( २५ )

इ

इन्द्रियपराजयशतकम् ( ६ )
इरियावहिकुलकम् ( २१ )
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् ( ७ )
ईर्यापथिकीषट्त्रिंशिका ( १६ )
ईर्यापथिकीषट्त्रिंशिका ( २५ )

उ

उत्पादादिसिद्धिः ( १६ )
उत्सूत्रपदोद्घाटनकुलकम् ( ७ )
उद्गच्छत्सूर्यबिम्बाष्टकम् ( २५ )
उपदेशकल्पवल्लिः ( ११ )
उपदेशकुलकम्-१ ( ७ )
उपदेशकुलकम्-२ ( ७ )
उपदेशकुलकम्-३ ( २१ )
उपदेशचिन्तामणिः ( १० )
उपदेशतरङ्गिणी ( २१ )
उपदेशपद ( १ )
उपदेशप्रदीपः ( १२ )
उपदेशरत्नकोशः ( ८ )
उपदेशरत्नाकरः ( ८ )
उपदेशरत्नाकरः ( २५ )
उपदेश( धर्म )रसायनरासः ( ८ )
उपदेशरहस्यम् ( ४ )
उपदेशशतकम् ( ६ )
उपदेशसप्ततिः ( ११ )
उपदेशसप्ततिका ( ८ )
उपदेशसारः ( ११ )
उपदेशामृताकुलकम् ( ७ )
उपधानवाहिप्रशंसा
प्रकरणम् ( २२ )
उपधानविधिः-१ ( १० )
उपधानविधिः-२ ( १० )
उपमितिगतक्षमामाहात्म्यम् ( २५ )
उवएसचउक्ककुलयं-१ ( ७ )
उवएसचउक्ककुलयं-२ ( ७ )
उवएसमाला ( ८ )
उवहाणपइट्ठापंचासग ( २२ )

ऋ

ऋषभशतकम् ( ६ )
ऋषिमण्डलस्तवः ( १२ )
ऋषिमण्डलस्तवः ( २५ )

ए

एकविंशतिद्वात्रिंशिका: ( १६ )
एकविंशतिस्थानप्रकरणम् ( २३ )
एकाक्षरनाममाला ( २२ )
एकाक्षरनाममालिका ( २२ )
ऐन्द्रस्तुतय: ( ५ )

औ

औष्ट्रिकमतोत्सूत्रोद्घाटनकुलकम् ( ७ )

अं

अंगुलसत्तरी ( १३ )

क

कथाकोष: ( १२ )
कथानककोश: ( १२ )
कर्पूरप्रकर: ( १२ )
कर्मप्रकृति: ( १३ )
कर्मप्रकृति ( २६ )
कर्मविपाककुलकम् ( ७ )
कर्मविपाकाख्य: प्रथम:
प्राचीनकर्मग्रन्थ: ( १३ )
कर्मसंवेधप्रकरण ( २३ )
कर्मस्तवभाष्यम् ( २३ )
कर्मस्तवाख्य: द्वितीय:
प्राचीनकर्मग्रन्थ: ( १३ )
कम्मबत्तीसी ( १३ )
कविकल्पद्रुम: ( १८ )
कस्तूरीप्रकर: ( १२ )
कायस्थितिस्तोत्रम् ( १३ )
कालचक्रकुलकम् ( २६ )
कालवियारसयं ( २६ )
कालसप्ततिका ( १३ )
कालस्वरूपकुलकम् ( ७ )
कुमारविहारशतकम् ( ६ )
कुशलोपदेशकोश ( २१ )
कूपदृष्टान्तविशदीकरणम् ( ५ )
कृष्णराजीविमानविचार: ( १३ )
केवलिभुक्तिप्रकरणम् ( १६ )

क्ष

क्षपकस्याऽऽलोचनाऽन्ते-
भावना ( २२ )
क्षमाकुलकम् ( ७ )
क्षान्तिकुलकम् ( ७ )
क्षुल्लकभवावलि: ( १३ )

ख

खामणाकुलयं ( १ ) ( ७ )
खामणाकुलयं ( २ ) ( ७ )

ग

गणधरसार्धशतकम् ( ६ )
गणरत्नमहोदधि: ( २६ )
गणिगणिन्योर्लक्षणावली ( २२ )
गाङ्गेयभङ्गप्रकरणम्-१ ( १५ )
गाङ्गेयभङ्गप्रकरणम्-२ ( १५ )
गुणकित्त्व-षोडशिका ( २६ )
गुणस्थानक्रमारोह: ( १३ )
गुणानुरागकुलकम् ( ७ )
गुरुगुणषट्त्रिंशत्षट्त्रिंशिका
कुलकम् ( ७ )

गुरुतत्त्वप्रदीपः ( १६ )
गुरुतत्त्वविनिश्चयः ( ५ )
गुरु दर्शनहर्षकुलकम् ( ७ )
गुरु महात्म्यं कुलकम् ( २१ )
गुरु वन्दनभाष्यम् ( २२ )
गुरु विरहविलापः ( १४ )
गुरु स्थापनाशतक ( २१ )
गोडीपार्श्वस्तवनम् ( ५ )
गौतमकुलकम् ( ७ )

घ

घनगणितसंग्रहगाथाः ( १८ )

च

चंदावेज्झयं पइण्णयं ( १५ )
चउसरणपइन्नयं ( १५ )
चक्षुरप्राप्यकारितावादः ( २५ )
चतुर्गतिजीवक्षपणकानि ( १४ )
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे ( १३ )
चन्द्रसूर्यमण्डलविचारः ( २६ )
चरणकरणमूलोत्तरगुण ( १८ )
चर्चरी ( २१ )
चारित्रमनोरथमाला ( ८ )
चतुर्विधधर्मस्वरूपम् ( २५ )
चित्तशुद्धिफलम् ( १८ )
चेइयवंदणमहाभासं ( १० )
चैत्यवन्दनकुलकम् ( २१ )
चैत्यवन्दनभाष्यम् ( २२ )

ज

जंबूस्वामि कुलकम् ( २१ )
जघन्योत्कृष्टपद एककालं
गुणस्थानकेषु ( १३ )
जयन्तीप्रकरणम् ( २२ )
जल्पकल्पलता ( १६ )
जिनप्रतिमास्तोत्रम् ( १ )
जिनबिम्बप्रतिष्ठाविधिः ( १० )
जिनशतकम्-१ ( ६ )
जिनशतकम्-२ ( ६ )
जीवजोणिभावणाकुलयं ( ७ )
जीवदयाप्रकरणं ( ८ )
जीवविचारस्तवनम् ( २६ )
जीवव्यवस्थापनाषट्त्रिंशतिका ( २२ )
जीवसमासः ( १३ )
जीवसरूव-चउवीसिया ( २६ )
जीवाऽजीव कर्माष्टकप्रकरणम् ( २२ )
जीवादिगणितसंग्रहगाथाः ( १८ )
जीवाणुसट्ठि संधि ( २५ )
जीवानुशासनम् ( १४ )
जीवानुशास्तिकुलकम् ( ७ )
जीवाभिगमसंग्रहणी ( १५ )
जीवायुप्पमाणकुलयं ( २१ )
जैनतत्त्वसारः ( १६ )
जैनविहारशतकम् ( २१ )
जैनस्याद्वादमुक्तावली ( १६ )
जोइसकरंडगं पइण्णयं ( १५ )
जोगविहाणपयरणं ( २२ )

ज्ञ

ज्ञाताधर्मकथोपनयगाथाः ( १५ )
ज्ञानप्रकाशकुलकम् ( ७ )
ज्ञानपञ्चकविवरणम् ( २५ )

ज्ञानसारः ( ४ )
ज्ञानार्णवः ( ५ )

त

तत्त्वतरङ्गिणी ( १६ )
तत्त्वबोधतरङ्गिणी ( १२ )
तत्त्वामृतम् ( ९ )
तपःकुलकम् ( ७ )
तपःकुलकम् ( २१ )
तित्थोगालिपइन्नयं ( १५ )
तेवड्डिसिलगापुरिसवियारो ( २६ )
त्रिशतत्रिषष्टिपाखण्डस्वरूप स्तोत्रम् ( १५ )
त्रिषष्टिध्यानकथानककुलकम् ( २१ )
त्रिषष्टीयदेशनासंग्रहः ( ११ )
त्रैलोक्यदीपिका ( बृहत्संग्रहणी ) ( २३ )
तृणाष्टकम् ( २५ )

द

दंसणसुद्धिपयरणं ( १० )
दर्शननियमकुलकम् ( ७ )
दशश्रावककुलकम् ( ७ )
दानकुलकम् ( ७ )
दानविधिः ( १० )
दानषट्त्रिंशिका ( ९ )
दानादिप्रकरणम् ( १२ )
दानोपदेशमाला ( ८ )
दिक्चतुष्कजीवाल्पबहुत्वं ( २२ )
दीवसागरपन्नत्ति ( १५ )
दुःषमगण्डिका ( २५ )
दृष्टान्तशतकम् ( २१ )
दृष्टान्तशतकम्-१ ( ६ )
दृष्टान्तशतकम्-२ ( ६ )
देवेन्द्रनरकेन्द्रप्रकरणम् ( १३ )
देशनाशतकम् ( ६ )
देशीनाममाला ( २४ )
देहकुलकम् ( ७ )
देहस्थितिस्तवः ( १३ )
द्रव्यसप्ततिका ( २२ )
द्रव्यस्तवसमर्थनप्रकरणम् ( २५ )
द्वात्रिंशद्द्वात्रिंशिकाः ( ४ )
द्वादश-कुलकम् ( ७ )
द्वादशभावना ( २१ )
द्वादशभावना ( २१ )
द्वादश भावनाः ( २१ )
द्वादशव्रतस्वरूपम् ( १० )
द्वादशाङ्गीपदप्रमाणकुलकम् ( ७ )
द्वाविंशतिपरीषहाः ( २१ )

ध

धनञ्जयनाममाला ( २१ )
धनुःपृष्ठबाहासंग्रहगाथाः ( १८ )
धम्मारिहगुणोवएसकुलयं ( ७ )
धम्मोवएसकुलयं ( ७ )
धर्मपरीक्षा ( ५ )
धर्मबिन्दुः ( ३ )
धर्मरत्नप्रकरणम् ( १० )
धर्मरत्नकरण्डकः ( ११ )
धर्मस्वरूप-दर्शनम् ( २५ )
धर्मविधिः ( ८ )

धर्मशिक्षा ( ९ )
धर्मसंग्रहणि: ( १ )
धर्मसंग्रह: ( ११ )
धर्माचार्यबहुमानकुलकम्( ७ )
धर्माराधनशिक्षा ( २१ )
धर्मोद्यमकुलकम्( ७ )
धर्मोपदेश: ( ९ )
धर्मोपदेशमाला ( ८ )
धर्मोपदेशश्लोका: ( २१ )
धर्म्माधर्म्मविचारकुलकम्( २१ )
धर्म्मोपदेशकुलकम्( ७ )
धूर्ताख्यानम्( ३ )
धूमावली ( ३ )
ध्यानदीपिका ( १८ )
ध्यानशतकम्( ६ )

न

नंदणरायरिसिस्स
अन्तिमाऽऽराहना ( १४ )
नंदनऋषि आराधना ( २५ )
नन्दीश्वरस्तव: ( १३ )
नमस्कार माहात्म्यम्( २१ )
नमस्कारस्तव: ( १८ )
नयकर्णिका ( १६ )
नयोपदेश: ( ५ )
नरकवर्णनवृत्तानि ( २५ )
नरभवदिट्ठंतोवणयमाला ( १२ )
नवकारफलकुलकम्( ७ )
नवतत्त्वप्रकरणम्( २२ )
नवतत्त्वप्रकरणम्( २२ )
नवतत्त्वभाष्यम्( १३ )
नवतत्त्वम्( १३ )
नवतत्त्वसंवेदनम्( १३ )
नवपदप्रकरणम्( १० )
नवपदमाहात्म्य गर्भित
प्रकरणम्( २१ )
नवपद विषयक देशना ( २५ )
नवपदाराधनविधि: ( २५ )
नवसूर्यपबृंहणाऽनुशास्ती ( २२ )
नव्यमहत्तराऽनुशास्ति: ( २२ )
नव्यलघुक्षेत्रसमास: ( २६ )
नानाचित्तप्रकरणम्( ३ )
नानावृत्तकप्रकरणम्( २१ )
नारीशीलरक्षाकुलकम्( ७ )
निगोदषट्त्रिंशिका ( १५ )
निघण्टुशेष: ( २४ )
नीतिधनदशतकम्( २१ )
नूतनगणिगच्छानुशास्ति: ( २२ )
नूतनाचार्याय हितशिक्षा ( ९ )
न्यायखण्डखाद्याऽपरनामा-
महावीरस्तव: ( ५ )
न्यायावतार: ( १६ )
न्यायावतारसूत्रवार्तिकम्( १६ )

प

पंचवत्थुगं ( २ )
पञ्चकपरिहाणि: ( २२ )
पञ्चनिर्ग्रन्थी ( १५ )

पञ्चलिङ्गीप्रकरणम् ( १५ )
पञ्चवर्गपरिहारनाममाला ( २२ )
पञ्चसङ्ग्रहः ( १३ )
पञ्चसंयतप्रकरणम् ( १५ )
पञ्चाशकानि ( १ )
पज्जंताराहणा ( १४ )
पट्टावलीविसुद्धी ( १६ )
पडिलेहणाविचारकुलकम् ( ७ )
पदार्थस्थापनासंग्रहः ( १७ )
पद्मानन्दशतकम् ( ६ )
परमज्योतिपञ्चविंशतिका ( ५ )
परमसुख-द्वात्रिंशिका ( २५ )
परमाणुखण्डषट्त्रिंशिका ( १५ )
परमात्मपञ्चविंशतिका ( ५ )
परमानन्दपञ्चविंशतिः ( ९ )
पर्यन्ताराधनाकुलकम् ( ७ )
पर्युषणादशशतकम् ( १६ )
पव्वज्जाविहाणकुलयं ( ७ )
पाइअलच्छीनाममाला ( २२ )
पाक्षिक गाथा विचार ( २२ )
पाक्षिकपर्वसारविचारः ( २२ )
पाक्षिकसप्ततिका ( २२ )
पिंडालोयणाविहाणाओ पयरणं ( २२ )
पिण्डविशुद्धिः ( १० )
पुण्डरीकतीर्थपतीस्तोत्रम् ( ५ )
पुण्यकुलकम् ( ७ )
पुद्गलपरावर्तस्तवनम् ( १३ )
पुद्गलषट्त्रिंशिका ( १५ )
पुष्पमाला ( ८ )
पूजा-चतुर्विंशतिका ( २५ )
पूजाविधिः ( ११ )
पोषधविधि संग्रहणीगाथाः ( २२ )
पोसहविही ( १० )
पौषधषट्त्रिंशिका ( १६ )
प्रकृतिबन्धविचारः ( २६ )
प्रकृतिविच्छेदप्रकरणम् ( २३ )
प्रकृतिस्वरूपसंरूपणं
प्रकरणम् ( २३ )
प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी ( १५ )
प्रज्ञाप्रकाशषट्त्रिंशिका ( २५ )
प्रतरप्रमाणसंग्रहगाथाः ( १८ )
प्रतिक्रमणसमाचारी ( २२ )
प्रतिमार्थं काष्ठपाषाणपरीक्षा ( २२ )
प्रतिमाशतकम् ( ४ )
प्रतिष्ठाविधिः ( २२ )
प्रतिष्ठाविधिः ( २२ )
प्रतिष्ठासंग्रहकाव्यम् ( २२ )
प्रतिसमयजागृतिकुलकम् ( ७ )
प्रत्याख्यानकुलकम् ( २१ )
प्रत्याख्यान कुलकम् ( २१ )
प्रत्याख्यानभाष्यम् ( २१ )
प्रत्याख्यानस्वरूपम् ( १० )
प्रबोधचिन्तामणिः ( ९ )
प्रभाते जीवानुशासनम् ( १४ )
प्रमाणनयतत्त्वालोकालङ्कारः ( १६ )
प्रमाणप्रकाशः ( १६ )

प्रमाणमीमांसा ( १६ )
प्रमादपरिहारकुलकम् ( ७ )
प्रमालक्षणम् ( २१ )
प्रवचनपरीक्षा ( १६ )
प्रवचनसारोद्धारः ( १७ )
प्रव्रज्याविधानकुलकम् ( ७ )
प्रशमरतिः ( ९ )
प्रश्नद्वात्रिंशिका ( १६ )
प्रश्नशतकम् ( ६ )
प्रश्नावली ( २६ )
प्रश्नोत्तररत्नमाला ( १२ )
प्राकृतसंवेगामृतपद्धतिः ( १४ )
प्रातःकालिकजिनस्तुतिः ( ९ )

ब

बन्धस्वामित्वप्रकरणम् ( २३ )
बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः ( १३ )
बन्धषट्त्रिंशिका ( १५ )
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वे प्रकरणे ( ५ )
बन्धोदयसत्ता ( १३ )
बालावबोधप्रकरण ( २१ )
बिम्बपरीक्षा ( २२ )
बिम्बपूजापरीक्षा ( २२ )
बोटिकनिराकरणम् ( २६ )
बोटिकोच्चाटनं वादस्थानकम् ( २६ )
बृहत्क्षेत्रसमास ( २३ )
बृहत्संग्रहणी ( २३ )
बृहद्वन्दनकभाष्यम् ( १० )

भ

भवभावना ( ८ )
भावकुलकम् ( ७ )
भावनाकुलकम् ( २१ )
भावनाशतकम् ( ६ )
भावप्रकरणम् ( १३ )
भाषारहस्यम् ( ५ )
भोजनपूर्वचिन्तागाथाः ( ८ )

म

मंगलकुलयं ( ७ )
मण्डलप्रकरणम् ( १८ )
मदादिविपाककुलकम् ( ७ )
मनुष्यभवदुर्लभता ( ९ )
मनःस्थिरीकरणप्रकरणम् ( २६ )
मनोनिग्रहभावनाकुलकम् ( ७ )
महामुनि-स्तवः ( २५ )
महावीरविज्ञप्तिद्वात्रिंशिका ( २१ )
महासतीकुलकम् ( ७ )
मार्गपरिशुद्धिः ( ५ )
मार्ग्गणासु बंधहेतूदयत्रिभङ्गी ( १३ )
मालोपबृंहणा ( २२ )
मिच्छादुक्कडवोसिरणविहि कुलयं ( ७ )
मिथ्यात्वकुलकम् ( ७ )
मिथ्यात्वमथनकुलकम् ( ७ )

मिथ्यात्वविचारकुलकम् ( ७ )
मिथ्यात्वस्थानविवरण
कुलकम् ( ७ )
मुखवस्त्रिकास्थापनकुलकम् ( ७ )
मूर्खशतकम् ( २१ )
मूलशुद्धिः ( १० )
मूलशुद्धि प्रकरणम् ( २५ )
मृत्युमहोत्सवः ( १४ )
मोक्षोपदेशपञ्चाशकम् ( ९ )

य

यतिदिनकृत्यम् ( ११ )
यतिदिनचर्या ( १० )
यतिलक्षणसमुच्चयः ( ४ )
यतिशिक्षापञ्चाशिका ( ८ )
यात्रास्तवः ( ११ )
युक्त्यनुशासनम् ( १६ )
युक्तिप्रकाशः ( १६ )
युक्तिप्रबोधः ( १६ )
योगदृष्टिसमुच्चयः ( ३ )
योगप्रदीपः ( १२ )
योगबिन्दुः ( ३ )
योगशतकम् ( ३ )
योगशास्त्रम् ( १८ )
योगसार ( २१ )
योगानुष्ठानकुलकम् ( ७ )
योगोद्वाहिलक्षणावली ( २२ )
योनिस्तवः ( १३ )

र

रजोष्टकम् ( २५ )
रत्नत्रयकुलकम् ( ७ )
रत्नसञ्चयः ( १७ )
रोहिणीज्ञातोपनयः ( २२ )

ल

लघुकर्मविपाकः ( २६ )
लघुक्षेत्रसमास ( २३ )
लघुप्रवचनसारोद्धारः ( १७ )
लघुशतकभाष्य ( २३ )
लध्वल्पबहुत्वप्रकरणम् ( १३ )
लिङ्गानुशासनम् ( २४ )
लिङ्गानुशासनम् ( २६ )
लोकतत्त्वनिर्णयः ( ३ )
लोकनालिकाद्वात्रिंशिका ( १३ )

व

वाक्यप्रकाशः ( १८ )
वाणारस्यां कृतं
श्रीपार्श्वनाथजिनस्तोत्रम् ( ५ )
विंशतिर्विंशिकाः ( ३ )
विचारपञ्चाशिका ( १३ )
विचारसप्ततिका ( १७ )
विचारसारः ( १७ )
विचारस्तोत्रम् ( २५ )
विजयप्रभसूरिक्षामणक
विज्ञप्तिः ( ५ )
विजयप्रभसूरिस्वाध्यायः ( ५ )
विजयोल्लासमहाकाव्यम् ( ५ )

विद्वच्चिन्तामणिः ( २२ )
विद्वत्प्रबोधशास्त्रम् ( २२ )
विद्वद्गोष्ठी ( १२ )
विभक्तिविचारः ( १५ )
विरतिफलकुलकम् ( ७ )
विविधतपोदिनाङ्ककुलकम् ( ७ )
विवेककुलकम् ( ७ )
विवेकमञ्जरी ( ८ )
विशेष-णवतिः ( १५ )
विषयविरक्तिकुलकम् ( ७ )
विसयनिंदाकुलयं ( २१ )
वीरस्तवः ( १५ )
वैराग्यकल्पलता ( १९+२० )
वैराग्यकुलकम् ( २५ )
वैराग्यधनदशतकम् ( २१ )
वैराग्यप्रेरणम् ( २५ )
वैराग्यरङ्गकुलकम् ( २१ )
वैराग्यरसायनम् ( ८ )
वैराग्यशतकम् ( ६ )
व्यवहारकुलकम् ( ७ )
व्याख्यानविधिशतकम् ( ६ )

श

शङ्खेश्वरपार्श्वजिनस्तोत्रम्-१ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-२ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-३ ( ५ )
शतकप्रकरणभाष्यम् ( २३ )
शतकसंज्ञकः पञ्चमः
कर्मग्रन्थः ( २३ )
शतपञ्चाशितिका संग्रहणी ( २१ )
शमीनपार्श्वस्तोत्रम् ( ५ )
शब्दरत्नाकरः ( २२ )
शारदीया नाममाला ( २२ )
शास्त्रवार्तासमुच्चयः ( ३ )
शीलकुलकम् ( ७ )
शीलोदाहृतिकल्पवल्ली ( २५ )
शीलोपदेशमाला ( ८ )
शृङ्गारमण्डनम् ( २१ )
शृङ्गारवैराग्यतरङ्गिणी ( २१ )
शोकनिवारणकुलकम् ( ७ )

श्र

श्राद्धकुलकम् ( २५ )
श्राद्धदिनकृत्यम् ( १० )
श्राद्धविधिः ( १० )
श्रावकधर्मकृत्यम् ( ११ )
श्रावकधर्मविधिः ( ३ )
श्रावकप्रज्ञप्तिः ( १० )
श्रावकप्रायश्चित्तसामाचारीविधि ( २५ )
श्रावकविधिः ( २२ )
श्रावकव्रतकुलकम् ( २१ )
श्रावकव्रतभङ्गप्रकरणम् ( १८ )
श्रीकातन्त्रविभ्रमसूत्रम् ( १८ )
श्रीमद्गीता-तत्त्वगीता ( १८ )
श्रुतस्तवः ( २१ )
श्रुतास्वादः ( ८ )
शृङ्गारधनदशतकम् ( २१ )
शृङ्गारशतकाव्यम् ( २१ )
शृङ्गारवैराग्यतरङ्गिणी ( १२ )

ष

षट्स्थानकम् ( १३ )
षडशीतिनामा चतुर्थः
प्राचीनकर्मग्रन्थः ( १३ )
षडशीतिभाष्यम् ( २३ )
षड्दर्शनपरिक्रमः ( १६ )
षड्दर्शन कल्पलता ( २५ )
षड्दर्शनसमुच्चयः-१ ( २ )
षड्दर्शनसमुच्चयः-२ ( १६ )
षड्द्रव्यसङ्ग्रहः ( १३ )
षड्विधाऽन्तिमाऽऽराधना ( १४ )
षष्ठिशतकम् ( ६ )
षोडशकप्रकरणम् ( ३ )
षोडशश्लोकी ( २१ )

स

संग्रहशतकम् ( ६ )
संज्ञाकुलकम् ( ७ )
संज्ञाधिकारः ( १८ )
संबोधप्रकरणम् ( २ )
संबोधसत्तरि ( २१ )
संयम मंजरी ( २२ )
संविज्ञसाधुयोग्यनियम
कुलकम् ( ७ )
संवेग कुलकम् ( २५ )
संवेग कुलकम् ( २५ )
संवेगकुलयं ( ७ )
संवेगद्रुमकन्दली ( ९ )
संवेगमंजरीकुलयं ( ७ )
संवेगरंगमाला ( १४ )
संवेगामृतम् ( १८ )
संसारे नत्थि सुहं ( २५ )
सङ्घपट्टकः ( २१ )
सङ्घस्वरूपकुलकम् ( ७ )
सज्जनचित्तवल्लभः ( ९ )
सन्देहदोलावली ( १६ )
सन्देहसमुच्चयः ( २६ )
सभापञ्चकप्रकरणम् ( १८ )
सप्ततिका-टिप्पनकम् ( २६ )
सप्ततिकाभाष्यम् ( १३ )
सप्ततिकाभिधः षष्ठः
कर्मग्रन्थः ( २३ )
सप्ततिकासारम् ( २३ )
सप्ततिशतकस्थानप्रकरणम् ( २३ )
सप्तपदीशास्त्रम् ( २२ )
समताशतक ( ६ )
समवसरणप्रकरणम् ( १३ )
समवसरणरचनाकल्पः ( २३ )
समवसरणस्तोत्रम् ( १३ )
समाधिशतक ( ६ )
समाधिशतकम् ( ६ )
समाधिसाम्यद्वात्रिंशिका ( ४ )
सम्बन्धपरीक्षा ( २६ )
सम्मतिसूत्रम् ( १६ )
सम्मत्तकुलयं-१ ( ७ )
सम्मत्तुप्पायविही कुलकम् ( ७ )
सम्यक्त्वकुलकम्-२ ( ७ )
सम्यक्त्वकुलकम्-३ ( ७ )
सम्यक्त्वपरीक्षा ( १६ )

सम्यक्त्वरहस्य प्रकरणम् ( २५ )
सम्यक्त्वसप्तति: ( १० )
सम्यक्त्व स्तव ( २२ )
सम्यक्त्वस्वरूपकुलकम् ( ७ )
सर्वजीवशरीरावगाहनास्तव: ( २२ )
सर्वज्ञशतकम् ( ६ )
सर्वज्ञसिद्धि: ( २ )
सर्वतीर्थमहर्षिकुलकम् ( ७ )
सर्वश्रीजिनसाधारणस्तवनम् ( २ )
साधर्मिकवात्सल्यकुलकम् ( ७ )
साधर्मिकवात्सल्यकुलकम् ( २१ )
साधु स्थापनाधिकार ( २२ )
साध्वाचारषट्त्रिंशिका ( २५ )
सामाचारी ( ४ )
सामान्यगुणोपदेशकुलकम् ( ७ )
साम्यशतकम् ( ६ )
सारसमुच्चयकुलकम् ( २५ )
सारावलीपइण्णयं ( १५ )
सार्द्धशतकभाष्यम् ( २३ )
सिद्धदण्डिकास्तव: ( १३ )
सिद्धपञ्चाशिका ( १३ )
सिद्धप्राभृतम् ( १३ )
सिद्धिमातृका ( २६ )
सिद्धसहस्त्रनामकोश: ( ५ )
सिद्धान्तसारोद्धार: ( १८ )
सुक्तसंग्रह: ( २५ )
सुक्ष्मार्थविचारसारोद्धार: ( १५ )
सुगुरु गुणसंथवसत्तरिया ( २१ )
सुभाषिताष्टकानि ( १२ )
सुभाषित-अष्टकानि ( २५ )
सुमिणसित्तरी ( ८ )
सूक्तरत्नावली-१ ( १२ )
सूक्तरत्नावली-२ ( १२ )
सूक्तिमुक्तावली ( १२ )
सूक्ष्मार्थसंग्रहप्रकरणम् ( २३ )
सूक्ष्मार्थसप्ततिप्रकरणम् ( १८ )
सूत्रकृताङ्गाद्यचतुरध्ययनाऽ-
नुक्रमगाथा: ( १५ )
स्तवपरिज्ञा ( १० )
स्त्रीनिर्वाणप्रकरणम् ( १६ )
स्त्रीवास्तविकताप्रकरणम् ( ८ )
स्थापनापञ्चाशिका ( २२ )
स्याद्वादकलिका ( १६ )
स्याद्वादपुष्पकलिका ( २५ )
स्याद्वादभाषा ( १६ )
स्याद्वादमुक्तावली ( १६ )
स्यादिशब्दसमुच्चय: ( २६ )

ह

हिंसाफलाष्टकम् ( ३ )
हिओवएस ( ८ )
हिङ्गुलप्रकरणम् ( १२ )
हितशिक्षाकुलक ( २१ )
हिताचरणम्( २५ )
हैमनाममालाशिलोञ्छ: ( २६ )
हैमविभ्रम: ( २२ )
हृदयप्रदीपषट्त्रिंशिका ( ९ )

टोटल ग्रन्थ - ६१२

# શાસ્ત્રસંદેશનું નવલું નજરાણું
# "પદ્યાનુક્રમણિકા સંપુટ"

- આ સંપુટમાં ચાર ભાગ છે.
- પ્રથમ ભાગમાં આગમના ૪૪ ગ્રંથો અને સંવેગરંગશાલાની પદ્યાનુક્રમણિકા છે.
- દ્વિતીય ભાગમાં પ્રાકૃતના ૩૭૩ ગ્રંથોની પદ્યાનુક્રમણિકા છે.
- તૃતીય ભાગમાં સંસ્કૃતના ૨૦૫ ગ્રંથો અને લોકપ્રકાશની પદ્યાનુક્રમણિકા છે.
- ચતુર્થભાગમાં ત્રિષષ્ટિશલાકાપુરુષચરિત્ર અને વૈરાગ્યકલ્પલતા-રતિની પદ્યાનુક્રમણિકા છે.
- આ સંપુટમાં છ પરિશિષ્ટો છે.
- આ સંપુટમાં ટોટલ ૬૨૬ ગ્રંથોનો સમાવેશ કરેલ છે.
- આ સંપુટમાં ટોટલ ૧,૭૭,૦૦૦ શ્લોકનો સમાવેશ કરેલ છે.
- આ સંપુટના ટોટલ ૧૫૭૦ પેજ છે.
- આ સંપુટની કિંમત ૧૮૦૦/-રૂપિયા છે.

# शास्त्रसंदेशमाला


१ से २४ शास्त्रसंदेशमाला- १ से २४

२५. आगमपद्यानाम् अकारादिक्रमेण
अनुक्रमणिका-१

२६. प्राकृतपद्यानाम् अकारादिक्रमेण
अनुक्रमणिका-१

२७. संस्कृतपद्यानाम् अकारादिक्रमेण
अनुक्रमणिका-१

२८. त्रिषष्टिशलाकापुरूषचरित्र-श्लोकानाम्
अकारादिक्रमेण अनुक्रमणिका-४

२९. संवेगरंगशाला

३०. शास्त्रसंदेशमाला- २५

३१. शास्त्रसंदेशमाला- २६

३२. से ५१ स्तोत्रसंदेशमाला- १ से २०